M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 493

Title: Shiv Sahasra Nama
Bhashya

493

शिव सहस्रनाम भाष्य

Shiva Sahasra nāma			Title
		Bhāshya	Author
			Editor
		Sam. 1698	Year, Vols.
			Publisher
493			Remarks

रोमादे [illegible] गोधे [illegible] गुरावेकाले [illegible] किना।
न्नद्कालो [illegible] नाम्नोर [illegible] नवनो[illegible]वा॥२॥ वागीश्वरीचरणपद्मजनप्रसादः श्रीमा
लवंशतिलकः कडुनामधेयः। आसीत्सुवर्णिमिहिमोत्प्रथगामिलोके नित्यं कडुस्तेइति
प्रथितः कडूश्री॥४॥ पुत्रार्थप्रार्थितस्तस्मै प्रादाद्विष्णुः सुतं वरं। विष्णुदौ सइति ख्यातं पितुरप्य
धिकं गुणैः॥ नानोपचारविधिना भगवान्गिरीशस्तेनार्चितः समभवत्किल सुप्रसन्नः॥

तस्मात्तदाद्दरमितिप्रथितः सुतस्तन्नूयान्मदीयचरणार्पितचित्तवृत्तिः॥६॥ मरघाईरमा
रत्नं जायाद्वमं शिवप्रियं। पुत्रं लब्धेन किं चित्रं वागीश्वर्याः प्रसादतः॥७॥ स पुत्रवानप्य
प्रनोंश्च मौलेर्लेभे सुतं प्रार्थितवान्गुणाढ्यं। वागीश्वरीतेनच तस्य भार्या जागाभिधानं
लब्धेनेस्म पुत्रं॥८॥ त्वचावागीश्वरीदेवी सुप्रसन्नां कुलांबिकां। प्रार्थयत्फ चितं जागाभि
धः श्रीरुदलकिमान्॥९॥ अमलकमलहस्ताप्रपूर्णशीतांशुवक्त्रा प्रतिदिनजपपूजाध्या
दो[illegible]पचारैः। प्रमुदित[illegible]दद्या ह श्रीयुतोगीनकर्णाभवसि सुचिरजीवी पुत्रपौत्रादि
[illegible]॥१०॥ धर्मार्थकामभो[illegible]णां साधनं भजनं तव। विज्ञप्तिकरवैकांचिदित्या[illegible]
शांज॥११॥ मातः त्वप्रां[illegible]प्तीमयियेन शांतो विष्णोश्चगीनरचं[illegible]प्रगीत[illegible] अनविाध

...ारराहितः कथ[illegible] शास्त्रोक्तं तु संस्कृतगिरा प्रब्रवामि सम्यक् ॥१२
...रु पुत्र मदीयत[illegible]ः श्रीवासुदेवतनयो हरिनाथशर्मा। श्रीकांतनन्दर वि
...वा च्चिलासश्री[illegible]करिष्यति श्रुत्वांशितिकंठनाम्नां ॥१३ दोषमात्रं तिरस्कृत्य पु
रस्कृत्यैव ते गुणान्। व[illegible]ांड्रियाय साधूनां दुर्जनानां हृदेनमः ॥१४ यद्दिनज हृति दोषं
दुर्जनाः स्तूयमाना यदि च जगति नूनं साधकैः वः संति केचित्। यद्दिनपयति दीनं न्ना
रतीन्नद्काली। तदितरजनमिथ्यान्यर्थानतालमेव ॥१५ यत्यादाब्जनखाग्रकांतिलवि
नाविद्यांधकारस्य कमे। स्वांतेऽद्वैनमनेकवेदशिरसा नत्वं समुज्जृंभितं। चैतन्याष्टनशा ।२
क्तिवीक्षणज्ञनावाणीचयस्येच्छया। विश्वोत्पत्तिविलासनाशविलवेकज्ञायनस्मैनमः

॥१६ शाचाजागान्निधंशांतं अनुकंप्यं शिवप्रियं॥ तस्यान्येषां च बोधाय यथाशक्ति विवि
च्यते॥१७ इह यद्यपि श्रुतिस्मृतीतिहासपुराणागमेषु श्रीचंद्रचूडस्वरूपं निरणायि
।तद्गुणाश्च वर्णिनास्तथापि नानावर्णनवैचित्र्यस्य विद्यमानत्वाद्दलं बुद्धेरस्त्वा बाध
था शक्ति निरूप्यते। यथाह पुष्पदंतः॥ असितगिरिसमस्यात्कज्जलमित्यादि॥ अथ
।२ भवतः प्रवृत्तिः स्वार्थ[illegible]रार्थवानतावत्स्वार्थं। स्वस्य वेदाध्ययनस्यार्थावबोधपर्यंतत्वात्र
दे वा[illegible]गमेजातन्तन्मध्य[illegible]र्त्ति निगवत्स्वरूपगुणगणज्ञानोत्पात्तः। न द्वितीयः। परेषाम
पि दु[illegible]जीवोदंविधीय[illegible]त्वं श्रवणे निवनद्वेतोरवास्तु किं तेनेति न्यायेन न नणएव निरंकु
शं जायमानत्वात् नूज्ञा[illegible] नाम [illegible]कंचार्थावबोधायैतद्ग्रंथारंभानयुक्तः। अध्ययनविधि

ऽदृष्टार्थतयाऽङ्कफला दि[illegible]मिव न तन्मात्रार्थाज्ञाने[illegible]त्वात्। येनापि
न गवन्नाममालाया अर्थ[illegible]राए वा दृष्टोत्पत्तिरुररीक्रियते तंगीक्रियात चात नापि मुनीप्र
ण[illegible]वचनेन्यएव विशि[illegible] दृष्टोत्पत्तिस्तन्तस्य प्राप्ताप्राप्तविवेकेनाऽशारणश्रवणाभ्यामेवध
र्मा त्यन्तैरर्थज्ञानस्याजाग[illegible]नायमानवचेन तदर्थस्फुटीकरणार्थं टीकाप्रयासोऽनु
पपन्नार्थं। अत्रोच्यते। यद्यपि वेदस्मृतिपुराणेतिहासागमैः श्रीकंठतत्त्वं निर्णीतं। तथा
पि तेषामनेकेषां गंभीरार्थानामालोचनस्याशक्यत्वेन युक्तोयमारंभो मंदमति
प्रकाशनाय। अथैवमपि कस्यचित्पुरुषधौरेयस्याविलंबेनैव केवलवेदवाक्यैर्न जनि ॥२
तादृवज्ञानाद्भूत तत्यतानं प्रत्युपयोगो मास्तुनाम। तच्चित्तरंजनार्थमस्मदायासास्तु

वेदाध्ययनस्यार्थावबोधकफलत्वाच्च। अदृष्टार्थत्वेपि विशिष्टादृष्टोत्पत्तिस्तु ज्ञानपूर्वका
ध्ययनादेव भवति। नान्यथा। तथा च श्रुतिः। यदेव विद्यया श्रद्धयोपनिषदा करोति तदेवा
स्य वीर्यवत्तरं भवतीति। तथा च तुर्लक्षण्यां मीमांसायां चतुर्थाध्याय प्रथमचरणे सूत्रं।
यदेव विद्ययेति हि। तद्व्याख्यानं श्री[illegible]करचरणैः। यथा मंत्रैरेव स्मारितमित्यादि तदर्थे
तत्सहस्र[illegible]नामावली प्रतिपाद्यार्थावबोधेनोत्पन्नज्ञानस्य प्रमर्थतातनतथा प्रकारांत
[illegible]स्वार्थवारंभो युक्तः। एवं पुरुषार्थचतुष्टय प्राप्तेः॥ तद्यथा। महापापैश्चपापैश्च संप्र
[illegible]निकृष्टकिल्बिषैः। शिवस्तन्युच्चरेत्सद्यः पूतो भवति नान्यथा। तद्दानंनतौ तपा तज्या
[illegible]पूर्वेन दक्षिणा। ॥ तेन तु नामस्मरणात्सर्वो धर्मः प्रजायते। त्रैलोक्यराज्यलक्ष्मीसा:

श्री॥

श्रीकंठस्मरणाद्भवन्तु दि[...]रामाः पुत्राः पौत्राः सौभाग्यं च विरोगता। आश्वाप्नोति रुद्र
[...]लोका[...] वि[...] चार[...]जीवन्वा म्रियमाणोऽपि गिरीशं मनसा स्मरन्। देहपाशाद्वि
[...]पूर्णानंदः प्रजायते[...]तन्मूलभूताः श्रुतयस्तान् नमंहोनदुरितमिति। यस्मिन्न
चः सामयजूंषीति। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां। गोभिः जु
ष्टोधनेन ह्यायुषा च बलेन च। ज्योतिषां ज्योतिरेकमित्यादयः। तस्मात् स्वार्थचिंतकैर
भ्यो युक्त एव। एकवारमपि यन्नाम्नामुच्चारणं वांछितप्रदं किं पुनस्तस्य ध्याजेनाद्यौ व्याहृतयः।
नाथेतसहस्रनामस्तोत्रस्य प्रस्तावः॥ सनकाद्या इति॥ ८॥ सनत्न॥ सनकाद्या मुनि ॥ध
वरा नरनारायणाश्रमं। गता ध्यानपरं दृष्ट्वा कियत्कालं व्यवस्थिताः॥१॥ विसर्जिते ततो

ध्यानप्रणम्योच्चैः शनैः शनैः॥ दंडवत्प्रणिपाताद्यैस्तमाराध्याच्युतं हरिं॥२॥ सनकाद
य ऊचुः। भगवन् देवदेवेश सर्वशास्त्रेषु गीयसे। धर्मार्थकाममोक्षेषु दुर्लभं त्वं न हि
तविभो॥३॥ सर्वेषां सिद्धयस्त्वत्तः सर्वेभ्योऽप्यधिको भवान्। ध्येयश्च सर्वलोकानां फ
लदाता विशेषतः॥४॥ तप एतादृशं कत्वं मुह्यतोसि कथं विभो। ध्येयं किं तव वैकुंठक
स्मात्त्वं ध्येयमुच्यते॥५॥ जन्ममृत्युजरातीतः सर्वज्ञः सर्वसिद्धिमान्॥ न कर्मणावतार
[...]लीलामात्रमिदं स्मृतं॥६॥ परं ध्येयं समाचक्ष्व मम तत्त्वादयां विभो। चत्तःपारापि
[...]ध्येयो यं त्वां ध्यायसि सर्वदा॥७॥ कियत्कालं बहुकल्पानिति यावत्। एतावत्कालप
र्यंतं श्रीविष्णुर्महात्मा[...]तेन तर्हि तेषां मतिरभूत् किमिति रेषां जनानां। भगवन्निति। इ

श्रीन

ततः परं सनकादीनां स्तुतिः॥ श्रीविष्णुं प्रति तथैव। परं तु श्रीमद्देशानपयासर्वज्ञानां तस्य
प्रसादे श्रीमहादेव इत्यत्र वैकुंठ एवैव तेषां विपर्ययः॥ ७॥ शृणुध्वं योगिनः सार्वरहस्यं म
हात्मिकं। इदं लक्ष्म्या पुरा ... प्रोक्तं तां प्रति यन्मया॥ ८ लक्ष्मीवासल्पयोगेन कथयिष्यामि
तत्त्वतः। लक्ष्म्यां ताहं तदा प्रमयाहं शंकिंकरे मम॥ ९ मया दानानि यज्ञाश्च कृता जन्मसु का
टिषु। ततः शुद्धात्मनो जाता नैष्ठिकी बुद्धिरीश्वरे॥ १० ततः श्रीरुद्रपूजायां प्रयतात्मा धृतव्र नक्ति
तः। कल्पकोटिसहस्रैस्तु नारती श्रुतवानहं॥ ११ ध्यायस्वेति ततो ध्यानं कृतवान्पार्वतीपते :
।कल्पकोटिसहस्रैस्तु पुनर्वाणी बभूव ह॥ १२ अर्चयेति ततो पचं विधायेशस्य सुंदरी। ॥५
भुक्तं नानापूजोपहारेण कृतवानर्चनं परं॥ १३ जन्मकोटिभिरिति यत्र विष्णुर्लक्ष्मी आराध्यः शंभुस्त

समानं
त्रान्यः काल्पमैतिकर्तुं न समर्थ इत्यर्थः श्रवणमिति॥ १३॥ श्रवणं कीर्तनं शंभोः स्मरणं पा
दासेवनं। अर्चनं वंदनं दास्यं भक्तिर्मे सन्निधानवत्॥ १४ ततश्चिंतापरो जातो विष्णुर्लोह
र्शनेच्छया। आक्रोशांतस्तदा स्वामी प्रत्याहालवदीश्वरः॥ १५ कोऽयं दुधवलोत्कम्पः पंचव
क्त्र उमापतिः॥ त्रिशूली वृषभारूढस्त्रिनेत्रो दशबाहुमान्॥ १६ दृष्ट्वा तुष्टं महेशानं तुष्टा
ति॰ वाहं सगद्गदः। ततः स खलु महान्मह्यं मया त्वास्मै निवेदितः॥ १७ ततः प्रभृति सख्यं मे तता
...ह निवेदनं। वराण तनया ... शृणु धर्मर्षयो मलाः॥ १८ अनेन भावयोज्ञाता लोका
श्चिन्तक दासवनात्। मुक्तिं ... निने मुक्तेः का कथा ... सर्वथा॥ १९ सप्तलक्ष योब्रह्मादी
नां सुलभा सख्यमात्म ... नं तश्री नारायण एव कर्तुं शक्नोति नान्यः। नारायणस्ततास्तु
श्रोत॰

तिनेमः शान्तवायश्रत्यादि॥ श्रुवीद प्रसिद्धा। ततो मन्त्रपयेति॥१९॥ ततो मन्त्रपया मुक्तः सदा
मुक्तेति पुत्रक॥ लोकाइत्वेति तिनत्वेन सदा मुक्तं ममाज्ञया॥२० चस्वरूपं सदा व्यक्तं मस्व
रू॰ स्वरूपगापितं। विरलोवत्वे नात्रम चंवावाहज्ञाएवा॥२१ क्रीडासक्तस्यातविष्णोनपापंस्पृश
तिक्कचित्। जीवन्मुक्तं च लोकस्वां सदामुक्तं वदिष्यति॥२२ ज्ञतनज्ञत्यस्त्वतोन्त्रवान्तक्तिंनव
विधांसदा। अवतारानुगृहीवाहंकुर्वन्तक्तिमनेकधा॥२३ विष्णुः श्रीरांचुलपयामुक्तइ
को तिलोकानज्ञास्यंति। किंतुसदामुक्तइति। तथावीस्मादतिरिक्तोनमहान्। कविन्तुवतु
राश्रन्तिन्तत्वेनोपासनांकरिष्यंतिपरंतुमन्त्रपयावंमुक्तः। पूर्वंतुजीवात्मेतिनज्ञास्यंति। य ॥६
दितवसाधनसंपत्त्यामुक्तिरस्त्रदितिस्यात्तर्हिकोनाममममन्त्रपतिन्तावः। कनाकनाव

तारणकाकान्तक्तिः ज्ञता। तामाह॥ श्रवणमिति॥ठ॥ श्रवणंनान्निपुत्राद्यैः कीर्तनंना
रदादिन्निः। दास्यं चतुर्न्तुजाद्यैश्चपार्षदैस्तत्रधारिन्निः।२५) स्मरणंचात्रिपुत्राद्यैः से
वनंन्तागवादिन्निः॥२४ अर्चनंरामन्तज्ञाद्यैर्वंदनंयादवादिन्निः॥ दास्यंचतुर्न्तुजाद्यै
श्चपार्षदैस्तत्रधारिन्निः॥२५ सख्यंहरिहराद्यैश्चनिवदः त्वाषशायिना॥ नवधा राम
ज्ञस्तान्त्यं वि...षाजानकीपातो॥२६ श्रीरांन्तोः ज्ञपयासम्यग्मनामातिपावनं। तद
हेहार्हन्तक्त्यानाम्नामहात्तरशतं॥२७ पठामियनामसाक्षाडुद्वोन्तवतिसज्जतः। शिव
रत्युश्चिरन्नजंतुर्महापापाद्युधर्मवान्॥२८ स्तत्तउ॥ इदंस्कंदेनचप्रोक्तं लोपामुद्रापतिं
प्रति। रहस्यंतन्मयाप्रोक्तं...देवोन्त्यन्नाषत॥२९ तत्रस्कंदपुराणेइमान्याख्यानानि
श्रोतं...

विस्तरतः प्रसिद्धानि। तथा॥ श्रीगांगेयेन युधिष्ठिरं प्रत्युक्तमिति पुराणेतिहासयोरैक्यवा
ज्ञ क्येन शिवनाम्नामयुतमिति प्रज्ञैः पठितुं न शक्यत इति ब्रह्मनंदिनारायणोपमन्यु
प्रभृतिभिरष्टोत्तरसहस्रसंख्याकं निर्मितमिति। भाव॥२८॥ पृष्ठं तं शिवनामानि धर्मपु
त्रं युधिष्ठिरं॥ धर्मार्थकाममोक्षाणां साधनं रुद्रनामयत्॥३०॥ तन्माहात्म्यं यादवेंद्रेण श्रीम
हेशप्रसादतः॥ तंडिना विष्णुना विव ब्रह्मणास समुदाहृतं॥३१ अयुतं शिवनाम्नां यत्तस्मा
त्सारं समुद्धृतं। नवनीतं यथा दध्नः प्रमथ्य व्यक्ततां व्रजेत्॥३२ नाम्नामष्टोत्तरं तत्सारात्सा
रं समुद्धृतं। उपमन्युर्महातेजा वासुदेवमभाषत॥३३ तदहं संप्रवक्ष्यामि नाम्नामष्टोत्त ॥१
रं शतं॥ श्रीवासुदेव उ॥ ततः सप्रयतो भूत्वा मम तात युधिष्ठिर। प्रांजलिः प्राह विप्रर्षि

र्नामसंहारमादितः॥ उपमन्युरुवाच॥ ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदांगसंभवैः। सर्व
लोकेषु विख्यातं स्थाणुं स्तोष्यामि नामभिः॥३५ महद्भिर्विहितैः स्तोत्रैः सत्यैः सर्वार्थसा
धकैः। ऋषिणा तंडिना भक्त्या कृतैर्देवकृतात्मना॥३६ यथोक्तैर्वेदविख्यातैर्मुनिभिस्तत्त
त्वदर्शिभिः। प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभं॥३७ श्रुतैः सर्वत्र जगति ब्रह्मलोकाव
तारितैः॥ यदनत्परमं ब्रह्म पुराप्रोक्तं सनातनं॥३८ न शक्यं विस्तरात्कृत्स्नं वक्तुं शर्वस्य
केनचित्। युक्तेनापि विभूतीनामपि वर्षशतैरपि॥३९ यस्यादिर्मध्यमंतं न मध्यं च सुरैर
पि [illegible]ष्यते। कस्तस्य शक्नुयाद्वक्तुं गुणान्कार्त्स्न्येन माधव॥४० किं तु देवस्य महतः संक्षि
प्ताहार्थं पदाक्षयकं। शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य चैव हि॥४१ अप्राप्य हि ततो ज्ञानमरा
[illegible] नर्षभार
ध्यांते [illegible]

क्वचिद्विदारोरपि । यद्दातनान ॥ अज्ञानः स्तुवन्नेवं तदाप्नवं ॥४२ अनादिनिधनस्याहं सर्वयो
नि[illegible]त्मनः । नाम्नां किं विस्मृतमुद्दिष्टं वाच्यवाच्यकजन्मनः ॥४३ वरदस्य वरेण्यस्य वि
रूपाक्षस्य धीमतः । श्रणु नाम समुद्दिष्टं यद्वक्तं पद्मयोनिना ॥४४ दशनामसहस्रा
णि यान्याह पितामहः । तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतं ॥४५ गिरः सारं य
था हेमपुष्पात्सारं यथा मधु ॥ घृतात्सारं यथा मंड स्तथैनत्सारमुद्धृतं ॥४६ सर्वपापाप
हमिदं चतुर्वेदसमन्वितं । प्रयत्नेनाधिगंतव्यं धार्यं च प्रयतात्मना ॥४७ शांतिदं पौष्टिकं
मह नैं चैव रक्षाघ्नं पावनं चैवयत् । इदं नक्ताय दातव्यं श्रद्धधानास्तिकाय च ॥४८ नामामतिमां शि ।८
।प्रतिसंहारः समुदायः । कृतैरित्यन्निच्यकीरूतैरित्यर्थः । नवदशिन्तिः सनकाद्यैः

अत्र विषाया ब्रह्मत्वं कस्त्वमित्यनेनाधिकारी दर्शितः । वक्तुमशक्यत्वेनानुपादेयता
१ नवाच्या सर्वार्थस्य । वटबीजे यथा वटस्तथात्रैव संनवादित्यर्थः । पापहरत्वेन प्रा
यश्चित्तकार्यकरत्वं शांतिकशब्देन । ऐहिकदुरितनिवर्त्तकत्वं । पावनशब्देन ब्रह्म
वर्चसादिदानेन सकलसंस्कारकर्तृत्वं । महच्छब्देन मात्रप्रदत्वमुक्तं अत्रानधिका
रिणाह ॥ कु ॥ नाश्रद्दधानरूपाय नास्तिकायाजितात्मने । यश्चान्यस्तयातदेवं न्नूता
[illegible]नुमिनाकिनं ॥४९ स[illegible]नरकं याति सह पूर्वैः सहानुगेः ॥ अत्रान्यस्तयाशिवस्या
न्यूनेज्ञः समाननादर्शनं । ब्रह्मधे श्वरेकानामान्यस्तया । यथादध्ना नवनीतमित्यादिदृ
ष्टांतः सकलवादापनिषद्धारसून्नतमिदमवनान्यदित्यर्थः । किं बहुना सर्वशास्त्राप

क्वचिद्दाशोरपि। यदात नाम्नः॥ अज्ञातः स्तुवन्नेवं नदान्तवं॥ ४२ अनादिनिधनस्याहं सर्वथा
निर्मलात्मनः। नाम्नां किं शिरसे मुहुर्हरं वक्ष्ये वाच्यकजन्मनः॥ ४३ वरदस्य वारणस्य वि
रूपाक्षे सुधीमतः। शृणु नाम समुद्दिष्टं यद्वक्तं पद्मयोनिना॥ ४४ दशनामसहस्रा
णि यान्यास्तपि तामह्यं। तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतं॥ ४५ गिरः सारं य
थाऽहमपुष्पात्सारं यथा मधु॥ घृतात्सारं यथा मोंड स्तथैनत्सारमुद्धृतं॥ ४६ सर्वपापाप
हमिदं चतुर्वेदसमन्वितं। प्रयत्नेनाधिगंतव्यं धार्यं च प्रयतात्मना॥ ४७ शांतिदं पौष्टि
मह कं चैव राक्षोघ्नं पावनं चैयत्। इदं नक्काय दातव्यं श्रद्धानास्तिकाय च॥ ४८ मामति मां शि ॥१८
।प्रतिसंहारः समुदायः। हतिरित्यन्निव्यक्तीलतैरित्यर्थः। नवदशिल्लिः सनकाद्यैः

अत्र विषयो ब्रह्मन्नक्रस्त्वमित्यनेनाधिकारी दर्शितः। वक्तुमशक्यत्वेनानुपादेयता
नवाच्या सर्वार्थस्य। वटबीजे यथा वटस्तथात्रैवसंनवादित्यर्थः। पापहरत्वेन प्रा
यश्चित्तकार्यकरत्वं शांतिकरात्वेन। ऐहिकदुरितनिवर्तकत्वं। पावनशब्देन ब्रह्म
वर्चसादिदानेन सकलसंस्कारकर्तृत्वं। महत्त्वाद्भिन माहात्म्यप्रदत्वमुक्तं अत्रानधिका
रिणाह॥ ४८॥ नाश्रद्दधानरूपाय नास्तिकायाजितात्मने। यस्यान्यस्त्वयातदेवंन्नूना
...तुष्टिनाकिनं॥ ४९ सहस्रनामकं याति सहपूर्वैः सहानुगैः॥ अत्रान्यस्त्वया शिवस्या
न्यतेजः समाननादर्शनं। अन्यथेश्वरेकानामान्यस्त्वया। यथा दध्नो नवनीतमित्यादिद
ष्टांतः सकलवादापनिष्य...गुरन्तूनमिदमेवनान्यदित्यर्थः। किंबहुनासर्वशास्त्राप

निषस्तु श्रीबादरायणस्त[illegible]॥ श्रीशंकराचार्यैर्भाष्येषु यदद्वैतं सकलप्रपंचातीतं ब्र
६ ह्म[illegible]दासीनं निरंजनं [illegible]त्स शंभुरत्र प्रतिपाद्यः। य इदं न मन्यंते ते जैनयवनबौध
[illegible]पद्रूणीयाः॥ इदं ध्यानमिदं योग इदं ध्येयमनुत्तमं॥५०॥ इदं जप्यमिदं ज्ञानं
रहस्यमिदमुत्तमं॥ इदं ज्ञात्वांतकालेपि गच्छेद्धि परमां गतिं॥५१॥ अंतकालेपीत्यनेना
पिशब्दात् पूर्वं शिवभक्तिहीनोऽपि प्राणोत्क्रांतिसमये ज्ञात्वा मुच्यत इत्यर्थः। निगदव्या
ख्यानमेतत्॥ढ॥ पवित्रं मंगलं पुण्यं कल्याणमिदमुत्तमं। निगदिष्ये महाबाहो स्तवा
नामुत्तमं स्तवं॥५२॥ इदं ब्रह्मा पुरा सृष्ट्वा सर्वलोकपितामहः॥ सर्वस्तवानां दिव्यानां राज ॥९
त्वे समकल्पयत्॥५३॥ तदाप्रभृति चैवायमीश्वरस्य महात्मनः॥ स्तवराजेति विख्यातो ज

गत्यमरपूजितः॥५४॥ ब्रह्मलोकादयं चैव स्तवराजोऽवतारितः॥ स्वर्गाच्चैवात्र भूर्लोकं तंडि
नाह्यवतारितः॥५५॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनं॥ ब्रह्मणोपि हि यद्ब्रह्म पराणाम
पि यत्परं॥५६॥ तेजसामपि यत्तेजस्तपसामपि यत्तपः। शांतीनामपि या शांतिः द्युतीनाम
पि या द्युतिः॥५७॥ पवित्राणां पवित्रं यद्धीमतामपि या च धीः। देवानामपि यो देवो मुनीनाम
पि यः शिवः॥५८॥ रुद्राणामपि यो रुद्रः प्रभुः प्रभवतामपि। योगानामपि यो योगः कारणानां
च कारणं॥५९॥ यतो लोकाः संभवंति न भवंति यतः पुनः। सर्वभूतात्मभूतस्य हरस्यामित
तेजसः॥६०॥ अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु। यच्छ्रुत्वा मनुजश्रेष्ठ सर्वान्कामान
च वाप्स्यसि॥६१॥ उपमन्युरुवाच॥ प्रांजलिः स उवाचेदं त्वयि निक्लिष्टे ढास्तु मे। एतानुद्दवाव
रान्देवो वंदितश्च सुरर्षिभिः॥६२॥ स्तूयमानश्च विविधैः नैत्रैवान रधीयत। अंतर्हितन्न
६

गवतिस्तानुगयाद्देवेश्वरः॥ ऋषिराश्रममागत्य मभिनम्याञ्कवानिह। यानि च प्रथिता
न्याहे तंडिराख्यातवान्मम॥६८॥ नामानि मानवश्रेष्ठ तानि त्वं शृणु सिद्धये। दशनामसह
स्राणि दृष्ट्वा ह पितामहः॥ सर्वस्य शास्त्रेषु तथा नानानामशतानि वै। गुह्यानीमानि
नामानि तंडिर्भगवतोऽच्युत। देवप्रसादाद्देवेशो पुरा प्राह महात्मने॥६९ इति स्तोत्रस्य
पूर्वरंगप्रस्तावः॥ ॥युधिष्ठिर उ॥ त्वयाहि प्रोच्यमानानि श्रुतानीह जगत्पत इत्यार
भ्य श्रीवासुदेव उवाच। ततः स प्रयतो भूत्वा मम तात युधिष्ठिरेत्येतत्पर्यंतं उपमन्युरुवा षि
च॥ ब्रह्मप्रोक्तैरृषिप्रोक्तैर्वेदवेदांगपासंभवैरित्यारभ्य सहस्रनामस्तोत्रं॥ ॥अ १०॥
स्य श्रीशिवसहस्रनामस्तोत्रस्य उपमन्युरृषिः अनुष्टुप्छंदः सकलपातकोपपात
कमहापातकहारी हरो देवता चतुर्वर्गप्राप्तये श्रीशिवप्रीत्यर्थं जपविनियोगः॥

॥न चायमपि प्रस्ताव एव कुतो न स्यात्। स्थिरः स्थाणुरित्यारभ्यैव स्तोत्रतास्तु। सत्यं।
पूर्वोपक्रमस्य युधिष्ठिरप्रश्नार्थत्वानापक्षीणत्वादन्यं तव्यवहितत्वेन बहिरंगत्वाद्बुक्
लग्रंथत्वाश्चोपमन्युरुवाचेत्यत एव सहस्रनामाध्ययनं। स्थाणुं स्तोष्यामीत्युत्तमपुरु
षप्रयोगात् पूर्वश्लोके वासुदेवेनाप्यागादि। ततः स प्रयतो भूत्वा मम तात युधिष्ठिरेत्या
तस्य स्तोत्रस्य प्राणेतृपरंपराकथनमप्यत एव। माध्यन्या सोऽपि स्तोत्रविषय एव।
उपसंहारिप्यशेत्तर सहस्रं तु नाम्नां शर्वस्य मेरुप्रिय इति॥ यदि स्थिरः स्थाणुरित्यारभ्यैव
पूर्वोविधिः यः स्यात्तर्हि येन ब्रह्मादयो देवा इत्यारभ्य फलश्रुतिरप्यनर्थिका स्यात्।
तच्चानुपपन्नं सकलशिष्टाचारविरोधात्। किंच। एवं सति स्वाध्यायाध्येतव्य एतस्य वे

दन्नागस्याप्याध्येतव्यता[illegible]त्।घृतकुल्यामधुकुल्येत्यादिफलश्रवणात्।अध्यायसमाप्ता
वप्यत्रांतु सहस्रनामाध्याय इत्यपि लिंगं।तस्मादुपमन्युरुवाच ब्रह्मप्रोक्तैरृषिप्रोक्तै
रित्येव तत्पर्यवसानं न।म्नां सहस्रं तदध्येतव्यं।यद्यत्र मूलन्तूनार्थप्रतीतौ सत्यामर्थि
कार्थः प्रतिभाति तथापि शाब्द एवार्थोऽवगाह्यः।ननना र्थिकार्थनसांकार्यं।अत्र पुल्लिं
गनिर्देशाद्देशो देवः।स्त्रीलिंगनिर्देशो देवता।नपुंसकलिंगे दैवतं इति द्रष्टव्यं॥यथ
द्वा।ईश्वरः शक्तिः शक्तिमद्वतोरभेदात् ब्रह्मेति यथासरवं।यद्वा।आर्थैक्य नामा
दानामेकोऽर्थभेद इत्यत्रापौनरुक्त्यं।नाम्नामेव सहस्रं न वर्थानां यत्रार्थभेदस्तत्रा ॥११
र्थद्वारा नामभेद एवान्नावत्।तथा मस्तु नामकोयमाग्रहः प्रायेण तु ताद्दशा जनानोप

लभ्यं।तन ह्येवं सति पूर्णाद्वैते सत्यामपि न भविष्यतीत्याशंकायाः परिहार इति वा
च्यं।श्रुतिसमान बादरायणवाक्यादेव एतत्स्वभावस्य प्रतीयमानत्वात्।नो चेद्यागादा
वपि निरंकुशा प्रवृत्तिर्न स्यात्।विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यादि व्यवाछ
द्यानादन सार्थकता प्रवेदांतशास्त्रे प्रतिपादिता।।योगिनः परमाणून् पश्यंतीत्येतावता
किमस्मन्नयनयोराशालोकापेक्षया न भवेत्।आलोकमात्रेण पटुनेत्रो कुटिति रूपं गृ
ह्णातीत्येतावता मंदनेत्रस्य किमुपनेत्रोपादानेनं व्यर्थतां भजते।किंवानेन स्तोत्रेण धं
र्मोत्[illegible]त्तौ धर्मस्याधर्मनिवारकत्वेनाधर्मस्येश्वराविर्भावप्रतिबंधकस्य निवृत्तौ भवेदे
व पुरुषार्थः।आवृत्तिरसकृदुपदेशादिति न्यायाच्च।उपमन्युरुवाच।मन्युः क्रोधकारण

सोऽनिशमपि सत्यपि यस्य समीपमागछति परं त्वन्नं पराप्नवितुं न शक्तः। तर्हि त्वमागछति तदा
पित्र्याः। एकमुपमन्युं विहाय सर्वाणि क्रोधकारणानि मिलितान्येवमभवंति। तथाऽस्य
गुरुसेवां कुर्वतो लिह्यमानस्य वत्सफेनमात्रादपि निवारयतो गुरोश्चरणकमलन्न किंचि
द्व्यभिचरितायेन चार्कपत्रभक्षणेऽद्वंधीभूतेन श्रीगुरुनिदेशमंतरेण देवताराधनं न कृ
तं तदाश्विनोः स्तुत्या दिव्यनेत्रोऽजनि। इयं कथा भारताद्यपर्वणि प्रसिद्धा। अन्यदपि
वे तच्चरितं। यद्वा। मन्युस्तमाविवेश वा। धौम्याग्रज उपमन्युः कदाचिन्मातुलाश्रमे दुग्धं पीत
वान्। स्वाश्रमगतो बालत्वान्मातरं दुग्धं याचते स्म। माता च बीजानि पिष्ट्वा प्रादात्। ततो ॥१२
क्तं। जननि नेदं दुग्धं। ततो मात्रोक्तं पुत्र कुतोऽकिंचनानां गृहे दुग्धं भवेन्मा रुष्ठा। श्रीम

हेरंबप्रसादाद्भवदिति श्रुत्वा मातरं सांत्वयित्वा शिवप्रसादाय महत्तपस्तेपे। ततः
शक्ररूपधरो रुद्रः समागतः वरं वृणीष्वेति तेनोक्तं कस्त्वं वराको मदीयः स्वामी पा
र्वतीनाथ एव ततः शक्ररूपेण रुद्रेण भर्त्सितः तदोपमन्युश्च कोपशक्रं ज्ञात्वा भस्म
मुष्टिं विक्षेप। स्वामिना सौम्यधारणया निवारितः ततः प्रसन्नेन चंद्रचूडेन रूपं दर्श
यं यित्वा क्षीरसागरे गाणपत्यं च दत्तमित्यद्देशमात्रमिति कथा शिवपुराणेऽस्ति॥ स्थिर आदित्य
इति प्रसिद्धं नाम॥ ननु सत्त्वनामादौ स्थिर इति यदुक्तं तत्किमादौ किं विद्याच्यमिति न्या
यन्... वास्ति कश्चिद्विशेषः सत्यमादौ किं विद्वत्कव्यमिति न्यायस्तु स्थाणुरित्यारभ्यै
व स्थिर इति नाम्नोऽस्ति स्व... ल्पाहिन वाद्यादौ ग्रहणं। ननु कस्यास्यादिंतव्यमिति चे

रु:

नाश्रुणुकानि चिन्नानामानि स्वरूपमात्रपराण्येव। सत्यज्ञानंद इत्यादीनि कानिचित्तु गुण
वर्ण[illegible]पराणि यथा गोरश्यामस्त्रिनयन इत्यादीनि कानिचित्तु पुनः कर्म्मप्रकाशका
नि यथा त्रिपुरहरोंधक[illegible]पुरित्यादीनि स्वरूपबोधकान्यपि निर्गुणसगुणभेदेन द्विधा
। तत्र सार्विषांनाम्नां स्थिर इत्यभिधानोपजीव्यत्वेन पश्चाद्भक्तिः तद्यथा गगनमंडलवा
युमघादियातायातपि गगनस्य स्थिरत्वमेवं सर्वप्रपंचयातायातेपीशः स्थिर एव।
रि यद्वा। स्थिरः सर्वदेशविद्यमानत्वेन व्यापकत्वात्तु स्थिरत्वं। सर्वकालेऽपि स्थितिरिति
स्थिरत्वं। वस्तुमात्रेपि तथा तत्र देशकालवस्तुपरिच्छेदाभावो वेदांतशास्त्रे निरूपित उ ॥१२
क्तो भवति। यद्वा। जीवमात्रमुपाधिपरिच्छिन्नत्वात्पात्रांतर्गतजलप्रतिबिंबितचंद्र इव सं

सारचक्रपरिभ्रमणेन स्थिरं न भवति। भगवांस्तु गगनमंडलावलंबीचंद्र इवावदा
तः स्थिरानवीचीभिरिशं दोलितोऽनवदातो भवतीति स्थिरत्वं। यद्वा। दक्षप्रजापति
ना यागसमाये सकलदेवसभायां तिरस्कृतोऽपि नाज्ञानमात्रं तस्यां दशायां ज
नितमिति स्थिरत्वं। यद्वा। कामेन ब्रह्मादिषु पराभूतेष्वपि नायं स्मरपराभूतिं प्रा
प्तवानिति स्थिरत्वं। यद्वा। श्रीविष्णुनापि लिंगं चालयितुं न शक्यमिति स्थिरत्वं। यद्वा।
गृहीतमपि कालकूटं विकृ[illegible]ज्ञानजानइति स्थिरत्वं। तथा च कथं स्थाणुः स्थिरत्वादेव
। कथं भानुः। स्थिरत्वादेव। कथं भानुः स्थिरत्वादित्यादि पुरः स्थितानां नाम्नां स्थिर इ
त्यस्य मुख्यत्वं। अग्रे स्थिरश्च स्थाणुरेतद्व्यतममर्थमादाय व्याख्यां करिष्यामः। स्थाणु
रुध्र

रित्याऽऽकाररूपइत्यर्थः। स्थाणुः कूर्म्मा। त्र्यष्टिरिति रामप्रशास्तौ। स्थाणुरुद्रउमापतिरि
त्यमरः। यद्वा। विरंचिविनोक्तं रुद्रंप्रति। प्रजाः सृजेति। ततो रुद्रेणोक्तं। मदीयगण
व्यतिरेकेणायसृष्टं तत्कृतामरणवर्जितं तन्नवतितन्नसृष्टिव्यापारान्निवृत्तोऽतए
वस्थाणुरियंकथादित्यपुराणेऽस्ति। प्रनुरिति। प्रनवतीति प्रनुः प्रोपसर्गपूर्वक
स्यनुवातेऽत्र सामर्थ्यवाचकत्वात्समर्थइत्यर्थः। तच्च सामर्थ्यमनेकधा तत्राधुनासाम
र्थ्यमात्रमुक्तमुत्तरत्रास्मिन्नेवनाम्नि विषयविशेषेण सामर्थ्यं निरूपयिष्यामः। अ
त्र कानिचिन्नामानि स्वरूपगुणकर्मनिर्गुणसगुणात्मादनशिवपराणि कानिचिद्वि ।।१६
भूतिपराणि कानिचिच्छिवकलाबोधकानि शिवांशबोधकानि। एवंसत्यपि योगवृत्त्याय

थामतित्वगवत्परत्वेन व्याख्यानंकरिष्यामः। त्वानुरिति। श्रीमहादेवस्याऽष्टमूर्त्तिघातुस्त
र्याऽप्यकामूर्त्तिरिति त्वावः। णुस्तुतौ। धातुनाधाचार्यालक्ष्यात तन त्वायाः तुः स्तुतिः यस्या
स्तोत्वानुः कांत्याऽयामवस्तुत्यइत्यर्थः। त्वानीतिवा त्वानुः। नततूस्त्रर्यइतिश्रुतेः। यद्वा। त्वानुर्य
थाजलपात्रप्रतिबिंबिता नानावत्वासता तथायमपि परमात्मा नित्यैकरूपोऽपि नानावत्वास
तइति त्वानुः। प्रवरइति। प्रकृष्टोवारायस्मादिति प्रवरः। प्रकृष्टानूत्तकत्वेन वृणातीति वा। व
रदइति। वरंददातीति। अन्येषां तु वरदत्वं श्रीचंद्रचूडकृपया निरंकुशं वरदत्वमात्रेवसंत्व
तीक्ष्णत्वः। यद्वा। वारात्वक्तः अवरोऽन्तकः नेद्यातिखंडयति द्यातिलुनातीति वा वरंदक्षिणां
ददाप्रेयजमानरूपेणेति वा। आदित्यपुराणेक्तनगीरथवरदानेन वा वरदः। गंगानयन
नाअवरः। अस्य विष्णोर्वारायस्मात्सावरः। अथवा नविद्यतेवरायस्मात्सदासर्वोत्

२–६ रुध्या

इदंनामार्थत्वेदेनाहृत्तंत्वविष्यति। सर्वात्मेति। सर्वस्यात्मा। सर्वशरीरेनाधस्त्वंविश्वमुच्यते।
तस्यात्मेति। सर्वाधिष्ठानत्वमुक्तंभवति। आकारविरजतस्य। सर्वविख्यातइति। सर्वस्मि
या क ल्लोके ख्यातःप्रसिद्धइतियावत्। लोकेयथाईश्वरःकर्तेति। किंबहुनाकारवोपियंवि
श्वकार्मत्युपासतइतिवरप्रसिद्धिस्तुनमास्तरुद्रमन्यवइत्यादिषु। सर्वकर्मकरइति। सर्वा
णिकर्माणिजीवांतर्यामिरूपेणकारानीति। यद्वा। सर्वाणिपालनादीनि। भवइति। अभवइ
तिवा। सर्वकर्मकरत्वेपिनास्तियस्यसंसारइत्यर्थः। जटीति। जटाधारणेनतापसाग्रणीत्व
मुक्तं। चर्मीति। व्याघ्रपदानुपादानपिचर्मव्याघ्रस्यात्रग्राह्यं। यद्वा। चर्मखेटकंयस्यास्ति।
शिखीति। शिखीवह्निस्तद्वान्। तृतीयलोचनेनतत्त्वशानुंधत्तइत्यर्थः। खड्गीति। खड्गःप्रसिद्धः ॥१५
तद्वान्। सर्वांगइति। सार्वश्वंगंस्वरूपंयस्य। सतथा। सर्वंवस्तुशंकरस्वरूपेणेवराजतइत्यर्थः।

सर्वभावनइति। सर्वान्भावयतिसंभावयतीति। पितायथापत्यानिसंभावयति। तथायमपीत्य
र्थः। हरिरिति। हरतिस्मरणमात्रेणपापमिति। यद्वा। हरिणानारायणेनेक्यमुक्तं। हरिणाक्षइ
ति। हरिणस्याक्षीइवाक्षीयस्यसतथा। नाकवलेतृतीयलोचनस्यविकटत्वात्। विकटावलोक
नाभवकिंतुमृगनयनःसुंदरापिभवानीपतिरित्यर्थः। सर्वभूतहरइति। सर्वाणिभूतानिहर
तीतितथा। किंविद्भूतहरत्वंतुदैत्यादिदलाननश्रीनारायणप्रसिद्धं। प्रलयकालेभूतमात्रसंह
र्तृत्वमत्रैवनान्यथेत्यर्थः। प्रभुरिति। प्रकृष्टंभवत्यस्मादितिप्रभुः। प्रकृष्टंवस्तुप्यनलभ्य
तइत्यर्थः। प्रवृत्तिरिति। श्रुतिमार्गोद्विधा। प्रवृत्तिबोधकानिवृत्तिबोधकश्च। तत्रप्रवृत्तिबोध ॥
कावाक्यप्रवर्तकिःकर्मकांडप्रवर्तकइत्यर्थः। क्रिययाकर्तृलक्षणा। एवंनिवृत्तिरपि। एतयो
रुक्तहेतुलिंगत्वेनस्त्रीत्वंनविरुध्यते। नियतइति। प्रागभावाप्रतियोगी। शाश्वतइत्यनेनध्वंसा

प्रतियोगी वा को भवति। भव इत्यनेन संसर्गाभावप्रतियोगित्वमुक्तं। तेन नामत्रयार्थस्य न
क संबंधः। यद्वा। भव इत्यानंदसमुद्रोद्भूतनानारत्नेषु नारायणप्रमुखैर्देवैर्गृहीतेषु काल
कूटं गृहीत्वापि नास्त्रयया च बालेति। श्मशानवासीति। श्मशानं नाम पातालतले संकर्षण
ज्वालया त्रिलोक्यां भस्मीभूतायां यावत्स्थानं भुवनस्य तदुच्यते। तत्रैव एकैव क्रीडति सः॥
यद्वा। श्मशानं प्रलयदशापन्नं विश्वं वासयति स्रष्टुं व्यक्तीकरोतीति। श्मशानं नाम महा
श्मशानं वाराणसी तत्र सदा वर्तमानः श्मशानवासीत्कथ्यते। भगवानिति। भगं विद्यते य
स्येति भगरूपिण्या लिंगं धृतं इति भगवान्। यद्वा। उत्पत्तिं च विपत्तिं च भूतानामागतिं गतिं। वे
त्ति विद्यामविद्यां च स वाच्यो भगवानिति स्मृतः। उत्पत्त्यादिवत्त्वाद्भगवान्। खेचर इति। खश ॥१९
ब्देनाकाशं। आकाशस्तल्लिंगादिति सूत्रात्। सर्वाणि ह वा इमानि भूतान्याकाशादेवोत्पद्यं

ते। आकाशः परायणमिति छांदोग्यश्रुतेः स्थानवच्छिन्नचिदानंद उच्यते। तत्र चरति गच्छति
प्राप्यार्थ इत्यर्थस्य प्राप्तपरानंद इत्यर्थः। यद्यपि परानंदादेतस्य वास्तवा वा न भेदस्तथा
पि राहोः शिर इतिवदुपचारेणापि त्वयोग उपपन्नः। यद्वा। खं नाम हृदयाकाशं। अस्मिन्
ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यमिति श्रुतेः
का तत्र हृदयाकाशाध्ययचेन वर्तमान इति। यद्वा। खबाह्याकाशे चरति त्रिपुरवधार्थमिति खे
चरः। अगारारोद्भव इति। न विद्यते कस्य विद्विषयीभूत उद्भवः प्रकटीभावो यस्येति
ते॥ यद्वा। अस्य विष्णोरगारात् विषयीभूत उद्भवः अभिव्यक्तिर्यस्येति। हरिरेवास्य
प्रकटीभावं वर्तिनान्य इत्यर्थः। अनिवाघ इति। अनिवाघो नाम न नमस्करोति यः अथवा २०
भिवाद्यः सर्वव्यवहारगोचरः। न एणमेको गम्यास्त्वमसि पयसामर्णव इवेति पुष्पदंतवचना

नु। महाकर्मेति। महत्कर्म यस्य स महाकर्मा। कर्मणां महत्त्वं च ब्रह्मेंद्राद्यशक्यत्वं। न विद्यते
कर्म यस्यासावकर्मा। एतेन कर्ममात्रालिंगत्वमुक्तं भवति। तपस्वीति। पार्वतीपरिणयता
र्थं कं प्रश्चरितं तेन तपस्वी। भूतभावन इति। भूतानि चेतनानि भावयति संभावयतीति त
था। पूर्वं सर्वसंभावनमुदितमिदानीं चेतनसंभावनमित्यपौनरुक्त्यं। ब्राह्मणपरिव्राज
कन्यायेन। उन्मत्तवेष इति। उन्मत्तस्येव वेषो यस्य। स च वेषः भस्मजटाव्याघ्रचर्म
सर्पमालाब्रह्मकपालादिरूपः। अत्रोन्मत्तस्येव वेषमात्रमुक्तं न तून्मत्तत्वं॥ तथा च पुष्पदं
क त। नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति। यद्वा। उन्मत्तं कनकपुष्पं तद्वत्काषायो यस्य।
धंतूरपुष्पवद्वस्त्र इत्यर्थः। यद्वा। उद्गतः मत्तो वेषो यस्य स तथा। स्वात्मारामत्वात्। प्रच्छन्न इ ॥१७
ति। स्वीयं सहजप्रकाशानंदैकघनरूपं तदाच्छादकवर्तमानत्वात्प्रच्छन्नः। पूर्वं दिवासुरसं

प
ग्राममदित्यन्नैरान्वृते देवैर्नंदिकालीशरणं प्राप्तैः। तस्याः प्रसादात् श्रीमदेवरारूपं विलो
कितं। तच्छ्रयाहरं विदांतविद्यं मारमार्थिकं तदेव धृत्यविरक्ता देवाः साधनचतुष्टयं प्राप्ता :
संतः सर्वविरतव्यापारा बभूवुः। ततस्तामासो दैत्यैः सर्वमाक्रांतं। ततः श्रीनारायणो
महद्रां तुष्टाव। सा स्तुतिर्ग्रंथगौरवभयान्नोक्ता॥ स्वामिन्नयत्न्यैव वाक्यं यत्तव श्रवणादिनव
विधां भक्तिं कुर्वाणाः संसारसागरं गोष्पदमात्रं करिष्यंति। तदर्थं भजनियतो भवानेव स
र्वलोकानात्मरूपं दर्शयिति। ततो भवानीपात्वदीयरूपाविर्भाव कोविलंबामोद्भव
वत्॥ ततइदं याचे तव रूपं गोपाय मदीयमहिमानं वर्द्धय। नात्वन्यैव वस्तुता वद मर्यादा
विघाता भवति। लोकसंग्रहार्थं त्वमपि मदीयं नाम गृहाण। ततो भक्तवात्सल्यतया तथा च

कारगिरीशः। निजरूपं भस्मधारणादिबाह्यरूपेण पामराणां चित्ते प्रछन्नं भवति। त
तः संसारसृष्टिपरंपरायै नारायणप्रार्थनया प्रछन्नरूपः समजनि। इयं कथा स्कांदपुरा
णे प्रसिद्धा॥ यद्वा। देवाः शंकरं द्रष्टुमागताः तदा देवानां ज्ञानमपहृतं। शिवेनांतर्हितं
स्वरूपस्य हृतमिति प्रबन्धः। इयं कथाऽदित्यपुराणप्रसिद्धा। सर्वलोक इति। सर्वं लो
कयतीति तथा। सर्वसाक्षीत्यर्थः। प्रजापतिरिति प्रजापतिरित्यनेन वेधसैक्यरूपेण कथ
नं। यद्वा। प्रजापतिरप्ययमेव। ब्रह्मणस्तु प्रजापतित्वाद्वा। नानेन दक्षो मुख्या यामेव।
प्रजापतिरित्यर्थः। महारूप इति। महांश्चासौ स्वरूपश्चेति। अरूपमस्पर्शमगंधमिति श्रु ॥१८
तेः। यद्वा महद्रूपं यस्य। रूपं रूपं प्रतिरूपो बभूवेति श्रुतेः। महाकाय इति। महान् कायः

शरीरं यस्य महत्कं सुखं अयनं प्राप्नोतीति तथा। सकलसुखाधिष्ठानमिति यावत्। स
र्वरूप इति। सर्वं रूपयति प्रकाशयतीति तथा। सर्वप्रकाशक इत्यर्थः। तथा च श्रुतिः। न त
त्र सूर्यो भातीति। सर्वाणि रूपाणि अस्मिन्निति वा। नानारूपधर इत्यर्थः। महायशा इ
ति। महद्यशः शरणागतवज्रपंजरताजन्यं यस्यासौ। यद्वा। महन् आया येषां ते महायाः
ः शतक्रतुप्रमुखा महाभाग्यनिधानानि तानिंद्रादीन् शास्ति वा शास्त्रापन्नीयनीति तथा
। सर्वात्मेति। सर्वमात्मनि यस्यासौ तथा। पुरुष एवेदं सर्वमिति श्रुतेः। सर्वरूप
इति। सर्वरूपः प्रपंचाधिष्ठानरूपत्वात् विचार्यमाणं सर्वं निःस्वरूपादन्यत्वेन निरू
तुं न शक्यत इत्यर्थः। यद्वा। श्वेतो रक्तस्तथा नीलो निच्चांजनचयोपमः। सर्वरूपध

रोरुद्रोदृष्टा।त्वा हरिनाननइति शिवपुराणप्रोक्तसर्वरूपत्वंज्ञेयं।विरूपइति।वस्तुतो
रूपरहितइतियावत्।अरूपमित्यादिश्रुतेः।यद्वा।विधातामानसासनकादीन्प्र
यायाज्ञापयामास।त्वत्पुत्राः प्रजाःसृजत।ते ऽब्रुवन्।किंप्रजयास्माकमात्मत्वंब्रू
हीति।ततो हरिस्मरणात्तेन साक्षाद्दाविर्भूतेन हरिणापि तथैवाक्तं जनकाज्ञां पालय
तात दाज्ञामपि न कृतवंतस्तेमहेशांसमृतवंतः।एकाकीनिःस्पृहः शांतःपाणिपात्रोदि
गंबरः।कदाशंभोभविष्यामि कर्मनिर्मूलनक्षमइति तान्प्रपन्नान्विज्ञाय हंसरूपीश्री
चंद्रचूड आविर्भूतैं यतानुपदिदेश।इयंकथापद्मपुराणे प्रसिद्धा।अतएव विःपक्षी हं ॥१९
सस्तद्रूपइतिभावः।वामनोबटुस्तद्रूपइत्यर्थः।पार्वत्यांतपःकर्त्तुंप्रवृत्तायांतपसासं

तुष्टः श्रीरुद्रो बटुरूपंधृत्वास्वीयंस्वरूपंनिनिंद पश्चात्पार्वत्याःपरितापंज्ञात्वाभगवा
न्संतुष्टआसीदियंकथा शिवपुराणप्रसिद्धा।विभुरिति।व्यापकइत्यर्थः।लोकपाल
इति।लोकान्पालयतीति तत्र तेन यमस्यापि यमइत्यर्कं भवति।लोकान्पांतिरक्षंति
तिलोकपाइंद्रादयस्तानासमंतादात्मीयत्वेनगृह्णाति।अंतर्हितात्मेति।अंतर्हितआ
त्मास्वरूपं।यस्य।भवान्याद्धांगिन।निजरूपंअंतर्हितमित्यर्थः।अंतर्मध्येहितकारीआ
त्मायस्येतिवा।बाह्यतउग्रःअंतराशिवइत्यर्थः।अंतरित्यंतरंगाणांहितकारीयस्यात्म
तिवा।प्रसादइति।प्रसादकर्त्ता धार्मिणाधर्मिणोलक्षणा।हयगर्दनेति।हयनामाकश्चि
द्राक्षसउग्रंतपस्तेपे।प्रसन्नः श्रीमाहेश्वरं वरंवृणीष्वेतिनेनोक्तंममभृत्यकनीकनापि

राक्षसशरीरस्य भवनीति। ततः श्रीकृष्णेन क्रमस्तु तथापरं विदंतव शरीरं रूपांतरं प्राप्य
तीति तज्जन्म ततः श्रीचंद्रचूडे कस्मिंश्चिद्दिने भवान्या क्रीडति निर्नर्यस्त्वद्दर्शनार्थं गतस्ततो
लज्जितया भवान्योक्तं गर्दभो भवेति तद्दिनं हयगर्दभमित्याचक्षते। यतो हयागर्दभो
ह्वलस्वह्वनं यास्यति। पवित्र इति। पूत इति यावत्। यद्वा। पविः संसारवज्रं तस्मात्त्रायत
इति पवित्रः। पं पापं तस्माद्विशेषेण त्रायत इति वा। महानिति। निरंकुशमहत्त्वमत्रैव नान्य शं
त्रेत्यर्थः। यद्वा। अनः प्राणनं। महांश्चासावनश्च महान्। महत्तरं जीवनमित्यर्थः। नि
व यम इति। नियच्छतीति नियमः। स्ववशकर्त्तेति यावत्। भीषास्माद्वातः पवत इति श्रुतेः ॥२०
। नियमप्रिय इति। नियमनं नियम इंद्रियाणां विषयेभ्यः परावृत्तिः सा प्रिया यस्य। ए

तदुक्तं भवति। य इंद्रियारामास्ते श्रीशिवरूपं बद्धुं न शक्नुवंति। आत्मारामा ईशानं बद्धुं
समर्था भवंति। सर्वकर्मेति। सर्वाणि कर्माणि यस्य सः। तथा। येन प्रेरितानि सर्वाणि क
र्माणि चरंति नान्यथा। पूर्वं महाकर्मेत्यत्र कर्मणां महत्त्वमुक्तमिदानीं तु सर्वकर्मप्रेरकत्व
मिति न संकरः। यद्वा। सर्वाणि कर्माणि भगवतैव कृतानि न तु स्वातंत्र्येण जीवकृतानि। य
स्मात्त्वं कुरुते किंचन न कर्म क्रियत इति श्रुतेः। स्वयंभूरिति। भूः सत्ता सा स्वयमिति स्वतः
शुक्ति सिद्धा न तु परप्रयुक्ता। यथा शुक्तिका सत्तामुपजीव्य रजतं सदिति व्यपदिश्यते न तथा
किंतु शुक्तिवत्परमार्थसतीत्यर्थः। आदिसृष्टिकर इति। यद्यपि ब्रह्मादीनां सृष्टिकर्तृ
त्वमास्ते तथाप्यादिसृष्टिकर्तृत्वमीश्वरस्यैव तथा च श्रुतिः। यो वै ब्रह्माणं विदधाति पूर्वं

मिति। निधिरिति। महापद्मश्च पद्मश्च शंखो मकरकच्छपौ। मुकुंदकुंदनीलाश्च खर्वाश्च निध
यो नव ते निधिरूप इत्यर्थः। सहस्राक्ष इति। सहस्रमक्षीणि यस्यासौ सहस्राक्षः। अनेका
र्थः। यद्यपि पश्यत्यचक्षुरिति श्रुत्या नाक्षीणि संभवंति तथापि नानाविषयकमेकं ज्ञानं वि
द्यत इति विषयानंत्येन ज्ञानानंत्यमुपचर्यते। पुरुषसूक्ते सहस्राक्ष इति च। विरूपाक्ष इति
विरूपाणि विषमसंख्याकान्यक्षीणि यस्य स तथा त्रिनयन इत्यर्थः। यद्वा। विरूपाणि वि
शिष्टरूपाण्यक्षाणींद्रियाणि यस्य स तथा। विशिष्टरूपत्वं तु पंचवक्त्रं दशभुजं त्रिलोचन
मित्यादिध्यानकामेंद्रियपरतया। सोम इति। अष्टमूर्तित्वाद्भगवतः। सोमापि तन्मू ॥२१
र्तिरिव। उमया सह वर्तत इति सोम इति वा। नक्षत्रसाधक इति। नक्षत्राण्यश्विन्यादीनि

श्लोऽयं तमसा चैतन्मात्रशास्त्यतिष्ठति स्वयं विद्धि नए। वं ग्रहपतिरिति। ग्रहाणां नवानां पतिः स्वामी नक्षत्रेशो वै ३८
।ताराश्च नाम्ना सौ साधका न तु बाधकः। दक्षयज्ञविध्वंससमये सती प्रतिपक्षन्नूतास्तान्लगिन्या
अबलाचानेहना इत्यर्थः। यद्वा। नक्षत्रसाधकः क्षत्रियघातकः। यदा सहस्रार्जुनादयो दृप्ताः क्षत्रिया
अजवन् तथा रामाय समयोः शास्त्रविद्यां दत्वा क्षत्रियाः सर्व एकविंशतिवारं घातिताः श्रीरुद्रेण। चंद्र
सूर्यगतिरिति। चंद्रसूर्ययोर्गतिर्यस्मात्। नक्षमनं तु श्रीमाहश्याङ्ग। येव नान्यथेति। त्रीषाद सूर्य
इति श्रुतेः। यद्वा। चंद्रसूर्यशब्देनेडापिंगले उच्येते। तत्र गतिः रूपलब्धिर्यस्य। एतेन सुषुम्ना
यां प्रकाशत इत्यर्थः। केतुरिति। केतुवत्केतुः सर्वोत्कृष्ट इत्यर्थः। केतूदये यथा नानोत्पाताः संजा
यंते तथा प्रतिकूलेस्मिन्नुत्पातमात्रे न भवतीत्यर्थः। ग्रह इति। गृह्णातीति ग्राहो राहुः स्वसाम
श्री र्थ्येन चंद्रसूर्यावप्याच्छादयति तथा प्रतिकूलतां प्राप्य ग्रहा वर्तंत इत्यर्थः। वर इति। वं अमृतं राति आ
दत्ते। सो वरः। अमृतादानकरः। यद्वा। वं उदकं गंगारूपं राति गृह्णाति जटायामिति वरः। अदरिद्रा
लय इति। न दरिद्रा अदरिद्राः दारिद्र्यं नाम परमात्मगुणश्रवणादिव्यतिरेकेण केवलविषयासक्त

त्वंनइहिताःपुरुषाःश्रीत्त्ववानीपतिचरणपरायणाःतेषामालयंस्थानंयात्वेति।वा।यद्वा।दरिद्रंना
द्व मनदर्थमं दारिद्र्यंनदन्नावःनदालयोयस्येत्यनेनधर्मार्थकामामाक्षपुरुषार्थचतुष्टयाद्दारिद्र्यंयस्मि
काटनास्तीत्यर्थः।यद्वा।दरिद्राडुर्गतावितिधनोःप्रायागान्मृत्युरवडुर्गतिःमृत्योःमृत्युमाप्नोति
यइहनानेवपश्यतीतिश्रुतेः।डुर्गतिहेतुर्न्नेददर्शनं।तथाचान्नेददृष्टिमनामासमंतालयायात्र
ति।अयंन्नावः।नावसंसारचक्रेपरिभ्राम्यतिजीवोन्नयंचाप्नोतियावदस्याद्वैतदर्शनमद्वैतसाक्षा
त्कारवलीयतएवब्रह्मणीति।द्वितीयाद्वैत्तयंत्तवनीतिश्रुतेः।त्तयंद्वितीयाभिनिवेशतःस्यादि
तिस्मृतेः।कर्त्रेति।निरूपपदकर्तृषाद्दापादानाडुत्पत्तिमन्मात्रस्यकर्त्ता।तथाचश्रुतिः।यतोवाइ
मानिभूतानिजायंतइतिजन्माद्यस्ययतइतिसूत्रंच।क्षित्यादिकंसकर्तृकंकार्यत्वाद्घटवदित्यनु
मानं।मृगबाणार्पणइति।मृगयइमृगबाणमर्पयतीतितथा।अनघइति।अघशब्देनजीवधर्मा ॥२२
उच्यंते।तइहितत्वादतिशुद्धःपरंत्वंपापंतइहितइतिनव्याख्येयं।तस्येश्वरेप्रसज्यप्रतिषेधा

संत्तवान्।महातपाइति।महत्तापायस्मात्।यतईश्वरात्तपासोल्पस्यापिमहत्त्वंत्तवतीतिमहा
तपाः।दीर्घतपायस्येतिबहुतरकालंयस्तपश्चरतिकयाचनलीलयानरनारायणरूपावि
ष्णुः।अदीनइति।नदीनोऽदीनः।दैन्यंनामपारतंत्र्यंतदत्रसर्वथानास्ति।अथवा।अनुसानत्य
गमने।अतनीत्यत्।क्षिवंतंनिरंतरसंसाराडुद्धर्त्तेत्यर्थः।दीनसाधकइति।दीनंसाधयतीतिंतथा
।दीनस्यश्रवणादिसाधनदायकइत्यर्थः।संवत्सरकरइति।अत्रसंवत्सरशब्दःकालमात्रोपल स
क्षणार्थः।तेनकालस्यापिप्रवर्त्तकः।कालस्यवशेसर्वेसकालोयद्वशइत्यर्थः।मंत्रीति।मंत्रा
यत्प्रकाशनरूपाविद्यतेयस्य।अथवा।नानागमनिर्मातृत्वेनमंत्रसंप्रदायप्रवर्त्तकत्वान्मंत्री
त्युच्यते।प्रमाणमिति।मंत्रायुर्वेदवच्चतत्प्रामाण्यमाप्तप्रामाण्यादितिन्यायसूत्रात्।तत्प्रमा
वा णंशिवइतिप्रमाणकरणत्वाविपिनित्यप्रमाश्रयत्वात्प्रमाणंमहेशइतिगौतमीयाःपरमइति।
पराग्न्नष्टामाथौमायाशक्तिर्यस्यसपरमःसर्वोत्कृष्टशक्तिमानित्यर्थः।परममितिपाठपरमंप्र

माणमितिप्रमाविशेषणं। तेनपरमंतपः उग्रकष्टतापरूपंइत्यर्थः। तस्मिन्पद्मे गंगानीरा। बलवाह
नइत्यत्र गंगानीरवाहनोबलवाहनइतिनामद्वयंज्ञेयं। योगीति। यमनियमासनप्राणायामप्रत्या
हारधारणध्यानसमाधिरूपाष्टांगयोगाधिष्ठात्रीदेवतेत्यर्थः। याज्यइति। यष्टुंयाग्यायाज्यः
। शनकश्वादिरूपेणायमीशइवज्यतइतिबोद्धव्यं। महाबीजइति। महत्बीजंजीवचैतन्या
विर्भावलक्षणंयस्यासतथा। अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रु
तेर्जीवचैतन्याधायकईश्वरएव। महारेताइति। महद्दुःसहंरेतोवीर्यंश्चिकाख्यंयस्यस
तथा। यदीयंरेतोवैश्वानरेणापिसोढुंनशक्यं भुनिल्निरपीनीदमाख्यानंसर्वत्रप्रसिद्धमि
तिनलिख्यते। कदाचिद्भार्गवोदैत्यानुज्जीवयन्प्रमथान्पीडयन्श्रीमहेशेनगीर्णोरेतोरू ॥२२
पेणत्यक्तो। तएवशुक्रसंज्ञामवापेतिमहारेताः। इयंकथास्कांदे। महातपइति। अनुसा

त्यगमनेअतनीत्यतः महत्सुसाधुषुअततिगच्छतीतिमहातः पचाद्यच्तंपातिरक्षतीतिमहा
तपा साधुसेवांकुर्वाणास्वरूपदर्शनेनरक्षतीत्यर्थः। सुवर्णरेताइति। सुवर्णंरेतोयस्येतिसु
वर्णरेताः। सुवर्णंरुद्रवीर्यमितिपुराणप्रसिद्धिः। यद्वा। सुवर्णशब्देनसुष्ठुशोभनेनोद्दीप्यमानो
वर्णोयस्येति। वाविग्रहेवह्निरुच्यते। सवीर्यंयस्य। कृशानुरेताःसर्वज्ञइत्यमरसिंहोक्तेः। स्था
सर्वज्ञइति। सर्वंजानातीतिसर्वज्ञः। यः सर्वज्ञःसर्वविदितिश्रुतेः। क्षित्यादिककर्तृसिद्धावीश्व
रस्यसर्वज्ञत्वमधिकरणसिद्धांतन्यायेनसिध्यति। सुबीजइति। बीजंचैतन्यंवीर्यंवाशोभ
नंयस्यसतथा। चैतन्यसुष्ठुताअप्रतिबंधः वीर्यस्यवाप्रतिघातः। वृषवाहनइति। वृषोवाह
नंयस्यसतथा। यद्वावृषंधर्मंवाहयतिप्रापयतीतिवृषवाहनः। यद्वा। वृषशब्देनेंद्रउच्यते।
वासावावृत्रहावृषइत्यमरः तंवहतीतिवृषवाडैरावणः अनुशासनेतमनितिपचाद्यच्वृष

वाहनः। कस्मिंश्चित्समये शक्रेण दैत्यैः सह संगरेण प्रारब्धे दैत्यैरैरावणे मूर्छां गमिते त
दैंद्रेण श्रीमहादेवस्मरणेन तत्क्षणमेवैरावणो जीवित इति स्कंदपुराणे प्रसिद्धं। दशबाहुरि
ति। दशसंख्याका बाहवोऽस्येति तथा। यद्वा। दशानां लोकपालानां बाहुरिव बाहुस्तत्कार्य
संपादकत्वात्। दश प्राणास्तेषां बाहुरिव बाहुरनेन पुराणप्रसिद्धदशप्राणव्यापारोप्य
नेनैव वर्त्तनीत्यर्थः। अनिमिष इति। सदोन्मीलितलोचन इति जाग्रद्रूपो वा। नीलकंठ इति।
नीलवर्णः कंठोऽस्येति कालकूटधरत्वात्। उमापतिरिति। उमा पार्वती तस्याः पतिः स्वामी। विश्व
रूप इति। विश्वं रूपयति बोधयति स्वगुणगरिम्णा यः स विश्वरूपः। स्वयंप्रभ इति। आत्मनै
व प्रख्यानत्वे न तस्य प्रख्यत्वं केनापि। बलिरिति। पूजोपहाररूपः सर्वात्मत्वात्पूजा इ ॥२४॥
वाणपाप्यतदात्मकान्येन तस्माद्भिन्नत्वेन निरूपयितुं न शक्यं त इत्यर्थः। विरोचन इति॥

विशिष्टा रोचना गुणवर्णना यस्य स तथा विरोचन एव वैरोचनः। स्वार्थेऽण्। नानार्थवादैर
यामवस्तूयत इत्यर्थः। गण इति। नानागणरूपाऽयमेव। नमो गणेभ्यो गणपतिभ्यश्चेति
व श्रुतेः। यद्वा। गणयति सर्वाणीति सर्वज्ञः संख्यां वेत्ति सर्वज्ञत्वादिति भावः। स्कंदहस्त इ
ति। स्कंदो हस्ते यस्य स तथा। महायाज्ञिक इत्यर्थः। ईश्वरसामर्थ्यं विनाऽध्वर्युणा किमपि वे
दोक्तं कर्म न चलतीति भावः। सुरूप इति। सुष्ठु शोभनं रूपं यस्य स तथा। यद्वा सुष्ठु
शोभनं रूपयतीति। यस्य शोभननासा महेशांशाविर्न्नवेन यज्ज्योतिरंतरमृतं प्रजा
स्विति श्रुतेः। तेज इति। तेजःस्वरूपः। अथ यदतः परो दिवो ज्योतिर्दीप्यत इति श्रुतेः। त
जस्कर इति। तेजः करोतीति तथा। तद्देवा ज्योतिषां ज्योतिरिति। तथा च। अस्तमित आदित्ये
किंज्योतिरित्यारन्यात्मैव ज्योतिरित्यत्र ज्योतिःस्वरूपता। सूर्यादिज्योतिःकरत्वं चास्य पवुक्त

मितिभावः। निधिरिति। निधीयते तस्मिन्नलयः सर्वमिति निधिरिति। उष्णीषीति। समयविशेषे भवान्या
क्रीडमाना नानाविधान् धृतवान्। इदं तु कामुकावेषमात्रे बोद्धव्यं। वसुवक्त्र इति। वसुशब्देनाष्ट सं
ख्याऽष्टौ मुखानि यस्य स तथा। कदाचिद्भवान्योक्तं। स्वामिन्नहं त्वद्भिन्न त्वत्समो न कोप्यस्ति। परंतु
ब्रह्मा लोकान् सृजति त्वं तु किमपि न करोषीति न सामर्थ्यं त्वयि विद्यते नात्र त्वन्मम संशयमात्रं प्रति
भाति। त्वं तु ब्रह्मणि समागतेऽभ्युत्थानादिपूजां करोषीति न सौभैर्थ्यैता। भगवान्न किमप्युवाच।
कंचित्कालं प्रतीक्ष्य द्वितीयमात्मना विधासारूपं निर्मितं हंसवाहनादियुक्तं। स ब्रह्माष्टमुखः चतु
र्भिर्वक्त्रैर्वेदान् चतुर्भिः रूपावदांश्च पठति स्म। द्विगुणितपरिमाणान्युपकरणानि परिवारोपि
नानामुनिगणैः परिवृतो द्वारि निषण्णन् भगवंतं स्तवीति। भगवान्स्तु भवान्या रममाण उपह्वानस्म ॥२५
।तदा भगवत्योक्तं स्वामिन्कश्चिदागतोस्ति। तं संभावयेति। भगवतोक्तं। मनाट्टशाः कतिरस
मायांति। तथाप्याकारयेत्यक्रेगणानाकारितो ब्रह्मा दंडवन्नत्वा तुष्टाव। भवान्या पूर्वमवलो

कितो ब्रह्मा न सर्वांनिरुच्छ्वत् क्रुद्धा तस्मान्नदा जगदंबा तुष्टाव महेश्वरं स्तुतिं स्तुग्रंथगौरव
भयान्न लिख्यते। इयं कथा स्कंदपुराणे उत्तरखंडे उज्जयिनीमाहात्म्ये सिप्रातट महाकालेश्वरव
र्णनप्रस्तावप्रसिद्धा। उदग्र इति। उत्कटः। विनत इति। विशेषेण नतो नम्रीभूतः। विगतः नाता
यस्मात् यस्य भक्तः कस्यापि नाता न भवतीत्यर्थः। दीर्घ इति। दीर्घः प्रलंबः महापरिमाणः। हरिन
त्र इति। हरी सोमसूर्यो नेत्रे यस्य। सुतीर्थ इति। सुशोभनं तीर्थं यत्र गंगाधरत्वात्। यद्वा। ए
कदा भीमासनेन बाहुबलदर्पितेन गिरिमूलं चालितं। ततो रुद्रेण सारस्वतकुंडे नैपा
तितः स्त्रीत्वमापन्नः। नानागाकर्णकुंडस्नानात्स्वावयवांश्चिंचाभीमा रुद्रप्रसादयांचका
र। कृत्यापि पुनस्तात रुद्रः समाराधितः पश्चाद्रुद्रेण तस्मै पुंस्त्वं दत्तं। तातारुद्रस्तापसरूप ॥२६
ण प्रच्छन्नः प्रद्रुरासीत्। रुद्रस्य दोषास्तनाक्ताः किं तपास्यादि शास्त्रं खंडितवान्। तथा

पिन्नीमामहेन्द्राराधनात्स्वावयवानां हावनानन्त्वाला। नाता रुद्रः स्वरूपं दर्शितवान्। नीमा रुद्रस्त
पयाराजून्जिग्ये। इयं कथा ब्रह्मांडपुराणे प्रसिद्धा। अतः सुतीर्थः। जगन्नडइति। जगन्नवर्णः। काला
न्तन्त्रमरांजानन्तियादि। श्रृगालरूपइति। जंदिलनामादित्यः कश्चिन्महत्तपस्तेपे। स्वयंभूस्त
स्यप्रत्यक्षोबभूव। वरं वृणीष्वेत्युक्तवान्। सवरं वव्रे। नशास्त्रधरशास्त्रेण। नमुनिशापेन
नपक्षिचंचुपुटेन। नसिंहेन। नगजेनमम मृतिः। शास्त्रेणेत्युक्तेन देवदानवमनुष्यैः। नमु
निशापेनेत्यगस्त्यादिमुनिव्यावृत्तिः। नसिंहेनेति नरसिंहावताराद्भिन्नीतव्यावृत्तिः। न
पक्षिचंचुपुटेनेतिगरुडव्यावृत्तिः। इतितस्याभिप्रायः। ब्रह्मणा तथेत्युक्ते त्रैलोक्यं स्वा
यत्तं कृतवान्। पुरान्नूतादेवाब्रह्माणं शरणं जग्मुः। ब्रह्मणोक्तं मयैवदत्तवरः कथमुच्छेद्यो भ
य वतीतितन्नविचारितंतथा दैत्योपि विष्णुभक्तः प्रह्लादः श्रीनारायणशरणानान्येनापि परान् ॥२६

तः स्तथाहं विष्णुद्वेषेण नयक्ष्यइतिमतिं विधाय विष्णोर्यजनमारब्धं। विष्णुयाज्यपितामसत्या। निर्वाद्धि
श्चंपरान्नवतिस्म। ततः सार्वादेवाविधिपुरोगमाः क्षीराब्धौयत्रन्नगवाञ्लक्ष्मीनाथः। शानतत्रगत्वा
तुष्टुवुः स्तुतिर्विस्तरभयान्नोच्यते। अथप्रसन्नेनभगवतोक्तं। देवाः कथयतकिंकार्यं। नातादैवै
र्यकार्यमुद्दिश्यसमागतं तद्वदादीति। भगवानाह। त्रैलोक्यबाधकोपिहीनजातिरपि दुराचा
रोपियदिमांस्तवातसत्तुरक्षणीयएव। एवंसर्वेदेवाः क्लेशमापन्नादेवगुरुमवलोकयांबभू
वुस्ततो बृहस्पतिर्विष्णुमुवाच। स्वामिन्त्वदीयभक्तोपियदि शिवद्वेष्टा स्यात्तस्यकागतिरितित
तोभगवानोक्तं शिवद्वेष्टुः पूजामहं नगृह्णामि सद्वेषीमन्ये। पंचामृतनाशाणितकालनं चंदनेनामे
ध्यालेपः पुष्पैः कल्पवृक्षस्यापि शस्त्रपातोनैवेद्यमामध्यं प्रदक्षिणाचरणप्रहारः प्रणामः शि
रः प्रहारः स्तुतिर्गाल्यइति। स्तुचाशकपुरोगमादेवाः स्वर्गंगताः संतोबृहस्पतिनामंत्रयां

रु

चक्रुः। ततो देवगुरुणोक्तं। ययारीत्या शिवद्विष्टायां तन्नवेत्त्वा व्रतायं न बाध्यः ततस्त्विजाम
ध्यकं विद्धाह्मणं हनुवादनशिक्षयित्वा यथा तस्य शिवपूजापराङ्मुखतान्नावत्तथाकारितं
। ततस्ततो क्तं दैत्येन। त्वोरुद्विजो यदि विष्णुन्नक्तोहं तर्हि माध्यक्किं शिवयजनेन। रुद्विजादक्षि
णाया क्रीतास्तथा चक्रुः ततो देवास्तवानीपतिं स्तुत्वा विज्ञप्तिं तत्वंतः। स्वामिन्नकः पापिष्ठः त्वां
विहाय यजति देवाधिनाथं श्रीनारायणं तन्न सहामहे। रुद्रआह। अनपराधः सापराधस्त्वा
यदि विष्णुं यजति तर्हि कथं निवार्यते। ततो देवेंद्रेणोक्तं। त्वां सामान्यत्वावन पश्यति। तत्रवि
ष्णुर्यातिकथय। ततो रुद्रेणोक्तं। महावांजालगृहे तपया विष्णुर्याति। परं तु मत्पराङ्मुखतन्न
यमाणं ज्योतिष्टोमं यथवनो सवसद्दत्वां ज्ञात्वा तत्र सर्वथा न यात्येव। नहि विष्णुना शून्यमेवस्थलं न ॥२७
वति। देवा ऊचुः। यदि स्वामिन् विष्णुनारहितं स्थलं कथं वयारक्ष्यात। ततो महादेवो जटाधारी

न्नस्मधारी जंगमपामररूपं कृत्वा कारणस्थगालंक्रीडयन्यज्ञमंडपं गतः। ततस्त्वितिरुक्तं। क
स्त्वं। ततोक्तं। शिवोस्मि। जंगमरूपः। ततो दांत्विकविप्रवेणोक्तं। राजन्पाशुपतः समागतो य
ज्ञशालायां। ततः क्रुद्धो यजमानो गलहस्तेन निवारितवान्। ततो रुद्रः स्वकीयां कौतिकलां स्थ
गाले आरोपितवान्। ततो रूपेण स्थगालेन माध्यगत्वा यज्ञशाला सर्वापि त्वग्ना। ततो यजमानः क्रु
द्धः स्थगालं यावद्धन्ति तावन्मुखदृष्टः पपातः सर्वपलायितः। मृतो दैत्यो द्यापि नरकं न त्यज
ति। अतएव स्थगालरूपान्नगवानियं कथा। वंतीमाहात्म्ये महाकालगुणवर्णने प्रसिद्धा। सर्वार्थइ
ति। सर्वे अर्था धर्मादयो यस्मादिति सतथा। सर्वैरर्थ्यत इति तथा। मुंड इति। परमहंसः। अतएव
कुंडीति। कुंडलवान्। कमंडलुरिति तद्वत्। एतन्नाम त्रयं तु कदाचिद्दत्तिं नरां गिरिजा स्वास संकपतिं वी
क्ष्य हतिस्म। एतादृशो विषयविनिर्मुक्तं त्वां लोका आराध्य संसारतितीर्षवो त्ववंतीत्याकर्ण्य त्वग
ताकनिकस्यान्पारमहंस्यमंगीकृतं। स्त्रीयोदासीन्यरक्षात्यै तदा विरहातुरयान्नगवत्या तत्त

विलापयाप्रसादितोभगवान्गिरिजयाऽत्मारामोऽपिक्रीडतीतिस्मृतिकथा।गोदावरीखंडेप्र
सादेश्वरमाहात्म्येप्रसिद्धा।अजइति।नजायतइत्यजः।जन्मरहितः।मृगरूपइति।मृगस्यरू
पमिवरूपंयस्यसतथा।प्रतिकल्पेहेकदाविज्ञातेत्वान्योक्तं।नत्वांसंभाषयिष्यामि।ततोभग
वानानाविधश्चतुनयेत्ततेषुनवदतिभगवतीसमीपवर्त्तिनोमृगानाह्वयति।तैःसहगोष्ठीं
विधायसमयातिक्रमणंकुरुतस्म।तदाश्रीरुद्रेण।लौकिकमृगरूपंविधायतेषुमृगेषुगतंत
द्यूथमध्यवर्त्तिनंतमेवमृगंदृष्ट्वा।मोहितासांतर्द्धानंगतः।पश्चात्तदानिपर्यालोच्यकथयति
।एवमहिकथंयासीतिततोमृगरूपोभगवानाविर्भूतः।त्वनत्वत्यास्मीतिनायोक्तेसदाशिवे
नस्वरूपदर्शितेनैनलक्षितांप्रतिभगवतोक्तं।गिरिजेप्रतिज्ञातोगाजातइत्यादिकथालव ॥२८
णेश्वरमाहात्म्येप्रसिद्धा।गंधचारीति।गंधायचरतीतिसतथा।गंधचारीत्वभ्रमरःकदाचिद्भवान्यांयो

गासक्तायांतावद्भात्तुपाभगवानीश्वरोपिभ्रमररूपंकृत्वामुखपंकजेलगतीतिस्मृतिकथाऽपित
त्रैव।कपर्द्दीति।कपर्द्दोजटाजूटस्तद्वान्।ऊर्द्ध्वरेताइति।ऊर्द्ध्वंरेतोयस्यसतथा।योगधारण
याऊर्द्ध्वंरेतोनयतीति।यद्वा।रेतःसकारःऊर्द्ध्वंयस्मात्।हंसइत्यत्रसकारःपराधः।सोहमित्यत्रो
र्द्ध्वमेवसकारः।ततःसोहमितिमहावाक्यार्थः।तस्मादेवस्फुरतीतिभावः।ऊर्द्ध्वलिंगमिति।ऊर्द्ध्वं इ
लिंगंयस्यसतथा।गगनमंडलावलंबिलिंगप्रमाणइत्यर्थः।इदंतुलिंगपुराणेविस्तरात्।य
द्वा।ऊर्द्ध्वंसर्वोत्कृष्टंमहाज्वालामयंमहाघोरंस्वयंछिन्नंरुद्रेणतेनतस्यलिंगस्यादिरंतोमध्यंच
यद्वा॥ दृश्यते।इयंकथाशिवपुराणेप्रसिद्धा।ऊर्द्ध्वमुत्कृष्टंहेयत्वाल्पत्वादिदोषरहितंलिंगंहेतुर्यस्य
प्रतिपादकतयास्तिसतथा।ऊर्द्ध्वत्वंलिंगस्यश्रुत्यविरोधात्।यस्तर्केणानुसंधत्तइतिस्मृते :
ऊर्द्ध्वशायीति।ऊर्द्ध्वब्रह्मरंध्रशायीतिसतथा।तत्रशिवस्थानमित्यागमप्रसिद्धिः।नत्वस्तलइ
ति।नलप्रतिष्ठायामाकाराप्रतिपादकइत्यर्थः।त्रिजटइति।तिस्रोजटायस्यसतथा।एकस्यामै

वजटायां भागत्रायणत्रिच्छं।एकस्थं इन्नागोः पारागंगान्नागाः।न्यो नोगिन्नागइति।चीरवासाइति
।मार्गपतितवस्त्रखंडधारी।ईश्वरचरित्रत्वात्।रुद्रइति।कस्मिंश्चित्समये स्वयंलीलयाविधातुर्बा
लरूपंविधाय तदनुग्रहाय पुत्रोहमिति मन्यमानो ब्रह्मादीनां पितापितॄ पौरुरोद तस्माद्रुद्रत्वं प्रा
प्तारोदनात्।तथाचश्रुतिः।सोरोदीदिति।यद्यपिरुद्धानारोदीतिरजतंयागविशेषेणदक्षिणा
नादायत्यस्यापूर्वमीमांसायां प्रथमाध्याय अर्थवादचरणे इयंनिरूपितं।अर्थवादत्वं तथापिनाम दं
मात्रामनत्।यद्वा।संहारसमयेप्रजाराद यनीतिरुद्रः।रुतंदुःखंद्रावयतीतिवारुद्रः।कल्याण
रूपइतिश्रीशंकराचार्यैराथर्वणोपनिषद्व्याख्यातउक्तं।सेनापतिरिति।सेनापतिःकार्त्तिके
यः।तद्रूपात्त्वाद्दापचाशात्।विभुरिति।विभुर्व्यापकः।अहश्चरइति।अह्निचरतीतितथा।न
क्तमिति।अत्रापिचरइत्यनुवर्त्तनीयं।तेननक्तंचरोरात्रिदिनचारी।अप्रतिहतगतित्वात्।अ ॥२५
थवा।अहःशब्देनदिवसाभिमानिनी देवता।नक्तंशब्देनरात्र्यभिमानिनीदेवता।तथावावि

रादिधूमादिमार्गद्वयमुक्तं भवति।तर्चिरभिसंभवंति।तधूममभिसंभवंतीतिश्रुतेः।तथा
चमार्गद्वयप्रवर्त्तकोप्ययमेवनान्यइतिभावः।तिग्ममन्युरिति।तिग्माजगत्प्रलयकर्त्तामन्यु
छु र्यस्यसतथा।सुवर्चसइति।सुशोभनंवर्चोब्राह्म्यंतेजोयस्यसतथा।पूर्वंतेजशब्देनतेजोमात्र
मुक्तं।अत्रब्रह्मवर्चसमितिनपुनरुक्तिः।गजहेति।गजंदैत्यंहंतीतिगजहा।कदाचिद्गजनामा दै
पो त्यो महिषासुरपुत्रोदैत्यःश्रीशंभोःपार्श्वमागतः तस्यप्रमाणंकियंतियोजनानिब्रह्मदत्तवरत्वा
नापिनिवारयितुमशक्यः।तेनागत्यानेकरुद्रगणामथिताः।पश्चादीश्वरेणत्रिशूलेनहतःशिरसि
छत्राकारतयाधृतः।ततोक्तं मृत्कुः प्राणिमात्रस्यास्ति।परंतुमदीयंभाग्यंयद्भगवतात्रिशूलेनाप्रा
नःशिरसिसौधृतः।किंबहुना स्तुतौक्रियमाणायांभगवान्प्रसन्नोजातः वरंवृणीष्वेत्युक्ते।ततो
क्तंमदीयंचर्मत्वयापरिधानतयास्वीकर्त्तव्यं।तस्यचर्मणःसौंदर्यमार्दवसौगंध्यवर्णनंब
हुधास्ति।अत्रानुपयोगान्नलिख्यते।इयंकथाकाशीखंडेप्रसिद्धा।दैत्यहेति।दैत्यान्हंती

ति।अत्रनाम्निदैत्यमात्रमुच्यते।इतिनिगतार्थता।लोकधातेति।लोकानांधाता।जीवनदातृत्वात्
पोषणेन।गुणाकरइति।गुणानांसत्वरजस्तमसांआकरआश्रयः।यद्यपितगुणाजीवेपिसं
ति।तथापिजीवस्तानाश्रित्यवर्त्तते।नतद्वशवर्त्तीश्वरस्यतुगुणाएववश्याइतिभावः।सिंह
शार्दूलरूपइति।सिंहशार्दूलयोरूपमिवरूपंयस्यसतथा।कदाचिद्भवान्यामहिषासुरे
हतेदैत्यानानारूपाणिश्वापदानांधृत्वारुद्रगणानघ्नरसत्रन्नीषयंति।नच्छ्रुत्वान्यानिवेदि
तेसिंहादिरूपेणत्रासयामासेतीयंकथागोदावरीमाहात्म्येत्र्यंबकतीर्थवर्णनसमयेप्रसि
द्धा।आर्द्रचर्मांबरइति।आर्द्रंगजचर्मअंबरंवस्त्रंयस्यसतथा।पूर्वोक्तगजचर्मवासाइत्यर्थः।
अवरइति।अःविष्णुःतस्माद्वरःश्रेष्ठइत्यर्थः।कालयोगीति।कालस्ययोगश्चकालयोगो ॥३०
नी वश्यतयाप्रेरकतयावाविद्यतेयस्यसतथा।तन्निरूपणंतुनानाग्रंथेष्वतिविस्तरत्वान्न

लिख्यते।महानादइति।महान्नादआस्यति।कदाचित्पातालविवरंगतोरुद्रःश्रीविष्णुंतत्पुत्रान्
जित्वातत्रवृषभरूपेणरुद्रेणकृतमहारोदनादेनसार्वत्रस्ताः।इयंकथाशिवपुराणप्रसिद्धा
।सर्ववासाइति।सर्वाणिवासांसियस्यसतथा।नानावस्त्रधरइत्यर्थः।चतुष्पथइति।चतुष्पथेवि
द्यमानत्वाच्चतुष्पथइति।निशाचरइति।रात्रौरुद्रगणैःक्रीडतइतिलोकशास्त्रप्रसिद्धिः।पूर्वं
गतिमात्रमत्रक्रीडतिनिगतार्थता।यद्वा।नक्तंरात्रौगमनंपूर्वमुक्तमधुनारात्रौन्तुंक्तइति।चरधा
तोर्नेकार्थत्वात्शिवपूजायारात्रिप्रधानत्वात्।प्रेतचारीति।प्रेतेषुचरतीतितथा।यद्वा।
प्रनष्टमिताःप्रेताःयोगिनः।तेषुचरतीतितथा।यद्वा।प्रेतामृतादग्धलिंगशरीराःशुकाद
यस्तेषुचरतीतितथा।भूतचारीति।भूतेषुचरतीतितथा।भूतानिपृथिव्यादीनितेषुविद्यमा
नत्वाद्भूतचारीति।महेश्वरइति।महांश्चासावीश्वरश्चेतीशादीनामीश्वरत्वमापेक्षिकं नि

रंकुशमीश्वरत्वमस्येत्यर्थः। महदुग्रसवस्त्वस्यश्वर इति वा। सार्वास्रवास्त्तानेवभवतीत्यर्थः
। बहुरूप इति। बहूनि रूपाणि यस्य स तथा। यद्वा नाट्यसमये भगवान्नानारूपाणि बिभर्त्तीति।
यद्वा। रूपंरूपं प्रतिरूपो बभूवेति श्रुतिप्रसिद्धं बहुरूपत्वं ज्ञेयं। बहुधन इति। बहुधनं यस्ये
ति। ननु कथं दिग्वाससो बहुधनत्वमिति चेन्न। यत्कृपया कुवेरादयो धनदत्वं प्राप्तास्तस्य धनव
त्त्वे किमाश्चर्यं। तथा चानंदमयाधिकरणे। श्रीशंकराचार्यैस्तद्भाष्यव्याख्यानसमये वाचस्प
त्याचार्यैरुक्तं। यान्यान धनिनो धनिकत्वं संपादयति स प्रभुरधनो न लभ्यते। सर्वाधार इति। सर्व
स्याधार आश्रयः। येन जातानि जीवंतीति श्रुतेः। मनोगतिरिति। गम्यत इति गतिः मनसो गतिः ॥३१
स तथा। मनसैवानुद्रष्टव्यमिति श्रुतेः॥ नित्यप्रिय इति। नित्यं प्रियो नित्यप्रियः कदाचिदप्यप्रियो
न भवतीति। परमानंदरूपत्वात्। तत्रेयं युक्तिः। यद्यदर्थं प्रियं तत्तस्मादधिकं प्रियं यथा पुत्रमि

त्रं प्रियं ततः पुत्रमित्रात्पुत्रोऽधिकप्रियः पुत्रोऽपि शरीरादिद्वारा सुखार्थं प्रियः सुखमप्यात्मार्थं त
स्मात्दात्मादात्माधिकप्रियः तत्स्वरूपत्वादबाध्यत्वात्परमात्मा सुतरां प्रियः न वा अरे पत्युः
कामाय पतिः प्रियो भवतीत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भवतीति श्रुतिश्च। नित्यतृप्त इ
ति। सदा पूर्ण इत्यर्थः। अतृप्तत्वं तु विषयाप्राप्त्या सामर्थ्येन वा। तज्जोभयं भगवति न संभवति। पू
र्णमद इति श्रुतेः। नृत्यक इति। नृत्यकर्त्ता। सर्वलास्यक इति। नानालास्यकर्त्ता। घोष इति। घो
षः स्वरविशेषः तत्स्वरूपः। अध्यात्मयोगधारणया प्रकटीभूतः स्वरविशेषः। तत्स्वरूपः।
नादब्रह्मणो रैक्योपचारात्। महत्तपः। पंचाग्निसाधनादि यस्मात्स तथा॥ ईश इति। ईष्टेऽ
सावीशः पूर्वमन्यत्रापठितकमीशत्वं। अत्र निरंकुशमीश्वरत्वमधुना निरुपपदेशशब्दो
पादानेनेशत्वमत्रैव विश्राम्यति। नान्यत्रेति भावः। नित्य इति। अभावाप्रतियोगित्वं पूर्वं व्या
ख्यानमधुना नित्यशब्देनाबाध्यत्वमुच्यते। गिरिश इति। गिरिर्हिमाचलं तद्गुणते याचात सप्तर्षि

मुखेनपार्वतीपरिग्रहाय्यतिगिरिश्वरःइयंसर्वत्रप्रसिद्धं।यद्वागिरिश्वरइतिगिरःशैलेश्वर
ईशःशैलजाइतियावत्।एकदाहिमाचलपत्नीमेनाकांतमुवाच।स्वामिन्नुमादूरेस्ति।तद्वार्ता
पिनज्ञायतइतिपुत्रीस्नेहाद्विकलयाउक्ते गिरिराजोपिसाश्रुनयनउवाचगिरिजादर्शनार्थंया
स्यावइतिगिरिराडनेकानिरत्नमुक्ताफलवस्त्राणिदासीःसर्ववस्तुजातंगृहीत्वाजामातुर्दु
हितुश्चदर्शनार्थंगतोवाराणस्यां।नतैत्रत्यामेनादृशीसमृद्धिमपश्यद्यस्याःसंपदोऽग्रेइयं
स्वकीयंसर्वंलाघ्यायत।वाराणसीवर्णनंग्रंथगौरवभयान्नोच्यते।तत्रोपविष्टएकंकार्पटिकं
वीक्ष्यपप्रच्छकस्येयंपुरीति।तेनमहेश्वरैश्वर्यावर्णनमकारि।तच्छ्रुत्वाहृदितुष्टःकिंकरोतीतित
दास्वकीवर्गमाहूयएकःप्रासादोनिरूपितःतत्ररत्नजातंमुक्त्वालिंगंस्थापितंततःकनि ॥३२
ष्ठेनोक्तंस्वामिन्केनविश्वप्रासादोरचितइतिश्रुत्वातद्दर्शनार्थंउमासहायोगत्वोवाचकेना

यंप्रासादोनिर्मितइतिसमयेलिखितांप्रशस्तिंदृष्ट्वाशैलराजेननिर्मितइतितस्यप्रासादस्य
नामाशैलेश्वरइतिसएवगिरिश्वरः।इयंकथास्कंदपुराणकाशीखंडेप्रसिद्धा।नन्नइति।निर
वयवइत्यर्थः।सहस्रहस्तइति।सहस्रंहस्तायस्यसतथा।अनेकहस्तोलीलयेत्यर्थः।विज
यइति।विजयवानित्यर्थः।यद्वा।विःपक्षीगरुडःतंजयतीतिविजयःपूर्वंहनुमद्रूपेणगरुडः
परान्नतइत्यैतिह्यमबाध्य।व्यवसायइति।निश्चयात्मकज्ञानवान्संदेहरहितइत्यर्थः।अ
निंदितइति।भूतप्रेतस्मशानादिसंगेसत्यपिवेदांतवेद्यत्वान्नकेनापिनिंदितुंशक्यतेमत्स्या
द्यवतारवान्हरिरिवेत्यर्थः॥अमर्षणइति।नकस्याप्यौद्धत्यंसहनइत्यर्थः।अमर्षणात्मति
।मर्षणःसहनशीलआत्मायस्येति।आराधकस्यसर्वंसहनइत्यर्थः।यज्ञहति।दक्षाध्वरविध्वं
सी।हनूहिंसागत्योरितिधातोर्यज्ञंप्राप्नोतिनोक्ता।चनेत्यर्थः।कामनाशनइति।कामाविष
याभिलाषाःनंनाशयतिसतथा।कामादूरतएवयंप्राप्यगच्छंति।कामायेऽस्यद्वेष्टिनः।अ

थमर्त्यो ऽ भूतो भवतीति श्रान्तः। दक्षयज्ञापहारीति। दक्षस्य प्रजापतेर्यज्ञमपहरतीति दक्षय
ज्ञापहारीति। पूर्वं विद्रुतयज्ञविध्वंस उक्त इदानीं सामग्र्या उच्छुंचनमिति न गतार्थता। सुखइति।
सुखं ददातीति तथा। मध्यमइति। इडापिंगलयोर्मध्ये सुषुम्ना तस्यां मीयत इति मध्यमः। योगिनः सु
षुम्नायां पश्यंतीत्यर्थः। यद्वा। मध्ये हृदयाकाशे मीयत इति तथा। सर्वत्र विद्यमानोपि भगवान् वि
भूर्यथा शालिग्रामशिलायामुद्बुद्धो भवति। तथा हृदयकमल इति वेदांतशास्त्रे प्रथमाध्याये त
क्तवान्। तेजापहारीति। तेजोपहरतीति तथा। यद्यपि भवे गं तेजोपहरणानुकूलः प्रयत्न इ
त्यव न भवति। तथापि सूर्योदयस्वभावादेव प्रदीपादितेजोपहरणं भवति। एवं भगवत्स्वभा
वादेवेतरेषां ब्रह्मादीनां तेजोहीनं भवतीत्यभिप्रायः। बलिहेति। बलिनो हंतीति तथा। मुदि ॥३३
तइति। हर्षितइति। यावत्। यद्वा। मुद् हर्षः तं इतः प्राप्तः स तथा। अजितइति। साधुभिरित्यर्थी
त्। सत्पुरुषाः साधनैर्भगवंतमेवार्जयंतीत्यर्थः। लवइति। लवः सूक्ष्मकालस्वरूपः अलव

इति वा। लवादिर्महाप्रलयांतः कालो यं न स्पृशतीत्यर्थः। लवशब्दः कालोपलक्षणः। गंभी
रघोषेति। गंभीरो घोषो महाध्वनिः। गंभीरइति। पूर्वं घोषगांभीर्यमुक्तं इदानीं स्वरूपगां
भीर्यं। गांभीर्यं चात्रानाकलिताभिप्रायत्वं। गंभीरबलवाहनइति। बलं च वाहनं चेति द्वंद्वः
तं गंभीरं यस्य। बलं सैन्यं तद्गांभीर्यं चापारत्वं। तथा वाहनस्यापि यदा प्रमाणं परमइति ना
मद्वयं तदा त्रैकं नाम। यदा त्रैकं नाम तदा नामद्वयमत्राबाद्धव्यं। न्यग्रोधरूपइति। न्यग्रोधरू
पमस्येति तथा वाटशिवो वसतीत्यैतिह्यात्। यद्वा। छायाश्रिततापहारित्वेन वटोपमारूपं ना
म। न्यग्रोधइति। न्यक् बिलादिषु रोधायस्य। बिलादिप्रवेशं प्रायेण न करोतीत्यर्थः। यद्वा।
न्यग्रोधो नाम सिद्धवाट ऽवंत्यां विद्यते तद्रूपइत्यर्थः। वृक्षकर्णइति। वृक्षाः कर्णा यस्य स तथा।
एकदा नंदिनोक्तं। उत्कृष्टमिंद्रवनं श्रूयते तद्दर्शनीयं भवति। तच्छ्रुत्वा श्रीरुद्र इंद्रवनकल्पवृ
क्षान् समूलशाखान्कर्णे निहितान् विधाय कैलासमागतो नृत्यति स्म। तदा गणा जानंति स्म।

स्मकल्पवृक्षस्य पुष्पितकुड्मलशाखाग्रमात्रं क्रीडया कर्णयोर्निहितमस्ति। तदा देवलोके कोला
हलो वृत्तः। केनास्मदीयास्तरवो छिन्नाः। इति संक्षोभ्य गिरिशो नृत्यति तद्द्वारि प्रविष्टः प्रतिहार
णा निवेदिते मध्ये प्रवेशितः। तदा नमस्कृत्य स्थितः गणान् प्रति जगाद। कर्णे निहिता मदीयनंद
नकल्पपादपास्ति स्तेषु यं ज्येष्ठः दापयंश्चित्यक्रे गणे रुक्तं। अस्मान्निरेवं नाज्ञाने। यच्चैंदीयाए त्र
नेरक्षानंदनसर्वस्वमस्मान्निरेवं बुद्धं। यत्पुष्पस्तबकलोन्नेन कुड्मलशाखाग्रमात्रं गृहीतमस्म
स्वामिना। अस्मद्वनमध्येऽयं तु दूर्वांकुरमात्रं तया दृश्यते। पश्चान्नंदिनोक्तं। स्वामिन् शाकवृक्षं
त्वद्गृहीतिनतो भगवता नंदिनीकं नंप्रतिस्मितं त्वचा दृष्टं देहीति तेनोत्कृष्टं प्रत्यर्पणं कृतं। इयं कथा स्कं
श्री दपुराणे मुद्गलोपाख्याने प्रसिद्धा। त्रिवृद्वह्निभूरिति। भीनाहो त्राधयूज्ञाद्दन दक्षिणाती ति त्रिवृत्
शाद्धनवेदत्रयीप्रोच्याता तस्याविभुः स्वामी। यद्वा। त्रिवृत् शाद्धनत्रिवृत्करणमुत्तरमीमांसा ॥३४

प्रथमाध्यायप्रसिद्धं तासां तासां त्रिवृतमेकैकां करवाणीति। अनेः। पृथिव्यप्तेजसां त्रिवृत्कर
णप्रज्ञानिरूपितो वाचस्पत्याचार्यैः। तत्स्वामी। तेन तेन स्वरूपेणाधिष्ठितं त्रिवृत्करणं भवति। नान्यथे
ति। नीरूपबाहुरिति। नीरूपा बाहवो अस्येति। तथा केनापि साढुं न शक्या इत्यर्थः। हर्ष इति। ह्यावी
विघ्नेऽस्यति। अशादिच्चा द्रव हर्षरूपा वा। हर्षमयः हर्षमय इति अनेः। सहाय इति। भक्ता
नामनुकंपार्थं साहाय्यं करोतीति यद्वा। अयः शुभावहो विधिः भाग्यसंयुक्त इत्यर्थः। सर्वका
लविदिति। सर्वं कलयति भूतभविष्यद्वर्तमानमात्रमिति सर्वकालो वेदः तं वत्ति तदर्थमपरो
क्तनया वत्ति सर्वकालावतीति वा। विष्णुप्रसादित इति। पुरा विरंचिना महत्तपः कुर्वते मतंग
दैत्याय वरादत्तः। मदीयस्त्र्युष्टं न वर्त्तितो न हनिष्यति। तस्य यादृशं रूपं त्यत्ययं चिंतयसि
तस्य प्राणिनस्तादृशं रूपं भविष्यति। तव का कथा। ततो दृष्टः सो क्षीरसागरे लक्ष्मीनाथोऽस्ति

तत्र गतस्त्वदीयं धनुर्गृहीत्वा त्वं मां प्रतियुध्यस्व हरिर्धनुर्धरस्थितो जातः यत्र दैत्यो गच्छति तत्र पृष्ठतो
विष्णुरगमत्। अन्ते पातालं गतः। तत्र दैत्येनोक्तं। याहि त्वां वराकं कथं हन्म्यां ततो नारायणस्तं धिक्करो
ति। तावद्देवः स्त्रीरूपो जातः। लज्जितेन नारायणेन महान् हाहाकारो जातः। सर्वे देवाः श्रीरुद्रं शरणं
गत्वा तुष्टुवुः। ततो रुद्रेण त्वं बररूपं गृहीत्वा तत्र गतं स दैत्यो विदारितः श्रीपतिः पूर्वावस्थां प्रा
पितः पश्चात्परितप्तेन नारायणेन विचारितमहं दैत्यमात्रं हन्तुं सकलोपायः ततो ब्रह्माणं पृष्ट
वान्। एकमुपायं ब्रूहि। येन दैत्यमात्रं परान्तवितुं न शक्नोति ब्रह्मा प्राह। श्रीमहेशसमीपे चक्र
मस्ति तच्चैत्त्वदीयहस्ते लगति तदा दैत्यैरजेयो भवसि। ततो रुद्रो बहुकालं विष्णुनाराधितः प्र
कटीबभूव। याचितस्त्वत्करे चक्रं देहीत्युक्तं। ततो रुद्रेणोक्तं। त्वया तच्चक्रं कथं ज्ञातं। विष्णु ॥३५
नोक्तं एतच्चक्रवृत्तान्तं ब्रह्मणा प्रोक्तं। एकः कश्चन महादैत्यः श्रीमहादेवेन युद्धार्थं मिलितः

तदा श्रीमहादेवेन पृथिव्यां चक्रं लिखितं तत् उद्धरेत्युक्ते तत्तो उद्धर्तुं शक्नोति। तदा तेन चाक्रण
स द्वहतः नाताऽनन्तरं प्रलयानलकोटिसदृशं चक्रमस्ति। तत्सोढुं न शक्नोति। ततो विष्णुनो
क्तं। भगवन् महादुर्दर्शमिदं चक्रमतः कारणात् सोढुं न शक्यते। इदं दुर्दर्शं सुदर्शनं कृत्वा
देहीति। ततस्तेजसो नवनवतिभागान् स्वस्य समीपे स्थापयित्वा विष्णवे एकभागगततेज
सा सुदर्शनं कृत्वा ददौ। तेन दैत्यान् हतवानिति। इयं कथा स्कंदपुराणे विस्तरतः प्रसिद्धा॥
।यद्वा। विष्णुप्रसादित इति। नाम्नो द्वितीयं वृत्तान्तं। तद्यथा॥ पूर्वं दैत्यपराजितैर्देवैः शरणाग
तवत्सलो भगवान् विष्णुः स्तुतः। ताता विष्णुना हिमवन्तं गिरिं गत्वा सहस्रनामानि पठन् सन्
एकैकमलं नित्यं प्रयच्छति। तत्र तदा श्रीमहादेवः प्रसन्नो जातः तस्य परीक्षार्थमेकं कमलं
प्रच्छादितं। ततो गिरिशं श्रीविष्णुः स्वीयनेत्रकमलेन तं पूजितवान्। ततो भगवताऽनेको वरा दत्ताः

सुदर्शनाख्यं चक्रं च दत्तं॥ येन चक्रधर इति प्रसिद्धः। इयं कथा शिवपुराणादित्यपुराणादिप्र
सिद्धा॥ यद्वा॥ विष्णुना प्रसादित इति। विष्णुना स्तुत्यादिना प्रसादितः सन् तथा। विष्णोः प्रसादि
तास्येति वा॥ विष्णुः कर्तृक स्वविषय प्रसादो वा॥ यद्वा॥ प्रसादोऽस्यास्तीति प्रसादितस्य च ना
वस्तत्त्वं॥ विष्णुः व्यापनशीलः प्रसादितास्येति। यज्ञ इति। यज्ञो विघ्नेयत्तुष्ट्ये इति यज्ञः।
अयज्ञो वा॥ अयः शुभावहो विधिस्तद्देना॥ सर्वभाग्यावेन्नेति भावः। समुद्र इति। सकल
वस्तुनिधानं। तथा समुद्रः। मुद्राभिज्ञानं तथादिभिर्वा। वडवामुख इति। पूर्वं हि समु
थ द्रमथने जाते देवैरत्नेषु गृहीतेषु पुरुहूतस्य गर्वभिवगद्देरावणाश्चैःश्रवः प्रभृति रत्नं म
या गृहीतं शंभो विषमायात मुच्चैः श्रवा वाहनार्थमस्य नाभवत्। किं त्वृषमात्रं पुरातनमे ॥३६
वास्यास्ति। ततोहं महाभाग्यवान्। ततो भगवानेव प्रबलतर वडवाकोटिरूपो जातः। या

भिः पुरस्तादुच्चैः श्रवाः किशोरतोपि निःसृष्ट आभाति। सौंदर्येण खर इव ततः इंद्रादिभिर्देवैः
र्ज्ञाता मतासां वडवानां मध्य एनाद्दृशा अश्वान्विष्यंति ततो मैथुनेन मांस्त्र हिंगाधिष्यामहे
विचार्य तद्ग्रहणार्थमुद्योगं कृतवंतः। ताः पलाय्य सर्वासु दिक्षु गता इंद्रः स्वकीयमश्वं परित्यज्य
वडवाग्रहणाय योजनशतानि बभ्राम। परं तु हस्तेन लगति। तदा श्रांतः नमः शिवायेत्य कोप
विष्टः तदा श्रीमहादेवेन रूपं दर्शितं। शक्र सुभाग्योऽसि। यदुच्चैः श्रवसं प्राप्नवान्। कदुच्चैः
श्रवास्तदाऽनजयाऽधामुख इंद्रश्चरणयोः पपात। तुष्टाव च। स्तुतिस्तु ग्रंथगौरवभयान्न लि
ख्यते। कृताशनसहाय इति। कृताशनो वह्निः सहायोऽस्येति। स तथा। प्रलयसमये नेत्राग्नि
ना सर्वं दंदह्यते। यद्वा। कृतमन्नं नीति कृताशो देवाः नन मनः कृताशामनोजीवनं तस्य
हनेए ताद्दृशमयोभाग्यं यस्य। एतेन यदीय भाग्यवशाद्देवा जीवंतीत्यर्थः। यद्यपि भाग्यं जीवध

र्मस्तथापिलीलाविग्रहधारिणो वर्णनेन दोषः। यद्वा। पावक। पवमानश्शुचिरित्यग्नित्रयं त्रया
पिशिवस्त्रनधराः शिवरूपधारिणस्तत्सहायस्तदीश्वर इति कथा आदित्यपुराणे प्रसिद्धा। प्रशां
तात्मेति। प्रशांतः शमदमादिमानात्माऽस्येति। यद्वा। प्रकर्षेण शांताः सनकादयः त आत्माऽस्ये
ति। कृतागम इति। कृतमागतमितीति तथा। सर्वयज्ञात्कृतवान्। यद्वा। विश्वानरमुनिपुत्रो वैश्वानरः
स एवाकृतागमः। उग्रतेजा इति। उग्रं सोढुमशक्यं तेजोऽस्येति तथा। महातेजा इति। महत्सर्वत्रवि
द्यमानं तेजोऽस्येति। जय इति। जयतीति जयः जयरूप इत्यर्थः। विजयकालविदिति। विजयस्यका
लस्य विजयकालो वेत्तीति तथा। यद्वा। त्रिपुरहरणसमये पुनरत्रये कीर्त्तनकालं विजयकालं वेत्ति
स तथा। ज्योतिषामयनमिति। सर्वतेजोऽधिष्ठानमिति। यद्वा। ज्योतिषां नक्षत्राणां अयने। कं वैनक्ष
त्रमालेति स्मरणात्। यद्वा। ज्योतिःशास्त्राणामयनमाश्रयो ज्योतिःशास्त्रप्रवर्त्तक इत्यर्थः ॥२१

सिद्धिरिति। सिद्धिस्वरूप इति यावत्। नाएना अणिमाद्यासिद्धयः। सिद्धिरकोमहेशाइति
त्रैरवनंत्रोक्तेः। संधिरिति। संधत्त इति तथा। सर्वसंधानकर इत्यर्थः। विग्रह इति। विग्रहः क
लहस्तत्कर्त्ता। नामगुणेन लोकेषु कलहप्रवर्त्तक इत्यर्थः। यद्वा। संधिविग्रहौ राजनीतिशा
स्त्रोक्तौ तद्रूप इत्यर्थः। शिखीति। शिखाशब्देनाग्रनागोलक्ष्यते तेन मुख्यवस्तुमानिति या
वत्। दंडीति। दंडो वेणवो ज्ञानदंडो वा। प्रजास्वनीयतासु दंडकर्त्तृत्वेन वा दंडवानित्यर्थः
जटीति। जटाप्रसिद्धा। तद्वान्। पूर्वजटात्रयमुक्तं निरुपपद जटामात्रेन संकेमिति न संक
रः। ज्वालीति। ज्वालाप्रसिद्धा। तद्वान्। प्रदीप्यमान इत्यर्थः। मूर्तिज इति। मूर्तिः स्वरूपं तस्मा
ज्जात इति। स्वरूपादुद्भूतो न तूत्पन्नः। यथाग्रुवः सामानिजाद्विरइति। दुर्द्दर इति। दुःख
न धार्यत इति हृदयकमले ष्टांगयोगं विना धारयितुं न शक्यत इत्यर्थः। बलीति। बलवा

नितिर्यीवत्।यद्वा।वं उदकं।लं पृथिवी।तद्वन्त्यवान्।अष्टमूर्त्तित्वादित्यर्थः।वेणवीति।वे
णवदंडवानित्यर्थः।पूर्वं दंडवानित्यर्थः पूर्वं दंडमात्रमुक्तं।इदानीं वेणवपुरस्कारेणाव
णुविकारमात्रमितिन संकरः।पणवीति।पणवो वाद्यविशेषः तद्वान्।तालः कालक्रि
यामानं तद्वान्।कालक्रियामानं शब्दमीश्वर एव वदनान्य इत्यर्थः।काल इति।कलयति
सर्वमिति।कं ब्रह्माणं आसमंताल्लाति पुत्रत्वेन गृह्णातीति वा।यद्वा।कं विधिं अं विष्णुं लाति
स्वीयत्वेनेति कालो महाकालो ऽवंत्यां कालभैरवः कार्यांप्रसिद्धः।कालकटंकट इति।का
लश्चासो कटंकटश्चेति।यद्वा।कालकटंकटोपि कालभैरव एव वाराणस्यां मत्समः कोपि
नास्तीति गर्वेन तेन तस्य शिरश्छिन्नं कटंकट इति रिरीत्या प्रकटीबभूवेत्यनुकरणशब्दः। ॥३८
नक्षत्रविदिति।नक्षत्रस्य नक्षत्रप्रधानस्य ज्योतिःशास्त्रस्य वित् ज्ञानं यस्मात्स तथा॥

ज्योतिःशास्त्रज्ञानं शिवकृपां विना नोत्पद्यत इत्यर्थः।ग्रहविधिरिति।ग्रहाणां विधिर्दैवं ग्र
हा अपि यद्दैवाप्रेरिता इत्यर्थः।यद्वा ग्रहाविधात्र ऽसौ ग्रहविधिः।विधिः आनुकूल्यं ग्र
हाणामानुकूल्यं यतो भवतीति वा।गुणवृद्धिरिति।गुणबाहुल्यदायक इत्यर्थः।लीङ् वि
लयने।प्रलयकाले सर्वं तस्मिं ल्लीयत इत्यर्थः।यद्वा संगीतोक्तो लयोप्यत्रैवेत्यर्थः।यद्वा।
अलावालावो लावइति प्राणाकरप्रक्रियया।यथा घटालावाऽलावो घट एवमविद्याल
यः परमात्मैवेति।गमइति।गम्यइति गमः।नृणामेको गम्यस्त्वमसि पयसामर्णव इवेति
पुष्पदंतवचनात्।प्रजापतिरिति।प्रजानां पतिः सर्वप्रजोपादानत्वादाधारत्वात्तत्क्षया
धिष्ठानत्वात्पतिरयमेव।दिशां बाहुरिति।बाहुवद्बाहुः।बाहुर्यथा रक्षकस्तथायं दि
ग्रक्षक इत्यर्थः।विन्नाग इति।विन्नागो नाना वं विगतो नागो यस्मात्स तथा।सजातीयवि

जातीयस्वगतनानात्वरहित इत्यर्थः। एतेनान्तेदान्तेद्वादिमतेनिवानेत्नवनः। सर्वतोमुख इति
।सार्वविभक्तिकस्तसिः सर्वत्रमुख्य इत्यर्थः। सर्वतो मुखानि यस्येति वा। पंचवक्त्रवान्॥
विरोचन इति। विशिष्टा रोचना यस्येति विरोचनो विरोचन एव वैरोचनो वेदार्थवादवाक्यै
रयमेव बोध्य इत्यर्थः। असुरगण इति। असुरान् गणयति गरिष्ठासंज्ञावयुतिस सुरगणो
न तथायं सुरानिंद्रादीन् गणयति उच्छृंखलेनेत्यर्थः। हिरण्यकवचोद्भव इति। हिरण्यकवचो
ब्रह्मा तस्य उद्भव उत्पत्तिर्यस्मात् ब्रह्मण उत्पत्तिस्थानमित्यर्थः। अप्रज इति। उदासीनत्व
कर्तृत्वान्नात्मजा तु। तथा सुरेश्वराचार्याः। अद्वंतवप्रपंचस्यनाहउरनिहत्तितः। ज्ञानज्ञेयादि
विश्वस्य मायैव जननी मातेति। मायारब्धा विलासस्य। बालचारीति। बालवच्चरतीत्येवं शी
लस्तथा। नत्र बालः। यद्वा। बालशब्देन बाल्यमुच्यते। तस्माद् ब्राह्मणः पांडित्यं निर्विद्य बाल्येन ॥३९

तिष्ठासेदिति श्रुतेः। नो बाल्यं मननं तत्र बाल्ये चरतीति। मननेनायं लभ्यत इत्यर्थः। महामारीस्तु
त इति। महामारी राक्षसी तया स्तुतः। एका महामारी राक्षसी नावाढां त्रवानी हिमालयगृह
नीषयति स्म यतः ब्रह्मणा लब्धवराय दहं रुद्रगणान् बिभेमीति। अन्यस्य गणनापि नाह्न
तदा श्रीरुद्रेण दंशमशिकानृत्यादिना यत्र धावति। तत्र नान्न हयंति। अतिदुःखाक्रांतया श्री
शिवस्तुतः ततः सा हरिजिनाम्ना विततिकथा लवणासुरकुंडमहिमवर्णनप्रसिद्धा। सर्वतू
र्यनिनादीति। सर्ववाद्यमात्रकरः। सर्ववादीति। सर्वाणि दर्शनानि परस्परं वादयति चर्चां कारय
तीति तथा। अपरिग्रह इति। धनरत्नादिपरिग्रहरहितः। यद्वा। अं विष्णुं परिगृह्णातीति स्वीयत्वेन
नेति तथा। व्यालरूप इति। रूप्यतेऽनेनेति रूपमलंकरणं व्यालरूपमलंकरणं यस्य। व्यालान्
रूपयति स्वसौंदर्येणेति। यद्वा। व्यालो दुष्टो हस्ती वा गणेशः पितापुत्रयोरभेदाद्व्यालमु
च्यते। बिलावासीति। बिलं पर्वतगुहा तत्र वर्तमान इत्यर्थः। यद्वा। एकदा शिवेन कुतश्चिदागत्य

काशींविहायविंध्यंगतेकेत्रसन्यासिनोरुद्रदर्शनलालसाःकाश्यांतस्थुः।पश्चाद्रुद्रेणतद्भूमिंनि
खायततोनिःस्रुतैःकंटकैःजीविकांचक्रुःततस्तत्रपुष्करिणीजाता।तत्रलिंगेस्थापित
बिलसमीपवर्तित्वाद्बिलावासीत्युच्यतइतिस्कंदपुराणप्रसिद्धा।हेममालीति।हेम्नःसुव
र्णस्यमालास्यास्तितथा।तरंगविदिति।तरंगाःसंसारयातायातानर्थान्जीवात्मानंवेत्तीति
तथा।त्रिदशइति।तिस्रोदशायस्यसतथा।सृष्टिसमयेरजोदशा।स्थितिसमयेसत्वदशा
प्रलयसमयेतमोदशेतिदशात्रयं।त्रिदशोदेवोवा।त्रिदशावासइति।त्रिदशेषुत्रावासं
समंताद्वसतीति।तथा।सर्वदेवानांमध्येवर्तमानोमुख्यतयेतिशेषः।यद्वा।त्रिदशाना
मावासःत्रिदशानामतदंशत्वात्।सर्वबंधविमोचनइति।सर्वेषांप्राणिनांबंधबंधनं
विमोचयतिइतितथा।असुरंद्राणांबंधनइतिपूर्वस्यापवादोयं।असुराःकेवलप्राण ॥४०

पोषकाःविश्वरूपबहिर्भूताःतेषांबंधनः।युधिशत्रुविनाशनइति।युधिसंग्रामेशत्रू
न्विनाशयतीतितथा।सांख्यप्रसादइति।सांख्यमात्मानात्मविवेकशास्त्रंकापिलं।तत्र
प्रसीदतिस्वरूपाविर्भावंकरोतीतितथा।अदुर्वासाइति।शाननवस्त्रइत्यर्थः।सर्व
साधुनिषेवितइति।सर्वैःसाधुभिःशांतदांतैर्निरंतरंसेवितइतिसतथा।यद्वा।सर्वेषां
साधूनांनितरांसेवाइतःप्राप्तःइतिस्वविषयासाधुकर्तृकास्वकर्तृकासाधुविषयाभ
क्त्यानुकंपितयेति।सेवास्वरूपमुक्तंभवति।अतएववक्ष्यतिपुराणेस्मर्यते।भगवता
सेवाहतेतिविष्णोःसाधुत्वमेवप्रयोजकं।प्रस्कंदनइति।प्रकर्षेणस्कंदयतिशोषयति
प्रलयकालइतितथा।विभागइति।विशिष्टांभांशोभांगच्छतीति।विशिष्टशोभायुक्तइत्यर्थः
।विशिष्टाभायस्यसविभएतादृशाःगःकैलाशोयस्यासतथा।यद्वा।विभागोभाग

वान्। यद्यपि अभेदरूपे भगवति भेदो न संभवति। तथाप्यविद्याकृतो भेदोऽध्यस्तो ...
वा। अतुल्य इति। न तुल्यो विद्यते तुल्यो यस्येति तथा। न तत्समश्चाभ्यधिकश्च दृश्यत इति श्रुतेः।
यद्वा। अः विष्णुः स तुल्यो यस्येति। यदि संभवेत् तर्हि विष्णुरेव संभवेन्नान्य इत्यर्थः। ननु विष्णु
ना तुल्यत्वे ईश्वरद्वयं स्यान्नैवं। उभयोरैक्यान्न विरोधः। कथं तर्हि भेदनिरूपितं तुल्यत्वमि
ति न वाच्यं। अभेदेऽपि गगनं गगनाकारं सागरः सागरोपमः। इतिवत्तुल्यतोपपत्तेः। तर्हि अभे
ने वायं तुल्य इत्येव वक्तव्यं स्यात्। किं ज्ञानं। वस्तुनस्तथैव रूपप्रतिभासः सगुणप्रतिभासा आ
राधनादिप्रकारभेदमारोप्य भेदो न वास्तवो भेद इति। तर्हि वास्तवो जीवात्मनोऽपि न भेद इ
ति चेत् न सत्यं जीवात्मा तु कर्मारब्धकलेवर इमौ लीलाधृतविग्रहौ। अत्र माविति द्विवचनं
प्रतिमात्रेण वस्तुनो मनागपि भेदो न। ध्वनीति भावः। यज्ञभागविदिति। यज्ञभागं विंदति ॥४१

यज्ञ

प्राप्नोतीति स तथा। यद्वा। यज्ञस्य भागा अवांतरभेदास्तान्वेत्तीति तथा। नानायज्ञकलाजै
प इत्यर्थः। अनेकयज्ञसमूहमयमेव वेत्तीत्यर्थः। यद्वा। यज्ञं भजतीति यज्ञभाक्। भंजो
आमर्दने। यज्ञस्वरूपविष्णुस्वरूपयोर्भेदकं नीतिं नावर्तिनीति तथा। यज्ञो वै विष्णुरिति श्रुते
। यज्ञेन यज्ञमयजंत देवा इति च। एतदुक्तं भवति। यो हेतुवादी न तथा वेदं दूषयति यश्च हेतुवा
दैनैव महेशाद्विष्णुं भृत्यं तद्भिन्नं ब्रवीति। तं न वेति न संभावयति। न तस्य महेश्वराद्दूरवर्तिनि
स्तस्य निरयस्थितिरपि दुर्लभेत्यर्थः। सर्वचारीति। सर्वत्र लोकमात्रे चरतीति। सप्तसु लोके
ष्वप्रतिहतगतिरित्यर्थः। यद्वा। सर्वं चरति भक्षयतीति तथा सर्वभक्षक इत्यर्थः। यस्य ब्रह्म
क्षत्रं चोभे भवत ओदनो मृत्युर्यस्योपसेचनमिति श्रुतेः। अत्ता चराचरग्रहणादिति ब्र
मीमांसासूत्राच्च। सर्ववास इति। सर्वस्य वासोऽस्येति तथा। भुवनमात्रनिवासीत्यर्थः। यः पृ

थिव्यामंतस्तिष्ठन्पृथिव्यामंतरोयमयतीतिश्रुतेः। ईश्वरः सर्वभूतानां हृद्देशेर्जुनतिष्ठती
तिस्मृतेश्च। दुर्वासाइति। दुर्वासा ऋषी रुद्रावतार इति पुराणप्रसिद्धिः। वाग्मिनोत्तम इति।
वाचामनसावन्त्र्यात प्राप्यात स तथा। भूप्राप्तो। हेम इति। सुवर्णवर्ण इत्यर्थः। हेमकर इति
।सुवर्णनिर्मिता। यज्ञ इति। यज्ञधा तोदानार्थत्वे तद्दाननिर्मा तेत्यर्थः। सर्ववीर इति। सर्वेषु वी
रः सुभटएनादृशः सुभटः कोपिनास्तीत्यर्थः। स वनि विशेषेण ईरयति प्रेरयतीति तथा। पू
र्वमंतर्यामितामात्रमुक्तं ननु स्वपरसाधारणमधुना विशिष्टनियामकमुक्तमिति निगतार्थ
ता। नरोत्तम इति। नराजीवास्तान्नुत्तमयति स्वसदृशान्करोतीति तथा। यद्वा। नरनाराय
णौ। तावपीश्वराराधनकर्तृत्वेन नरनारायणाद्युपाज्ञ्यतादुत्तमयतीति तथा। नौ तद्रूपा पार्थी ॥४२
र्जुनावतारौ प्रसिद्धौ। लोहिताक्ष इति। आरक्तनयन इति यावत्। लोहितो रुद्रस्तदृष्टीषण

क्रीटमारभ्य हिरण्यगर्भपर्यंतं तान्हर्म्यं मुखनाथाः श्रूयते युक्त्याबुद्ध्यानपि अत्र तु निरं उरांशुस्य प्रमि
त्यर्थः ८
नयानां वा। महाक्ष इति। महांत्यक्षीणि यस्य सः। यद्वा। महदक्षस्वस्तत्संयुक्तालाचन इ
ति। विजयाक्ष इति। विजयसंयुक्तविदेवनवानित्यर्थः। विशारद इति। निर्मल इति यावत्।
यद्वा। विशो मनुष्यास्तान्समंताद्दाति आदत्ते यमस्तं द्यति खंडयतीति सकलमनुष्यभक्षक
यमस्यापि भक्षक इत्यर्थः। संग्रह इति। संगृह्णाति सर्वा औषधीरिति। स तथा। यद्वा। संग्र
हो नामानुकूलग्रहः। अस्मिन्ननुकूले सर्वग्रहा अनुकूला भवंतीत्यर्थः। विग्रह इति॥
विरुद्धाग्रहो विग्रहः। अस्मिन्प्रतिकूले सर्वग्रहाः प्रतिकूला भवंतीत्यर्थः। कर्म इ
ति। कर्मस्वरूप इति यावत्। एतत्कर्मैतद्ब्रह्मेति श्रुतेः। सर्वधर्मनिवासन इति। सर्वाश्च
धर्मास्तान्वितरां वासयतीति तथा। मुख्य इत्यर्थः। मुक्त इति। सदामुक्त इति यावत्। देह इ
ति। देहस्थ इत्यर्थः। यद्वा। दशब्देनोपनिषदुक्तं दकारत्रयं उच्यते। दमो दानं दयेति। न

त्रितयमीहन इतितथा। दमदानदयाचेष्टाध्यायकइत्यर्थः। दहर्द्धिरिति। दहरुद्धिर्यस्या
सतथा। तस्यांगन्भूताः सर्वादेवताइंद्रादयःऽन्निचक्रान्नवंतीत्यर्थः। यद्वा। कश्चिन्मृदोनाम
राजासीत्तत्पुत्रोमाईः। तेनधन्यमुनेर्विद्या गृहीता। तस्यमुनेर्धर्मन्यविनामपुत्रासीत्। ततो
मदनातुरोराजातयानिवारितोपितांचकमे। ततोधन्यमुनिनाशप्तोगलत्कुष्टोभ्नवेति। त
तोदुःखितनानेकानितीर्थानिकृतानि। नशाम्यतिविकारस्ततोगोकर्णेश्वरस्थानेस्नान
मात्रेणदेहस्यपरमावृद्धिः समपद्यत। अतएवदेहर्द्धिरिति। इयंकथाब्रह्मांडपुराणेप्रसि
द्धा। सर्वकामदइति। सर्वान्कामान्ददातीतितथा। सकलवांछितदातेत्यर्थः। यद्वा। सर्वा
न्कामान्द्यतिखंडयतितथा। सर्वकामनिवारकइत्यर्थः। यदाचैवविलीयंतेकामायः ॥५२
स्यहृदिस्थिताः। अथमर्त्योऽमृतोभ्नवतीतिश्रुतेः। सर्वकालप्रसादइति। सर्वकालंप्रसा

दोयस्यसतथा। कदाप्यस्याप्रसादोनभवतीत्यर्थः। सबलइति। बलेनसैन्येनसहवर्त्तत
इतियावत्। बलरूपधृगिति। बलंसैन्यंतस्यरूपंयोधारयति। सएवनानासैन्यरूपंधत्ते
नतुततोन्यद्भिन्नकंकिंचिदस्तीत्यर्थः। आकाशनिधिरूपइति। आकाशशब्देनव्यापकं
वस्तुमात्रंनिधिशब्देनवस्तुमात्रंनिधिशब्देनवस्तुमात्रंतद्रूपः। अपरिछिन्नपरिछिन्नस्व
रूपइत्यर्थः। निषादीति। निषादाःपरिवारकतयाविद्यंतेयस्यसतथा। स्वयंनिषादोभ्नू
त्वानिषादपरिवारकवानपिजातइत्यर्थः। कदाचिदर्जुनः। पाशुपतविद्यांगृहीतुंश्रीरुद्र
माराधितवान्। तदाश्रीरुद्रोभ्नक्तपरिक्षणार्थं निषादरूपंधृत्वाबालनिमित्तमर्जुनेनवि
वदमानःपश्चात्तुष्टोवरंप्रादादितिभारतेप्रसिद्धं। उरगइति। उरगःसर्पइतियावत्।
श्रीरामःप्रत्यहंमहेशलिंगमर्चयित्वान्नमुंक्तइतिनियमः। कदाचिद्वतान्हिकश्रीरामः

द पूजन्नयागतः तत्रप्रासादमध्ये लिंगस्योपरि महाविषज्वालाजटिलमपरतक्षकमिवस
र्पं ददर्श। ततो रामेण तमवगणय्यन्नक्षिप्ता वेन श्रीरुद्रप्रक्षालननायकरेणनिवर्त्तितः। ततः स
र्पदष्टो रामः श्रीशिवपूजां विधाय निःशंकाः स्थितस्तौ। ततो रुद्रः प्रसन्नः श्रीरामाय वरं दत्तवा
न् त्वनाममात्रोच्चारणेन पुरुषस्य कालो नयं यास्यतीति। इयं कथा त्र्यंबकमहात्म्ये प्रसिद्धा
। खग इति। खं गच्छतीति तथा। अष्टमूर्तित्वादाकाशो र्थापितन्मूर्तिः। यद्वा। खगः पक्षीति यावत्
। कदाचिद्विष्णुनोक्तं। अहं त्वां प्रति किंचिन्न ब्रवीमि। ततो रुद्रो हंसरूपं विचित्रं विधाय नवानां
मोहयामास। ततो जगदंबिकयोक्तं। कस्त्वं पक्षीति। ततो रुद्रः स्वकीयरूपं दर्शयामास। उवा
च चाहमयं पक्षीति। ततो लक्ष्मीनानवानीति कौतुकं। इयं कथा गोदावरीखंडे हंसेश्वरमाहात्म्ये
टो प्रसिद्धा। रौद्ररूपीति। रौद्रं रूपमस्येति तथा। जैर्यीरग ब्रह्मकपालान्नस्मादिरौद्रं पांशुरिति। ॥४४॥
पांशुः सूक्ष्मः परमाणुवद्दृश्य इति। यावत्। अणोरणीयानिति श्रुतेः। आदिरिति। सर्वस्मात्पूर्व

रूपं २

इत्यर्थः। सदैवासौ मय्यदमग्र आसीदिति श्रुतेः। अहमेवासमिति च। वसुरिति। वासयति सर्वं
स्वप्रभया सुरनीकरोतीस तथा। अग्निरिति। अष्टमूर्तित्वात् सर्वदेवमुखत्वेन भगवतो प्यग्निरव
छा मुखं। यद्वा। विश्वानरः कश्चिच्छांडिल्यगोत्रो नाम ब्राह्मणः सदाचारः स तस्य स्त्रीश्चिष्मत्यापत्न्या
पुत्रं प्रार्थितः तदाकारोगत्वा श्रीमहेशान्नक्षिप्तवा गुणसंपन्नं पुत्रं लब्धवान्। ततः कस्मिंश्चिद्दि
वासनारदेनागत्योक्तं एतस्य तव पुत्रस्य वज्रान्मृत्युस्ततो दंपत्योर्महानुतापः समजनि। ततो
बालेनाक्तमहंमृत्युं नाशयामि ततो मृत्युंजयं जजाप। ततो रुद्रो देवेंद्ररूपं धृत्वा समागतः
प्रोक्तं। वरं वृणीष्वेति। ततोक्तं श्रीरुद्रव्यतिरिक्तेणान्यं न याचेइंद्ररूपेणोक्तं मत्तः कोपरो रुद्रः त
तो वज्रेन निःक्षिप्तमुमूर्छे पश्चान्महेशेनोक्तं। अहं शंभुरिदं रूपं धृत्वात्रागतो मा भैषीः ततो
महेशेन मृत्योरक्षितः तत स्थापितं लिंगमग्निलिंगमिति स्कंदे काशीखंडे प्रसिद्धा। विस्तर
भयादुद्देशमात्रं दर्शितं। सुवर्चसीति। सुष्टु शोभनं वर्चस्समस्येति। वसुवेग इति। वसुद्वं

यस्मा

तस्य वेगोऽस्येति। भक्तेभ्यो द्रविणं दातुं सत्वर इत्यर्थः। अतितरवेगवानित्यर्थः। एतेन व्यापक
त्वपरिच्छिन्नकार्यमुक्तमीश्वरत्वात्। यद्वा। महान्वेगो यस्मात्स तथा। जीवस्य वेगः सत्वरता यद
धीन इत्यर्थः। महायज्ञ इति। महांश्चासौ यज्ञश्चेति तथा। यज्ञो वै विष्णुरिति श्रुतेः। विष्णुर्यज्ञोऽयं
तु महायज्ञः यत्प्रातिकूल्येन दक्षयज्ञवत्सर्वे यज्ञा नश्यंति विपरीतफलदा भवंतीत्यर्थः। निशा
कर इति। चंद्रस्याष्टमूर्तित्वेन निशाकरत्वं। यद्वा। निशा प्रलयदशा तदाधायकः प्रलयक
र्तृत्वं तद्विशेषकालप्रेरकत्वं च भिन्नमिति निसंकरः। सर्वभाव इति। सर्वे भावाः षट्पदार्था द्रव्या
दयो वैशेषिकसमयसिद्धास्ते तथा। तथा चोदयनाचार्यः। यतो द्रव्यं गुणाः कर्म तथा जातिः प
रापरा। विशेषाः समवायश्च तमीश्वरमुपास्महे इति। यद्वा। भावो मनः सर्वेषां मनसोंतरात्म
त्वेन स एष आत्मा मनोमय इति श्रुतेः। प्रियावास इति। प्रियस्य ज्ञनमस्यां वासः। यद्वा। प्रिया
भवानी तस्याः आवासः स्थानं। भवानीहृदयान्तर्वर्तीत्यर्थः। अर्द्धनारीश्वरत्वात् प्रियावासः ॥४॥

उपदेशकर इति। उपदिश्यतेऽनेनेत्युपदेशो वेदः तं करोतीति तथा। ईशानः सर्वविद्यानामिति
श्रुतेः। वेदकर्तृत्वं च न्यायवेदांतयोः प्रसिद्धं। विस्तरस्तु भयान्नोच्यते। वेद नित्यपक्षेऽपि लीनस्यो
द्बोधकत्वमीश्वरस्यैव नान्यस्य। हर इति। हरति पापमिति। मनुरिति। मनुशब्देनात्र मन्वादि
सकलस्मृतीनामप्ययमेव प्रामाण्याधायको मनुरवदत्तद्भेषजमिति श्रुतेः। आत्मपतिरिति॥
आत्मैव पतिः यस्य स तथा॥ आत्मनो वा पतिरात्मपतिः एतेन स्वयं दासास्तपस्विनः। स्वयंभूरिति
वदस्यान्यः कश्चित्पतिर्नास्तीति द्योत्यते। स्वतंत्रो देव। यद्वा। आत्मशब्देन मनस्तस्य पतिरवभा वा
भासकस्यापि मनसो जडत्वादवभासनाशक्तेरतेनैवावभातं मनो भासयतीत्यर्थः। लोक
संभोज्य इति। भुज धातोः पालने। तस्मात् लोकपालक इत्यर्थः। सहस्रद इति। असंख्यातप्रदः॥
पक्षीति। पक्षो अस्यास्तीति भक्तपक्षपातीत्यर्थः। पक्षिणः। पूर्वपक्षसिद्धांतलक्षणं प्रत्यक्षतो

वेत्तीत्यर्थः। पक्षिणः पक्षं निरूपयति स तथा। एतेन स्वपरसिद्धांतलक्षणनिरूपकत्वमस्येत्यर्थः
अतिदीप्त इति। अतितरां दीप्तः परमोद्योतवानित्यर्थः। उन्माद इति। नमो निषादेभ्य इति श्रु
तेः निषाद उन्मादः। यद्वा। उत् अधिकां मां लक्ष्मीं ददातीत्युन्मादः। अधिकलक्ष्मीदायक इ
त्यर्थः। यद्वा। अधिकां शोभां ददातीति तथा। उत् उन्मार्गगामिनी मा लक्ष्मीर्विद्यते येषां त उन्म
त्तान् अत्तीति तथा। उन्मार्गलक्ष्मीकपुरत्रयनाशक इत्यर्थः। उत् अतिक्रांता मा ज्ञानं स्वविषयं
परित्यज्य। विषयांतरालंबनं ज्ञानं अयं सर्प इत्यादि मिथ्याज्ञानं तत् द्यति खंडयति वा मिथ्या
ज्ञाननिवार इत्यर्थः। मदनाकर इति। सुंदर इति यावत्। यद्वा। मदनमाकारयति स्वरूपं प्राप
मदनं यति। पुनः स्वष्टार्थमिति तथा। भस्मसात्कृतं पुनर्जीवयतीत्यर्थः। अर्थानर्थकर इति। अर्थश्चा
नर्थश्चार्थानर्थौ तौ करोतीति। एष वा साधु कारयत्येष वा साधु कारयतीति श्रुतेः। नर इति। न ॥३६
त्रियते विक्षिप्यते प्रपंचरचनार्थमिति। मायाविक्षेपक इति वा। अंतर्गन्तिनिणिजयति। वामदेव

इति। वामो वक्रो देवः स तथा। सकलदेवेभ्यो विलक्षणस्वभाव इत्यर्थः। वाम इति। वक्रगतिः
स्मशानवासादिना। प्राग्दाक्षिण्य इति। प्राक् पूर्वं विद्यमानं दाक्षिण्यं चातुर्यं यस्य स तथा।
अनादिचातुर्यवानित्यर्थः। वामन इति। परिणयनसमये पार्वतीविलोभनतीति वामनं रूपं त
नमिति कथा शिवपुराणे प्रसिद्धा। सिद्धयोगापहारीति। सिद्धा अणिमादिसिद्धिमंतः तेषां योगं
नियमाद्यष्टांगयोगमपहरतीति तथा। अणिमादिसिद्धिदानेन तेषां योगमपहरतीति। सिद्ध
इति। स्वतःसिद्धो न तु साधनेन योगवित्। सर्वार्थसाधक इति। सर्वानर्थान्साधयतीति। सर्वे
अर्था धर्मादयः। भिक्षुरिति। भिक्षुर्यतिः भिक्षुरूपीति। भिक्षोरूपमिव रूपमस्येति वस्तुतोयं
न भिक्षुः। तच्च भिक्षुत्वं ब्रह्मणो मस्तकच्छिन्ने लोकसंग्रहाय धर्मरक्षणार्थं ब्रह्मकपालं धृ
त्वा भिक्षितवानिति। वा। विषाणीति। विषाणं मृगशृंगमस्यास्तीति तथा। हृत्करिति। सर्वसं
हर्त्तेति यावत्। सर्वसंहर्त्तृत्वं यद्यप्यस्मिन्नाभिविद्यते तथापि हृत्करूपतारोक्तिनसं

करः। अव्ययइति। व्ययोऽपक्षयस्तद्रहित इत्यर्थः। तत्र पूर्वोक्तध्वंसप्रतियोगित्वेन नापा
नरूक्तं। महासेनइति। महतीसेनास्येति। गणरूपासेना। अथवासेनान्यैक्योपचारेण
महासेनः। विषाणइति। विषाणं अनतीति तथा। धूतगरलोऽपि निरंतरं जीवितवान्। षष्टि
रिति। षष्टिस्वरूप इति यावत्। पुराणांतरेणानाद्येव परमेश्वरेण स्वसमानानि षष्टिसंख्या
कानि रूपाणि धृतानि वासिष्टरामायणेऽपि। अनेकरुद्रा एकस्यैव रुद्रस्याभूवन्निति। नागइ
ति। नागो नाम तं गच्छति प्राप्नोतीति स तथा। सर्वेषु देवेषु मध्ये यो नाग इममेव प्राप्नोति। नान्य
त्र कश्चिन्नागो नाम प्रार्थयते। शान्ता पुनः स्वकीयशोभा नानावरं दृष्ट्वा इममेव गच्छतीत्यर्थः
। गवांपतिरिति। गवां पशूनां गवां वाणीनां वा पतिः स तथा। इममेवाधिकृत्य वाणी प्रवर्त्तत इत्यर्थः।
वज्रहस्तइति। वज्रं हस्ते यस्य स तथा। शक्राय वज्रमनेनैव दत्तमिति शिवपुराणप्रसिद्धिः। वज्रम ॥४९
न्नं वान्नकेल्योदद्दानीति। शिवलकः। दधिनानन्वतीत्यर्थः। प्रतिष्ठंन्नीति। प्रतिष्ठंल्लनं प्रतिष्ठं

मधुरिति। ६

स्तंभनः सविघ्नेयस्य स तथा। मंत्रकीलनेन मंत्राणां स्तंभनं कृतं। चमूस्तंभनइति। चमूं स्तंभ्नाति स तथा। सेनास्तंभनकृदिति यावत्। सेनान्यस्य मूर्द्धन्यैरान्निवारेण स्तंभिताः ततो
देवगणैः श्रीमहादेवस्तुतेन तस्याः पुनरुत्तंभनं जातं। तारकसंग्रामसमये इयं कथा शिव
पुराणे स्ति। ऋतुरिति। सर्वात्मकत्वाद् ऋतुरप्ययमेव। नो चेद् ऋतूनां कुत इदं सामर्थ्यं यत् पुष्पफ
लादि प्रसूते। ऋतून् वसंतादीन्। करोतीति तथा। कालइति। कं सुखं आसमंताद्याति गृह्णातीति का
लः। सर्वसुखनिधानमित्यर्थः। मधुकरइति। भ्रमरो यथा नानाविषयानुगृह्णाति तद्वत्। अयमपि
सर्वविषयोपभोक्तेत्यर्थः। दृष्टांतस्तु किंचित्सामान्यमात्रेणोपपन्नः। बलइति। बलवानित्यर्थः॥
वानस्पत्यइति। वनस्पतिसंबंधी। वनस्पतयः सर्वे श्रीमहादेवाधिष्ठिताः फलपुष्पे प्रसवते। वाजि
सनो इति। वाजियुक्तासेनाऽस्येति। तथा। नित्यमाश्रमपूजितइति। आश्रमचतुष्टयेन ब्रह्मचार्यादिना आश्र
मिणो लक्ष्यंते। नित्यं तैः पूजित इत्यर्थः। यद्वा। मालक्ष्मीः तस्या आश्रमः स्थानं तेन नित्यं पूजितः। ब्र

हरिः

ह्मचारीति। ब्रह्मचर्यवानिति यावत्। लोकबंधुरिति। लोकानां बंधुरिव बंधुः दुर्दशायां सहायक
र्तृत्वेन। सर्वचारीति। सर्वत्रचरक इत्यर्थः। सुचारविदिति। सुचारो व्यवहारः। ज्ञानेन व्यवहारवे
त्तेत्यर्थः। ईशान इति। विद्यानां प्रभुः। ईशानः सर्वविद्यानामिति श्रुतेः। ईश्वर इति। अत्र निरंकुशा
मैश्वर्यमिति निगतार्थता। काल इति। कं वायुं आ समंताल्लाति मूर्तिविन गृह्णातीति तथा। निशाचा
रीति। निशासु चरतीति तथा। रात्रौ भूतपतिः सर्वत्र क्रीडत इत्यर्थः। अनेकधृगिति। अनेकधार
क इत्यर्थः। निमित्तस्थ इति। अत्र निमित्तशब्देन कारणमात्रमुच्यते। तत्र तिष्ठतीति तथा। सर्वाणि
कारणानि यदधिष्ठितानीत्यर्थः। नमः कुलालेभ्य इति श्रुतेः। निमित्त इति। कारणरूप इत्यर्थः।
महा। पूर्वस्मिन्नाम्नि निमित्तस्थ इत्यनेन निमित्तकारणाधीनेनैवेनोपादानकारणत्वमुक्तं। उपा
दानकारणमपि निमित्ताधिष्ठितमेव कार्यं जनयितुमलं। अत एव निमित्ततो भ्रान्तं भवति। एतेन ॥६५
विदांत्यभिमतमुपादानत्वं निमित्तत्वं चोक्तं। नंदिनंदिकर इति। नंदिनं गणं नंदिनमानंदवंतं करोती

ति तथा। यद्वा नंदिनं समृद्धं करोतीति तथा। हर इति। हरत्यविद्यामिति हरः। नंदीश्वर इ
ति। नंदिन ईश्वरः स तथा। नंदीति। स्वयं नंदिरूपो जात इति पुराणप्रसिद्धिः। नंद आनंदस्त
मितः प्राप्त इत्यर्थः। नंदिवर्द्धन इति। नंदिनं वर्द्धयतीति। अणिमाद्यैश्वर्योपेतं करोतीति तथा।
भगस्याक्षिनिहंतेति। भगः सूर्यः तस्याक्षिप्रतिबंधकः। एकदा सूर्यभार्या संज्ञा गोदावरी
तटे स्वभर्तृवशीकरणार्थमीश्वरमुपासांचक्रे। तत् श्रुत्वा सपत्न्या छायया सूर्याय तन्निवे
दितं। ततो भास्करः स्वपत्नीं संज्ञां दृष्टवान्। कं ध्यायसीति। ततस्तया कमीशानमिति। तत
ः सूर्येणोक्तं मत्तः पर क ईशान अहं जगद्गुरुरिति। ततः सूर्यस्य नेत्रप्रतिबंधो दत्तः ततः
श्रीसूर्यनेत्रप्रतिबंधाज्जगदंधीभूतं जातं। ततो हाहाकार आसीत्। हव्यकव्यादयः क्रि
याः लुप्ताः। स्वाध्यायवषट्काररहिता लोका बभूवुः। जीविकयारहितो लोको जातस्ततः स
र्वे देवाः र्यं पुरस्कृत्य कैलाशं गत्वा भवानीपतिं तुष्टुवुः ततो महेशेनोक्तं कथमत्राग

प्

नीप्रार्थना।अयंजगच्चक्षुःपश्चाद्दृष्टएवभास्करउवाच।स्वामिन्नहंजगतश्चक्षुःत्वगो
क्तंतथ्यामेव।परंतुत्वंमदीयंचक्षुःत्वंतुजगदतीतः एवमुक्तेऽकटितिप्रतिबंधमपगामसाव
लोकाईशांचक्रिरे।इयंकथागोदावरीमाहात्म्येसूर्यतीर्थमाहात्म्येप्रसिद्धा।यद्वा।लग
श्चंद्रःत्वंनक्षत्रंगच्छतीतिव्यक्तत्वात्।तस्यापिहिनिहंता।एकदामहेशमाराधयिषवःस
र्वेदेवाःकैलाशंजग्मुः।तदात्वान्याक्रीडमानेरुद्रेकस्मिन्नमध्येस्वामिनंविज्ञपय
ति।तदाचंद्रेणोक्तं।निर्जितकामावयंकामासक्तंप्रत्यागताः।आहापश्यंतुकौतुकं।तदा
चित्तस्थेनश्रीरुद्रेणतस्यमतिभ्रंशोजनितः।कामांधःसन्गुरुनार्यांधर्षितवान्।कलंकी
जातः।कथाविस्तरतोनलिख्यते।ग्रंथगौरवभयात्।इयंकथाचंद्रभागामाहात्म्येप्रसि
द्धा।यद्वा।भगोनामसूर्यःतद्दृक्निहंता।यदारुद्रंप्रत्यभिमानःक्रियते।तदामतिभ्रंशो ॥४५
भवति।तेनचसर्वस्वापहारः।यथाबाणस्यश्रीरुद्रकृपयामहत्यैश्वर्यसंपन्नेस्वामिनं

प्रत्येचबाहुबलंदर्शितं।ततोभगवताश्रीनारायणमवतार्यतदैश्वर्यमपहृतमियंकथाहरिवंशे
प्रसिद्धा।कालइति।कालान्तत्कमरांजनद्युतिनिलमित्यागमप्रसिद्धेरुद्रस्यश्यामरूपमितिकालः।
ब्रह्मविदांवरइति।ब्रह्मवेदःवेदांतशास्त्रगम्यंप्रपंचातीतंसन्मात्रंवामेवस्तुतद्विदंतितेब्रह्म
विदःसनकादयःतेषांवरइति।वरश्रेष्ठवाद्वरइति।नतुनिर्द्धारणेषष्ठी।तस्यस्वयंब्रह्मरूपत्वा
त्।लीलाविग्रहणवातेषांमाध्यश्रेष्ठोवाभवतुनकश्चनदोषः।चतुर्मुखइति।चत्वारोवेदामु
खेयस्यसतथा।धर्मादयःपुरुषार्थावा।विधिनासहोपचराद्वा।महालिंगइति।महल्लिंगंयस्या
सौमहालिंगः।एकदा[illegible]मुनीनांगृहेप्रत्यहंनग्नोभिक्षार्थंगच्छति।तत्पत्न्योलज्जयावाङ्मुखा
स्तिष्ठंति।तदातच्छापात्लिंगपातेकृतेलिंगेनपातालम्नोद्राब्रह्मांडंदग्धुमारब्धंतदासर्वैः ने
र्देवैर्नारायणप्रमुखैःस्तुतोसतायांलिंगसंवरणंभवान्याकृतं।इयंकथावालिखिल्यमाहात्म्ये
स्कंदेप्रसिद्धा।यद्वा।शांत्यादिगुणयुक्तस्यरुद्रस्यकदाचित्सृष्टिविषयिणीइच्छाजाता।ततोना।

रायणं स्रष्टुं सर्गार्थमादिदेश। ततो विष्णुना विरंचौ स्रष्टे तामस्या राजस्यः सात्विका प्रजा बभूवुः
ता उन्मत्ता दृष्ट्वा कुपितेन हरेण स्वलिंगं छिन्नं। तत्तदार्द्धनारीश्वरत्वेन लिंगं पूजितमिति महा
लिंग इति कथा शिवपुराणेऽस्ति। यद्वा। लिंगस्य महत्त्वं वर्ण्यते। एकदैकार्णवे ब्रह्मा पर्यटन् क्षी
रसागरं गतः तत्र विष्णुं प्रत्युवाच। अस्मिन्नेकार्णवे कस्त्वमेकस्तिष्ठसि निर्लज्जवांश्चेन्मया युध्यस्व
।ततो विष्णुनोक्तं कस्त्वं वराकोऽहमेवेश्वर इत्यादि विवदमानयोः सतोर्महल्लिंगं प्रादुर्भूतं। तत्रते
जोराशौ रुद्रेण व्यक्तीभूयोक्तं। कथं विवदतो हे रे मदीयलिंगस्य निरीक्ष्यायाहि। त्वमेव श्रेष्टः। त
तो विधिं प्रत्युवाच। मदीयलिंगस्य मूर्द्धानं निरीक्ष्यायाहि। त्वमेव श्रेष्टः। ततः कियंतं कालं भ्रांत्वा
श्रांता वागत्यानोउष्टुवतुः। ततो वरो दत्तो विष्णोर्योनकाले ब्रह्मा मोक्षारणं करिष्यति सम्भुक्तो
न्नविष्यतीत्यादि बहु विधिं प्रत्युक्तं त्वामावान्यां दृढं ज्ञास्यति लोकः। इयं कथा शिवकोमाहा ।।५०
त्म्ये प्रसिद्धा। महालिंग इति। सर्वेषां देवानां मूर्तिः पूज्यते महादेवस्य लिंगमित्यत्र कथानकं।

ती२

पूर्वमेकार्णवे जाते ब्रह्मविष्णुरुद्रमूर्त्तय एवावशिष्टाः सर्वमन्यन्नष्टं। किं बहु मायादृश
प्रलयक्रमस्त्वादृशोनक्रमेण प्रलयो जातः। ततो विष्णुविरंची महेशं तुष्टुवतुः। सा स्तु
तिर्ग्रंथगौरवभयान्न लिखिता। ततः श्रीशंकर प्राह। अहं सर्वकार्यसाधकस्तुष्टो वरं
वृणीध्वं। ब्रह्मणोक्तं। तेजस्त्वं सृष्टये निवशाय तत्र वयं वस्यामः। ततो रुद्रेणोक्तं। प्रजास
र्गं विना किमनेन लिंगेन त्यक्त्वा पृथिव्यां त्यक्तं। ततो लिंगं पृथिवीं त्वाकाशमगमत्। त
तो विष्णुर्लिंगस्याधो वेष्टुं गतो ब्रह्मा चोर्द्ध्वं गतः केनापि पारो न प्राप्तः। ततः आकाशवा
णी जाता। इदं लिंगं महत्पूज्यं वांछितार्थप्रदायकमिति। तदनंतरं विष्णुप्रमुखैरिदं
लिंगं पूज्यते। ततो विष्णुविरंचिभ्यां लिंगं स्तुतं। ततो विष्णोः सर्वदुर्ज्जयत्वं प्रजापालन
त्वं च ददौ। ब्रह्मणे प्रहृष्य सृष्टित्वं ददौ। इयं कथा शिवपुराणे प्रसिद्धा। चारुलिंग इति। चा
रुसुंदरं रु.वे प्रमाणेन्यः। अथवा तत्त्वमस्यादिवाक्यं प्रतिपादकतया लिंगं प्रमाणं यस्य स त

था॥यद्वा॥चारुणाबुद्धिपरिमाणेनलिंगितेज्ञायतइतिसतथा॥लिंगाध्यक्षइति।लिंगमध्य
क्षइतिश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांमध्येश्रुतेःपाश्चात्यमितरेभ्यः।प्रमाणे
भ्योमुख्यंलिंगमेवतेनप्रत्यक्षीकर्तुंशक्यतइति।अतएवप्राणइतिसूत्रेप्राणशब्देनपरमा
त्माबोध्यते।परमात्मनोलिंगं।यद्यपिशब्दात्परोक्षमेवज्ञानमुत्पद्यतइतितार्किकादयस्त
थापिवेदांतशास्त्रशब्दादेवपरोक्षधीरुत्पद्यतइतिसिद्धांतः।एवंसतिशब्दादपरोक्षा
ज्ञानेउत्पन्नेप्यसंभावनादिदोषनिवृत्त्यर्थंमननाद्युपायोगः।आईमरीचिज्ञानन्याय
नोत्पन्नमपिज्ञानमनुत्पन्नप्रायंभवति।ततःशब्दादपरोक्षज्ञानंभवत्येवेति।सुराध्यक्षइ
ति।सुराणांदेवानामध्यक्षः।प्रत्यक्षः।यद्वा।सुराःसात्विकोवृत्तयःतासामध्यक्षःसात्वि
दं कांतःकरणश्रीचंद्रचूडआविर्भवति।नान्यथेत्यर्थः।इत्थंव्याख्यानंश्रीशंकराचार्यचर ॥५१॥
णैः।द्वयाहप्राजापत्यादेवाश्चासुराश्चेतिबृहदारण्यकं।लोकाध्यक्षइति।लोकानामध्य

क्षइति।लोकानामध्यक्षः।यद्यपिलोकाध्यक्षायमनयाभगवानजानंति।तथापिसर्वभा
सकतयातेषामध्यक्षः।यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः।युगावहइति।युगानिकृता
दीन्यावहतीतितथा।कृतादियुगनिर्वाहेत्यर्थः।बीजाध्यक्षइति।बीजंब्रह्मास्रष्टृत्वा
त्तस्याध्यक्षः।यद्वाबीजंनामप्रतिपादकंवाक्यं।यतोवाइमानिभूतानिजायंतइतितन्ना
ध्यक्षइति।बीजकर्त्रेति।बीजंब्रह्मातत्कर्त्तायोवैब्रह्माणंविदधातिपूर्वमितिश्रुतेः।अ
ध्यात्मानुगतइति।अध्यात्मंनामात्मानमधिकृत्यप्रवृत्तंशास्त्रमात्रंसांख्यादिशास्त्रं
तेनानुगतोज्ञातः।अचलइति।नचलतीत्यचलः।जायतेस्तीत्यादिभावविकारेषुचल
त्वंनामवृद्धिलक्षणाविकारोनिवारितः।यद्वा।पूर्वंवसिष्ठधेनुर्नंदिनीगर्तेपतितामहा
रसातलेनांदिदृक्षुर्वसिष्ठोबभ्रामततोमरुस्थल्यांगर्तमध्यपतितांदृष्ट्वास्वसामर्थ्येनो

ध्यातवान् । ततस्तद्गर्त्तपूरणाय हिमाचलं प्रार्थितवान् । ततो हिमगिरिरर्बुदमाज्ञापयामास ।
अर्बुदस्तु गर्त्तमध्य एव पतति । तत्रारण्यं यद्दानलेन्नो । तदा वसिष्ठेनानेकदिव्यवर्षाणि तपश्चीर्णं
न ततः प्रसन्नेन श्रीरुद्रेण वरं याचेत्युक्ते स्वामिन्नर्बुदमचलं कुरु । पश्चात् श्रीमहादेवोऽचले
श्वररूपं ध्यात्वा तत्र स्थितवान् तद्गर्त्तमध्यादुपरि व्यक्तीकृतं लिंगं तदचलमिति लिंगमिति
कथार्बुदमाहात्म्ये प्रसिद्धा । इतिहासकर इति । इतिहासं भारतादि तत्करोतीति । यद्यपि
भारतनिर्मातृत्वं कृष्णद्वैपायनस्य प्रसिद्धं तथापि तस्य त्वदनुग्रहेणैव । यथा च श्रुतिः । ग
निःश्वसितमस्य भारतेतिहासः पुराणमिति । कल्प इति । चतुर इत्यर्थः । दक्ष इत्य
त्र व्यवहारचातुर्यमिति । अत्र तु लक्ष्णानां परमार्थबोधने चातुर्यमिति न संकरः । गौतम
त इति । गौतमेन महत्तपः कृतं ततः संप्रसन्नेन रुद्रेण गंगा दत्ता । तां गंगामानयामास । त ॥५२

न

त्र्यंबकस्थानं महत्तीर्थं । तत्र पुनरपि गौतमीतटे तपश्चचार । ततः प्रसन्नेन रुद्रेणोक्तं । वरं
वृणीष्वेति ततो गौतमेनोक्तं । तथा कुरु स्वामिन् यथा त्वां लोका मां च त्वद्रूपेणैव पश्यं
ति । ततो गौतमो रुद्ररूपो जात इति । आराधा गौतम इति ज्ञायते । इयं कथा त्र्यंबकमाहा
त्म्ये प्रसिद्धा । जनेश्वर इति । जनानीश्वरः जना महाजना निरुपपदजनशब्दात् । यथा भा
रतं महाभारतं त्विति । ईश्वरो महेश्वर इति । तेषां मन्वादीनामीश्वरः । यद्वा पयातेषां धर्मबो
धकत्वं । दंभ इति । अन्यो दंभेन लोकान् प्रतारयत्यनेन दंभरूपमेव धृतमिति । वेदविरुद्धा
गमदर्शनेन स्वविश्वासान् जनान् हतवान् । एकदा सर्वे देवा ब्रह्मविष्णुप्रमुखाः श्रीकंठं द्र
ष्टुं कैलाशं जग्मुः । ततो द्वित्राः श्रीकंठं द्रष्टुं गच्छंति । तावत्तावद्दंतवृद्धः स्वप्रकाशः पूर्णानं
दोऽस्ति । तादृगेव दृष्टः पश्चादन्ये समागतास्तैश्च तादृशि दृष्टे यद्देवानामसुरत्वं तेन परा

न्नूता असुरान्घातयित्वमागताः सर्वे देवैः शिथिला जाता। इंद्रादयश्चात्मविचारं कर्त्तवंत-
ताता दैत्यैस्तामसैः सर्वं देवराज्यं गृहीतं। ततो विष्णुना ब्रह्मणा सह विचारितं। किं कर्मीव
यं श्रीमहेशेन क्षणमात्रं किं चिन्निजरूपे दर्शिते एते साधनचतुष्टयसंपन्ना जाताः स्त्रष्टेः
कागंतिरितिपश्चाद्भुल्लान्यां महेशः स्तुतः स्वामिन् देवा आत्मजिज्ञासवो जाताः। किंकर
णीयं। ततो महादेवेनोक्तं विष्णो मत्स्वरूपं गोपाय यथा लोकास्त्वत्तो मां न जानंति मामव
जानंति तथा कुरु। अहमपि मदीयं रूपं वक्ष्यद्भिः प्रकारैर्गोपायामि। ततो नारायणेन कल्पित
पंचरात्रविद्या नारदमुखेन प्रसारिता वेदविरुद्धा। वेदाविरोधिनी उच्छिन्ना। तत्र महाभारत
मेव प्रमाणं। ततो रुद्रेण केचन वेदविरुद्धाः पंथानो दर्शिताः। येन वैदिकमंत्राः। तेषां वसा
मान्यमेव मन्यते लोकः इयं कथा स्कंदपुराणे प्रसिद्धा। युक्तिश्च पूर्वमीमांसायां स्मृतिचरणे पि ॥५३
कल्पितागमानामप्रामाण्यं निरणायि। चतुर्लक्षणं मीमांसायां चद्वितीयाध्यायेपि तथैवा। अ

र्थं दंभ इति। अयूगतौ। गच्छतु दंभ इत्यर्थः। विष्णुस्तु बुद्धरूपेण उपविष्टो दंभोतु यं तु कापालिकरू
पेण वालोदंभ इत्यर्थः। यद्वा। अयं दंभो नाम भाग्यवान् दंभः विष्णुवदंभस्त्व भाग्यवान्। का
पालिकदंभस्तु यथेच्छाचारेण ऐहिकमपि लभते यं तु प्रसिद्धः। तथा निषिद्धमकुर्वन्नैहिक
मपि न लभते। परलोकस्त्विति स्तूलयोः समानैव वै इत्यव्ययं। दंभ इति। दंभयतीति दंभः पूर्वं
दंभकर्तृत्व मुक्तमधुना दंभप्रयोजकत्वमिति न संकरः। वश्यावश्यकर इति। वश्यमवश्यं करो
तीति। तथा। महात्मस्वपि श्रीरुद्रप्रतिकूले ऽवश्यो भवति। यद्वा। वश्यामवश्यं च हृदयमानुकू
ल्यप्रातिकूल्याभ्यां करोतीति तथा। कविरिति। कवित्वं किं भगवन्तया वेदादिनिर्माता। नामांत
रा वेदादि निर्मातृत्वमुक्तमत्र कविता नुकूलशक्तिमत्त्वमिति न संकरः। लोककर्त्तेति। अत्र
लोकशब्देन त्रिभुवनं न कर्त्तेति यावत्। अहरहर्लौकिककर्त्तेति वा। पशुपतिरिति। पशवइं

परंपराप्रसिद्धेश्च विधाद्यपर्यंतंगनेनतस्यकः कर्त्तेत्यत्के महेश एव। तत्रश्रुतिर्नतस्य कश्चित्करणं चनिवृत्तइति। ६

द्रियाणि।तेषांपतिः।यद्वा पशुपतिरिति।पशुधर्माणोनलभंतिब्रह्मचर्येपितास्तेषांपतिः

महाकालइति।महांश्चासौकालेति।यद्यपिलोककालविंदादयःकर्ताइतिनप्रसिद्धास्तथापित

स्यकर्त्तृत्वेतज्जनकःतज्जनकइति।सनातनोयंपुरुषःपुराणइतिश्रुतेः।महौषधइति

।महत्औषधंसंसाररोगनाशनंशिवइतिनामयस्यासौ।तथा।अक्षरमिति।नक्षरतीत्यक्ष

रंप्रणवः।यद्यपिप्रणवस्यशब्दात्मकत्वंतथापितद्विषयस्याविनाशित्वेनैक्योपचारात्प्र

णवरूपतोक्तः।परममिति।ब्रह्मशब्दसामानाधिकरण्येनविशेषणत्वंनामांतरत्वंवातिनिर्दे

शः।नपुंसकत्वंचनोविरुध्यते।परमंब्रह्मेत्येकंवानामनदावश्यकरइत्यत्रनामद्वयंबोधव्यं।

परमामायाशक्तिर्यस्यतत्तथा।यद्वा।परैःशुकादिभिर्मीयतेज्ञायतेब्रह्मेति।बृहत्त्वाद्ब्रह्म ॥५६

बृंहणत्वाद्वा।बलवानिति।बलंसर्वविषयकमस्यास्तीतिसतथा।अकइति।सारग्राहकइत्यर्थः।

नीतिरिति।नीतिर्न्यायशास्त्रंतद्रूपमुपचारात्प्रतिपाद्यत्वेन।अनीतिरिति।नविद्यतेनीतिर्य

त्रेति।कल्पितागमप्रवर्त्तकत्वेन।शुद्धात्मेति।शुद्धश्चासावात्मेति।शुद्धज्ञानविज्ञानसंपन्नेश्वा

त्मायस्यसतथा।ज्ञानविज्ञानसंपन्नएवेश्वरआविर्भवतिनान्यत्रेत्यर्थः।शुद्धमानइति।शु

द्धंदोषरहितंमानंप्रमाणंयस्मिन्सतथा।मनोगतिरिति।मनसोगतिर्यस्मिन्।गतिर्मर्यादा।म

नइतस्ततोधावदपियत्रलीनंननिवर्त्ततइत्यर्थः।बद्धप्रसादइति।प्रसीदत्यासौप्रसादः।ब

द्धानांप्रसादः।बद्धःपूर्णःप्रसादोयस्येतिवा।स्वप्नइति।स्वप्नोनामनिद्रोपस्थापितांतःकरण

जंज्ञानंनिद्राख्याविद्याविवर्त्तोवा।तत्साक्षितयाविश्वतैजसप्राज्ञानांमध्येतैजसः।दर्पण

इति।निर्मलत्वाद्दर्पणसदृशः।गौरादिभिस्तुवर्णमात्रमुक्तंदीतिविशेषस्यात्रेतिभेदः।अ

मित्रजिदिति।मित्रव्यतिरिक्तान्जयतीति।तथा।अर्थान्मित्रसुहृदित्यर्थः।एतेनशत्रुजिदि

त्यनेन नपौनरुक्त्यं। वदकार इति। वदनिमानेत्यर्थः। यद्वा। वशब्देनामृतं तेन। भूनकामः। दश
ब्देन दमो दानं दयेति दत्रयमुच्यते। तेषां कर्त्ता। अत्र समुदितकर्तृत्वमित्येकैककर्तृत्वेन गतार्थता
। सूत्रकार इति। सूत्राणि अल्पार्थसूचनात् तन्निर्माता। सूत्राणि जैमिनिगौतमादिप्रणीतानि। यद्वा
सूत्रशब्देन प्रसवकर्तृणि कारणान्युच्यंते। तानि त्रायत इति सूत्रः लोकप्रसिद्धं कर्तृमात्रं तत्कर्त्ता। ए
तेन सर्वेषां कर्तृणामयमेव मुख्यः। कर्त्तेत्यर्थः। विद्वानिति। वा। त्रीति विद्वान्। यद्यपि ज्ञानमात्रं
प्रतीयते तथापि लोकप्रसिद्धविद्वत्तायात्राप्ययमेव प्रयोजक इत्यर्थः। परंतप इति। परं शत्रुं ताप
यतीति तथा। महामेघनिनादीति। महामेघः संवर्त्तपर्जन्यः तत्सदृशशब्दवान्। महाघोर इ ॥५५
ति। महांश्चासौ घोरश्चेति तथा। अघोर इति। वा। यद्वा। महेशस्यैव अघोरः नाम। अघोरे
भ्यो। घोरेभ्य इति श्रुतेः। वशीकर इति। अवशां वशां करोतीति तथा। अग्निज्वाल इति। अ

ग्निवज्ज्वाला यस्य स तथा। महाज्वाल इति। महतीं ज्वाला यस्य स तथा। अत्र ज्वालाया मह
त्त्वमुक्तं। पूर्वत्र अग्निज्वाला सदृशज्वालावत्त्वमिति भेदः। यद्वा जालंधरो नाम दैत्यो विष्णुप्रमु
खान्निर्जित्य महेशं प्रति युद्धार्थं गतः। तदा तद्भ्रात्रोद्भेदज्वालया सर्वं तत्सैन्यं भस्मसात्कृ
तमियं कथा स्कंदपुराणादिषु पुराणेषु प्रसिद्धा। अतिधूम इति। धूममतिक्रांतः धूमशब्दे
नात्र धूममार्गविशांतीति श्रुत्युक्त धूमादि मार्गमुच्यते। अत्र पूर्वेण नाम्ना महाज्वाल इत्यनेना
र्चिरादिमार्गप्राप्यत्वमुक्तं। अतिधूम इत्यनेन धूममार्गप्राप्यमुक्तमिति भावः। हुत इति। हुतम व
स्मिन्निति तथा। हविरिति। हविःस्वरूप इत्यनेन सर्वात्मकत्वं व्यज्यते। वृषण इति। वृषं धर्मं न
यति प्रापयति स तथा। शंकर इति। शं सुखं करोतीति तथा। वर्चस्वीति। वर्चःशब्देन ब्रह्मते
ज उच्यते। तद्वानित्यर्थः। धूमकेतन इति। अग्निरूप इति यावत्। अष्टमूर्त्तित्वेन। नील इति।

कालइत्यर्थः। अत्रार्थद्वयप्रतीत्यायद्यपिश्याम॰त्वमुक्तं। तथापिनीलश्यामायानंदिमंगीकृत्यो
क्तं। अंगगुह्य इति। अंगान्यत्रपंचषट्वातानगुह्गुह्यः पंचांगोपासनयाषडंगोपासनयावाप्रस
न्नोनवतीत्यर्थः। शोनन इति। सुंदर इतियावत्। अरिरिति। अर्थात्स्वपराङ्मुखानां। अवध इ
इति। धांन्यादिशोषणांप्रत्यपिदत्तत्वादयामवमुख्यो। वध इत्यर्थः। स्वस्तिद इति। स्वस्तिद
दातीतितथा। कल्याणदायकइत्यर्थः। स्वस्तिमानिति। स्वयंकल्याणयुक्तः स्वस्तीति स्वस्तिम
त्वंपूर्वमुक्तमिदानींकल्याणरूपत्वेनआनंदइत्यर्थः। नागीति। नागोनंदोविघ्नेयस्यसतथा
।यद्यपीश्वरानंदानास्त्येवतथापिनक्तपक्षपातिचाङ्गेदमात्रंकल्पितंविघ्नत इत्यर्थः। नाग
करइति। नागानामनंदस्तंकरोतीतितथा। यद्यप्ययंसजातीयविजातीयस्वरूपनानात्वरहि ।।५६
तस्तथाप्यन्यानाद्यनिर्वाच्यांमायामवलंब्यनंदंकरोतीत्यर्थः। लघुरिति। हिश्वासगैस्वान्निकुव

विभूतिधारणादिलघुचेष्टाकर्तृत्वेनलघुः। उत्संग इति। उद्गतः संगोयस्मात्सतथा। असंगोह्य
यंपुरुष इतिश्रुतेः। संगरहितइत्यर्थः। महांग इति। महांत्यंगानियस्यसतथा। अंगानिनंद्यादी
नि। महागर्त्त इति। महान्गर्त्तः प्रपंचलक्षणोऽस्येतितथा। पर इति। परउत्कृष्टइतियावत्
।युवेति। सदामध्यमवयस्क इत्यर्थः। तत्रूवर्ण इति। यावत्तत्रूक्तोनारायणः तस्यवर्णोऽ
क्षराणियस्यसतथा। नारायणसमानोवार्णोयस्य। यैरक्षरैर्नारायणस्वरूपंबोध्यते। तै
रेवश्रीमहेशोऽस्येत्यर्थः। सुष्टुत्रोनननोवर्णोस्येतिकर्पूरगौरत्वात्। इंद्रियंसर्वदेहिनां।
मितिसकलदेहिमात्रस्यज्ञानसाधकइत्यर्थः। महापाद इति। महांतः पादाश्चरणायस्य
कृ सतथा। यद्वा। विराड्रूपत्वेनलिंगपुराणोक्ताः पृथिव्यादयः पादाअस्येतिसतथा। महाह
स्त इति। हस्तशब्देनात्रव्यापारोलक्ष्यते। महाव्यापार इत्यर्थः। महाकाय इति। प्रपंचशरी

रइत्यर्थः। महायशा इति। महद्यशो यस्य स तथा। यद्यपि महेशस्य यशो महत्त्वं चतुर्दशसु विद्या य॰श॰
सुगीतं तथापि दिग्मात्रमुच्यते। पूर्वं सुद्युम्नसुतो बभूव चक्रवर्ती। कदाचित्तद्गृहं दृष्टेण बिं
दुर्गतिः। तत नष्टश्च मनावती समृद्धिस्तत्र कुतः। राजो वाच। पूर्वं महं व्याधश्चासं सुव्याडनामा।
तदा मया हतानां प्राणिनां संख्यापि कर्तुं न शक्यते। मेरुतुल्यानि पापानि तदाहं मृतो यम
लोकं नीतो यदा मां किंकरा नरके पातयंति तदा चित्रगुप्तेनोक्तमेतस्य पुण्यं महदस्ति। यत्व
णि व्रातसमाप्य आहारं प्रहरति वचनांतर्गतहरत्या ब्राह्मणादयं भुक्तः। तन्माहात्म्याकि
यत्कालं स्वर्गे भुक्त्वा मनुष्यलोकं प्राप्तो राजा जातः अत एवेश्वरो महायशा इत्यादित्यपु
राणे कथा प्रसिद्धा। महामूर्द्धा इति। अत्र मूर्द्धो महत्त्वं सप्तलोकत्वेन। महामात्र इति। मीयं ॥५७
त इति मात्रा विषया महांतो ऽस्य ति। स तथा। महानेत्र इति। महांति चंद्रसूर्यवह्निरू

पाणि नेत्राणि यस्य स तथा। महाबल इति। हनुमदादीनां बलं किंचित् तद्बलकारणमात्रे (का)
णेत्यर्थः। महादंत इति। महच्चर्वणसाधनमस्यति। महाकर्ण इति। महच्छ्रवणसाधनमस्ये
ति। महामेंढ्र इति। महाप्रधानावयवयमित्यर्थः। महाहनुरिति। हनुमदादीनाम्प्रसिद्धत्वात्
।महानाथ इति। महांश्चासौ नाथश्च महतां नाथो महानाथः। महाकंबुरिति। महाग्रीव इत्य
र्थः। कालकूटाश्रयत्वात्। महास्मशानभृगिति। स्मशानं सर्वप्राणिलयत्वं धारयतीति तथा।
पूर्वं स्मशानवासित्वमुक्तं। अत्र तु तद्धारणमिति विवेकः। यद्वा। स्मशानं ... वृन्त महास्मशा
नं काशीति निगद्यते। तस्याः स्वकीयत्रिशूलस्योपरि धृतत्वेन स्मशानधृगित्युच्यते। महा
वक्त्रा इति। महद्वक्त्रो यस्य सः। महाग्रीव इति। महती स्थूला ग्रीवा यस्य सः। पंचवक्त्रत्वा
त्। महोरस्क इति। वक्षसउरसा स्थाद्रधोन्नाग विशेषेण किंचिद्भेदः। यद्वा। महच्चतदुर

श्चातनाके शाहृंकाराणीत्यर्थः। हृदयमारभ्य गंभीरं शाहृंकारातीत्यर्थः। अंतरात्मनि। अ
न्नमयप्राणमयमनोमयविज्ञानमयानंदमयेभ्योप्यांतरो ब्रह्मपुच्छं प्रतिष्ठति। एतदा
नंदमयाभ्यासादित्यत्र निरूपितं। मृगालयइति। मृगाजीवाः पलायनपराः प्राणरक्षणे
यत्नं कुर्वंतः सिंहाद्भिन्न्यतितेषामालयो। अधिष्ठानं परिछिन्नत्वेनरूपेण प्रतिबिंबवज्जी
वस्यापिजीववच्चंनस्ताद्गाकारं विनेत्यर्थः। महाकटिरिति। महत्यौ कटीयस्येति। महा
ग्रीवइति। महती गंगाभ्यारसहनक्षमा ग्रीवायस्येति। महांतोबाहवो अस्येति। महाकरइ
ति। करोनागस्तागः यद्वा। महास्यास्तवस्याकरः। लंबितइति। अनेकावयवविशेषैर्णिभूत
स्थि मद्दछब्दमहित्वे प्राक्तपिविराड्रूपस्य गगनमंडलमवलंब्यस्थितस्य शिरस ऊर्द्धत्वा णा ॥५८
चरणतलादधोभागेत निराकारेश्वररूपे सत्यपिविराजोर्थाल्लंबितत्वमेवा। यद्वा। अलंबि

तइतिपदच्छेदः एवंभूतकार्योपिवस्तुतो ऽपरिछिन्न एवपरिछिन्नत्वेनभासयैन इतिभावः। लं
बितोष्टइति। अत्रलंबितशब्दमहछब्दप्रकरणप्राप्तं महत्वमुच्यते। महामायइति। महती
माया। नाद्यनिर्वचनीयत्वेन महत्वमस्या ऽसामायाशक्तिर्यस्येतिसतथा। रूढ्हीमायाभ्रिरिति द्वो
श्रुतेः। देवात्मशक्तिं स्वगुणैर्निरूढामितिच। इत्येषा सदसत्प्रकारविधुरा माया दुरुत्नी
तितो मूलत्वात्प्रवृत्तिः प्राबाधन्लयतो विद्य [illegible] दायादिना। शक्तिर्विश्वमयस्य यस्यविशदा
नंदप्रबोधेदाध निर्धूताखिलभेदगंध [illegible] वंदेभवानीपतिमिति। वेदांतिभिरुक्तत्वा
च्च। यद्वा। महतीमांशोभ्नांलक्ष्मींवा। अयतीतिसतथा। अत्रप्राप्तिः सदाप्राप्तिरेवा। यद्वा। पू
र्वंब्रह्मणोंप्रजाःसृष्टुमारब्धास्तदाकर्तृत्वाक्रोतितातदास्यपितामहोमहेशो विज्ञप्रः न
तश्रीशांभुनास्वस्वरूपाछक्तिर्वक्ती तनासास्तुनाब्रह्मणानानारूपाणितनानितनोमैथु

नद्धाराप्रजावृद्धिंप्राप्ताः अतएवमहात्राक्तिर्महिम्नाः इयंकथाऽदित्यपुराणेप्रसिद्धा। पयो
निधिरिति। पयाम्यामृतंतन्निधिः अमृतरूपइत्यर्थः। महांगइति। महांत्यंगानियास्यतिस
तथा। पूर्वंप्रातिस्विकानिकानिचिदंगान्युक्ताऽन्यत्रसामान्याकारेणमहाकायइत्यत्रपूर्व्वो
गीतउक्तोऽवतुसर्वाण्यंगानीतिविवेकः। महादंष्ट्रइति। महतीदंष्ट्राऽस्येति। महाजिह्वइ
ति। महतीजिह्वाऽस्येति। महामुखइति। महन्मुखमस्येति। महानखइति। महांतोनखा
अस्येति। महच्छब्दोऽनेकार्थवाची। वा। तनानेकसर्वावयवइत्यर्थः। महारोमाइति। महां
तिरोमाणियस्येति। महाकेशइति। महांतः केशायस्य। रोमाणिदीर्घाः केशाइतिभेदः। मह
जूटइति। जूटशब्देनजटोच्यते। जटीत्यत्रजटामात्रमुक्तमत्रतुमहतीजटेतिभेदः। अप्रसन्न ।।५९
इति। उग्रत्वाद्देवाप्रसन्नः। अन्यत्रेषु। प्रसादइतिनिन्नेषु। प्रसन्नइत्यर्थः। प्रत्ययइति। पुरा

णोपिसदानूतनइत्यर्थः। गिरिसाधनइति। गिरिः कैलाशहिमालयोवा। तंसाधयतिस्वीयत्वेनां
गीकरोतिसतथा। स्नेहनइति। स्नेहयनीतितथा। सहास्निग्धः उपासकेष्वित्यर्थः। अस्ने
हनइति। प्रतिकूलेषुस्नेहरहितइत्यर्थः। यद्वा। अः विष्णुस्तंस्नेहयति। विष्णौस्नेहयु
क्तः स्वरूपवान्। एकदासर्वेदेवारुद्राराधनायकैलाशंगताः। तत्रविष्णुरुवाच। श्रीमहे
शामदीयोयंमुख्यभक्तइति। सर्वेदेवाइमंमत्समानंजानंत्वित्यादिबहुस्नेहेनहरेरभि
षिकः कारितइत्यर्थः। इयंकथास्कंदे। अजिनइति। केनापिप्रकारेणनजितः। यद्वा। अजांमा
यांइतः प्राप्तः सतथा। महामुनिरिति। महत्वंस्वतःसिद्धज्ञानात्वेनमुनीनांमुनित्वंतुसाध
नपरतंत्रमित्यर्थः। वृक्षाकारइति। वृक्षः संसारवृक्षऊर्द्ध्वमूलमधः शाखमितिस्मृत्युक्तः
तंकरोतीतितथा। महाकेतुरिति। महान्वृषभः केतुरस्येतिवा। महाकेतुः धूमकेतुः क्वा

धाविष्टः सन्निति वा। घनल इति। वह्निरूपा जठरानलः सर्वमन्नं पचति पाचयति। वायुवाहन
इति। वायुसदृशं वेगवद्वाहनं यस्य स तथा। यद्वा। वायुं वाहति वाजयति प्रापयति स्ववश्य
तामिति। भीषास्माद्वातः पवत इति श्रुतेः। मंडलीति। अत्र मंडलानि भूमंडलगगनमंडलानि
सर्वाणि यस्या ध्येयतया विद्यन्त इति मंडली। मरुधामेति। मेरौ धाम गृहं यस्य स तथा। मे
रुसदृशं सुवर्णप्राकारं धाम यस्येति। देवदानवदर्पहेति। देवानामिंद्रादीनां दानवा
नां त्रिपुरप्रभृतीनां दर्पं हंतीति तथा। इंद्रादीनां तु स्वाभिमाननिवर्तकत्वेन त्रिपुरादीनां
तु छेदनेनेति विभागः। यद्वा। देवशब्देन सत्वगुणावच्छिन्नानींद्रियाण्युच्यंते। दानवशब्देन
रजस्तमोयुक्तानि तेषां राजसतामसविषयनिवर्तकत्वेन द्वयोः गुणानीत विदानंदप्रापक ॥६०
त्वेनापेक्षास्येति विभागः। इयं च हयाद्यजापत्याधीश्वत्यत्र सुरेश्वरवार्तिके व्याख्यानं।

अथर्वशीर्षेति। अत्राथर्वशब्देनाथर्वविद्योपनिषत् तत्प्रधानत्वात्तन्मस्तकं। अथर्ववेद
साधारण्येन रूढस्वरूपमद्वितत्वावननिरूपितसामास्य इति। सामास्यमिवास्यं यस्याः सा
तथा। आस उपवेशने। साम्नि आसितुं योग्यः सामास्यः। साम्नावादलभ्यत इत्यर्थः। यद्वा। सा
मशब्देन तद्रूपवेदः संगीतशास्त्रं तदास्ये यस्य संगीतशास्त्राधिष्ठात्री देवतारूपः। रुक्मह
स्तेति। रुक्मं सुवर्णवलयादि हस्ते यस्याः। रुक्मवत् दीप्तहस्ता वा। असितरूपेति। असि
तनयनेति यावत्। यद्वा। असिता मेघश्यामनारायणेश्वरूपा महत्वभावेन यस्याः सा त
म था। यजुःसाममयेति। अत्रैव यट्शब्दः प्राधान्यात् ऋग्वेदश्रीरुद्रसूक्तानीश्वरत्वद्योतका
नि विद्यंत एव परं तु यजुर्वेदे नकनमकचमकानुवाकारुद्रैकादशिनीरुद्रमहारुद्राति
रुद्रादिभेदेन निरूपणात्प्राधान्यं। साम्नां तु गानरूपत्वाज्ज्ञानेनेश्वरः प्रसन्नो भवति। अ
त्राथर्वशीर्षसामास्यः यजुःसाममयेति सर्वत्रयं कथायाज्य। पुरा देवा ब्रह्मलोकं ग

त्वाःब्रह्माणंप्रणम्यतुष्टुवुः।देवाऊचुः।परमेश्वरः।कोस्तियस्यशरणंवयंगच्छामः।ब्रह्मो
वाच।मत्तःकईश्वरोऽहमेवपरमेश्वरः।त्वंकोवराकः।एवमुभौविवदमानौदृष्ट्वादेवाइं
द्रादयऊचुः।कथंवादंकुरुतां।वदायंपरमेश्वरत्वेनवर्णयिष्यंति।सएवपरमात्मा।तदामहे
शएवसार्वैर्वादिर्वर्णितो।यमेवपरमेश्वरइति।प्रणवेनापिश्रीरुद्रएवेश्वरत्वेनोक्तः।अ
तएवनिरुपपदेश्वरशब्दवाच्यत्वंश्रीभवानीपतावेवनान्यत्रेतीयंकथास्कंदादिव्यपुरा
णायाःप्रसिद्धा।गुह्यइति।अनेकावरणवेष्टितत्वात्।आवरणानांकल्पितत्वेनयस्मात्तदप
राद्दाद्ब्रह्मेतिश्रुतेरगुह्यइतिवा।प्रकाशइति।ज्योतिषांज्योतिरितिश्रुतेः।अप्रकाशइ
तिस्वप्रकाशोऽभिवीयतेऽ[…]यंपुरुषःस्वयंज्योतिरितिश्रुतेरित्यर्थः।जंगमइति।जंगम्यत
इतिजंगमःसर्वत्राटनशी[…]।अजंगमइतिवा।व्यापकत्वात्।लीलाविग्रहेणाटनशीलश्चे ॥६१
तिभावः।अमोघार्थप्रसा[…]इति।मोघोनिःफलः।अमोघःसफलो।यार्थिनंप्रसादयति

उपहारःप्रियइति ३

प्रसादेनप्रयच्छतिसयथा।भगवतादत्तोर्थः।केनापिपराकर्तुंनशक्यतइत्यर्थः।अभिगम्यइति
।अभिगंतुमुपसर्पणंकर्तुंयोग्यःकारुणिकत्वात्।सुदर्शनइति।शोभनदर्शनःसुष्ठुदर्शयति ६
स्वर्गापवर्गादिसनंथानुपहारप्रियो।स्यतिपूजोपहारवल्लभइत्यर्थः।सर्वजनकइति।सार्वषांज
नकइत्यनेनास्यकोपिजनकः।परात्परतरोब्रह्मातत्परात्परतरोहरिः।तत्परात्परतरोह्येष
इतिबह्वृचश्रुतेरितिभावः।कांचनरुचिरइति।सुवर्णपर्वतवासी।यद्वा।कांचकामिनीप्रतिनस्थि
राभवानीव्यतिरेकेणकामपिनपश्यतिभावविशेषणानि।नदीनदकरइति।सरित्समुद्रनि
र्माता।यद्वा।दीनंद्यतिखंडयतितथाविधःकारायस्यतेवंविधइत्यर्थः।यद्वा।दीनंददातीतिदी
नदः।एवंविधोनास्यकरः।किंतुवदान्यशिरोमणित्वात्पूर्णंदातुंसमर्थइत्यर्थः।भाष्यइति।
भाषितुंयोग्यः।इममेवप्रतिसर्वाविद्यानिरूपाजंभोवादासम्भावेनकर्तुंशक्यते।अन्यसंभाष
णेननैहिकंनामुष्मिकमितिभावः।यद्वा।अर्थाद्यशब्द।भाष्यकर्ताश्रीमच्छारीरकभाष्यनिर्माता

श्रीशंकराचार्यः। सुहस्तइत्यस्य स्वामिभाष्यव्याख्यानं। सुशोभनः सुखकरो हस्तो ऽस्येति शं
करः। तथाच। शंकरः शंकरः स्वयमित्युक्तवान्। वेदांतवेद्यवस्तुप्रतिपादकवाक्यापद्दि
तन्यायसूत्रव्याख्यानाय श्रीशंकराचार्य एव समर्थो नान्य इत्यर्थः। पुराणेषु च भविष्यनिरूप
णेप्युक्तं। कलेरादावहं शंकराचार्यरूपेण छिन्नां ब्रह्मविद्यामुद्धरिष्यामि। ततो म्लेच्छैर्म्लेछ
समानैर्ममद्वेषिभिर्निर्धर्मज्ञाने च नष्टे कल्किरूपेण मदीयांशो नारायणोऽवतीर्य धर्मं प्रवर्त
यिष्यति। पुष्कर इति। पुष्करकमलाकारं भुवनाधिष्ठानं। अर्शादित्वेन पुंस्त्वं। पुष्करतीर्थाधि
ष्ठाता वा। पुष्करशब्देन हृदयाकाशरूपो वा। स्थपतिरिति। विश्वानरः कश्चिदृषिः सत्पु
त्रार्थं बहुतपस्तेपे। वाराणस्यां गत्वा लिंगानि बहून्यर्चितानि। ततः प्रसन्नेन रुद्रेण वरादत्तः
प्रार्थयति। ततोक्तं। त्वादृशो मे सुतोऽस्त्विति। तथेति रुद्रेणोक्ते तस्य भार्यायां गृहपतिनामा ॥६२
पुत्रो ऽभूत्। अतिगुणवान्। कदाचित्तद्गृहं नारदऋषिरागतः नारदेन सामुद्रिकशास्त्रमर्यादया

परीक्षितः पश्चादुक्तं च दीप्यायं सुतो द्वादशे वर्षे वज्रान्नंक्ष्यति। पश्चात्परितप्तौ पितरौ विलेपतुः
। पुत्र आह पितरौ मा भयं कुरुत। मम भयं वज्रादपि नास्ति। ततो द्वादशवार्षवज्रभयेन तप्यन्ते श्री
महादेवांश एव श्रीमहादेवेन रक्षित इति। स्थपति। गृहपतिरुच्यते। तैत्तिरीये। राद्गिनाय स्थ
पतय इति चाम्नायते। इयं कथा काशीखंडे विस्तरतः प्रसिद्धा। दिङ्मात्रमत्र सूचितं। स्थिर इ
ति। विश्वप्राज्ञतैजसादिलक्षणास्ववस्थासु यांतीषु आयांतीष्वपि चैतन्यरूपेण निरूपाधेः।
न्मा विनिमयाभावात् स्थिर इति। डामर इति। डामरग्रंथनिर्माता। तत्प्रतिपाद्यो वा तत्स्वरूपो वा।
मंत्रात्मकत्वात्। त्रास इति। त्रासयति क्रोधाविष्टः क्रोधविषयानिति त्रासनः। आद्य इति
क्रोधाधिष्ठितो। आद्यो नाम संपदधिष्ठानं। घृणीति। दयावान्। प्रतिकूलेषु जुगुप्सावानिति वा।
यद्वा। ...णोविष्णुस्तत्र समाहित एकाग्रस्तत्स्वरूपत्वात्। नक्तमिति। नाम्नैकदेशेन नामग्रहणात्।
नक्तंचर इति। ज्ञेयं। चरधातोर्भक्षणार्थत्वेन रात्रावुपचरितः श्रीमहादेवो महाफलदायी

वतीत्यर्थः तिशिवागामप्रसिद्धिः। कलिरिति। कलहरूपः। कुपितः श्रीमहादेवस्तमोगुण
विशान्नत्वापरस्परं कलहं कारयति। कालइति। कालब्रह्मासमंताद्दीयतेस्मिन्निति। प्रल
यब्रह्मादयोपितत्रैवलीयंतइत्यर्थः। वृद्धकालेश्वरोवाकाश्यांप्रसिद्धः। मकरइति। मकरो
मत्स्यविशेषः कमंडलुमध्येशनैःशनैर्वर्द्धमानोघटमणिकतडागादिक्रमेणसमुद्रंप्राप्तो
मत्स्योमत्स्यावतारइतिमत्स्यपुराणेप्रसिद्धं। तत्रयदातेनानेकपंथानः। श्रीमुखानापदि
ष्टः तथासतितस्यैवंमनीषाजातायदस्मिन्प्रलयेहमेकएवमत्सामर्थ्यरुद्रस्यापिनाति
स्ति। अहंततोप्यधिकइतिखर्वैः श्रीमहेशगणैर्द्वित्रैः अनंतैर्निजनाथायसर्वंनिवेदि
तं। यत्स्वामिन्मत्स्येनोक्तं। तदस्माकमसह्यं। ततश्रीरुद्रेणोक्तमिदमेवनायंसामान्यम
ए त्स्यः। श्रीनारायणमैवायंपुनस्तत्रगत्वास्थएवंतुसकिंकरोतिसकिंवदतिचततोगणा। या ॥६३
वद्गच्छंतितावतासमत्स्योबिडिशेनविद्धइवततस्ततोलुंठतिगतप्रायप्राणइवतत्रायंह

ए

तो गणानां तत्रपुनर्गमनसमयात्प्रागेवमकररूपंविधायश्रीरुद्रस्तन्मुखसमीपंस्थि
तः। ततोभगवान्नारायणावतारोपिमत्स्यरूपमनुकुर्वाणः स्वकुलनक्षणांकत्वान्मुखेनलघु
मकरंयावद्ग्रसयितुंगृह्णातितावदेवमहावज्रप्रायेणकंटकेनविद्धइवततोनिर्गमनप्रय
त्नंकरोतिश्रोणितौघः स्रवतितरांहाहेतिमत्तः कोऽन्योस्ति। मत्स्यजातीयोऽन्योवायामामि
त्थंपीडयतितततस्तेनस्तुतिशरबाणैर्बहुस्तैस्तराविस्तरभयान्नलिख्यते। स्तुतिसमाप्तोउक्तमहं
नजानयोऽसितस्मेतदन्यंनमोभावाद्धीति। पश्चाल्लघुमकरेणोक्तं कथमाक्रंदितवान्। त्वत्तः
परः कोपिनास्तीति। ततउक्तमेकंपशुपतिंविना। एवमुक्तेपरमकारुणिकेनश्रीमहेशेननिज
रूपंचक्रीलतमित्यवंतीमाहात्म्ये। महाकालगुणवर्णनसमयेप्रसिद्धं। एवंदशानामवता
राणाम॰ ति। प्रकृतानुपयोगित्वान्नलिखिता। कालपूजितइति। कालेपूजितः। अत्रवीप्सा
ज्ञेया। कालेकालेपूजितइत्यर्थः। सुगणइति। सुष्ठुगणाः पार्श्वस्थाः। शान्तनास्तस्येत्यर्थः। गण

२

कारइति। गणानूकारानीति। यद्वा। गणानूगणकान् ज्योतिःशास्त्रविदः ता करोति। ज्योतिः
शास्त्रनिर्मातेत्यर्थः। भूतभावनसारथिरिति। भूतानां भावनमुत्पादनं तत्र सारथिः प्रयोजकः
प कर्ता। यथाश्वा गच्छति सारथिर्गमयति। तथा भूतान्युत्पद्यंतेऽयमुत्पादक इत्यर्थः। यद्वा। भूता
निपृथिव्यादीनि भानि नक्षत्रादीनि तेजांसि तेषामवनं रक्षणं तत्र सारथिः प्रयोजकः स्वैतेषु भू
वा तेजसांतःपाति। चपि ब्राह्मणपरिव्राजकत्वेनादोषः। भस्मशायीति। निजनेत्रानलेन जगति
भस्मीभूते सति। तत्र शेते स तथा। भस्मगोप्तेति। भस्म गोपायति स तथा। भस्मोद्धूलितांग इ
६ त्यर्थः। भस्मरूपांगभूषणमिति। भस्म रूपयति प्रकाशयति। एवंविधान्यंगभूषणानि यस्य स
तथा। येरालरणैः त्वचा भस्मनोऽतितरां शोभां भवतीत्यर्थः। सुगुण इति। सुष्ठु शोभनं गणयति
यानि शोभनानि यानि तानि महेश एव वेत्ति नान्यः। लोप इति। अदर्शनं लोप इति व्याकरणा ॥६४
दर्शनं लोपश्चाष्टनोच्यते। कदाचित् दृष्टिगोचरत्वेपि स्फुटित्यदर्शनात् लोकेपि यः शक्तिमात्रेस

विषयता। तेनान्यत्रो कैरनभिव्यक्तादिभिर्निर्गतार्थता। महात्मेति। आत्मने [illegible] ।नाशक्य
पदं हितत्वेन। लोकपियःशक्तिमान् स महानित्युच्यते। सर्वपूज्जिन इति। ए[illegible]मिचांडालं वि
ना सर्वैः पूजित इत्यर्थः। शंकुरिति। यथा शंकुना धारणं ८ द्वढीभवत्येवं जगद्धारणे शंकुरप्य
यमेवेत्यर्थः। यद्वा। शंकुना सर्वाणि पर्णानि संतृणान्येवमोंकारेण सर्वा वाक् संतृणा। एतद्वै सत्य
काम परं चापरं च ब्रह्म यदोंकार इति श्रुतेः। शंकुः प्रणवस्तद्रूपेणोपास्यः त्रिशंकुरिति। ब्र
ह्मे ज्ञोपंज्ञाणां निश्चलतायां श्रीरुद्र एव शंकुरित्यर्थः। प्रणवांशा अकारोकारौ वा मकारा वा शंक
वस्त्रयस्तद्रूपेणोपास्यत्वात् त्रिशंकुः। संपन्न इति। अत्र संपन्नत्वं सकलगुणवत्ता। अविरिति। अ
त्र अविरिव भपवित्रादहादरभिनन्या वशेन पाविष्यंत हिंदूनं ज्ञायत आत्मपाविष्येणैव सवाय
मात्मा ब्रह्मेति श्रुतेर्महेश एव। भूतनिषेवित इति। भूतगणशब्देनोपलक्ष्य प्रेतपिशाच
गणास्तैर्निरंतरां सेवित इत्यर्थः। यद्वा भूतायेपूर्वं महानुभावास्तैः सेवितः श्रीमहेशोऽनीतेः

पूर्वाचार्यैः सर्वैः सेवित इत्यर्थः। अग्रिमस्थ इति। अग्रिमासने मुख्यासने तिष्ठतीति तथा। यागा
दिष्वपि यदि रुद्रः पूर्वेन पूज्यते तर्हि दक्षाध्वरपदवी यागस्य न्नवेदित्यर्थः। कपोतरूप इति। क
पोतरूपेण वह्निस्तत्र तिष्ठति स तथा। रुद्रवीर्यधारित्वात्कपोतस्य देवाज्ञयेति कथा सर्वत्र प्रसि
द्धा। कमुदकं तस्यापातो नौका तत्र तिष्ठतीति तथा। समुद्रादिमध्ये निविष्टनौकायामीश्वर ए
वतत्र रक्षिता। यद्वा। को ब्रह्मा तस्यापातशब्देन बाला उच्यंते। तत्र तिष्ठति स कैनकादिहृदयनिवा
सीत्यर्थः। यद्वा। कपातशब्देन ब्रह्मपुत्रो नारदस्तत्र तिष्ठतीति तथा। गानप्रियत्वान्नारदस्तत म
हेशगीतो व्यक्तीन्नवतीत्यर्थः। विश्वकर्मेति। विश्वस्मिन् कर्माऽस्येति तथा। योयत्कर्म करोति
तत्र विश्वेश्वर एव कर्तेत्यर्थः। पतिरिति। अर्थाद्विश्वस्येत्यर्थः। वर इति। वरयति वरेण प्रीणय
ति। तथा। शाख इति। अशाद्यशू। सकलवेदशाखाप्राणान इत्यर्थः। विशाख इति। विगतः शा ॥६५
खः सर्वदादेशावंशादिशाखाव्यक्त्यन्नावात्। नवस्य वेदशाखाः संति। एतस्य वंशाद्यन्नावात्

गुरुणोक्तं वत्नो विष्णुरधिक इति। गुरुं प्रत्युवाचेंद्रः स्वामिन्नयं ममानुजः कुतो मत्तोऽधिक इति। पश्चाद्विष्णुना ... हं न नष्टोयमवा
न्नष्टः

नाम्नोष्ट इति। अनेन सर्वशरीरशोभा कथिता। तंत्रजाल इति। एकदा पुरु ... वसन्ना
यां बृहस्पतिं प्रत्युक्तं मन्त्रः पन्नुः कश्चिन्नास्ति तदा गुरुणोक्तं वत्नो विष्णुरधिकइ. ... प्र
त्युवाचेंद्रः स्वामिन्नयं ममानुजः कुतो मत्तोऽधिक इति पश्चाद्विष्णुनोक्तमहं नितष्टोय
न्नष्टः। गुरुणोक्तं कनिष्ठत्वादेवं कथयतु नाम परं त्वयं तु सर्वांतर्यामी स्वरूपतः पश्चाद्विष्णुना.
।मदीयास्येतस्येंद्रस्य न्नवतो गुरोः सर्वेषां देवानां न्नूतानां चांतर्यामी न्नवानीपतिरवान्नान्यः
ना।ह्रीं।इ गणोक्तं। मदीयां तं दर्शय। ततः त्रयः कैलाशं गत्वा द्वारि स्थित्वा नंदिकेश्वरं प्रत्यूचुर्नि
वेदय। त्रयः समागताः संतीति। ततोक्तं नाऽवसरोऽधुना। गिरिजया क्रीडति। ततइंद्रोज
गाद। अहो महानुन्नावत्वं महायोगित्वं पश्यंतु यद्भार्यया क्रीडति विष्णुर्लक्ष्म्या महेशोऽपि गि
गिरिजया क्रीडतः। महानुन्नावाविति। ततः समये जाते न्नगवन्मानिताः पूजिताश्चात्स्व

स्थानेगताः ततोब्रह्मणायज्ञआरब्धे सर्वेप्याकारिताः तत्रमहत्यांसन्नायांश्रीरुद्रनिर्मितः कश्चि
दैंद्रजालिकः समागत्यतंतुजालंवज्रप्रायमिंद्रस्योपरिनिःक्षिप्तवान् तेनबद्धेआक्रंदितवा
न्।द्वितीयंतंतुजालंविष्णोरुपरिनिःक्षिप्तवान्।ततोविष्णुर्महताप्रयत्नेननिवार्यनिःसृतः त रु
तोरुद्रस्योपरियन्निक्षिपति।तत्क्षणमेवतन्नस्मीभवति।एवमज्ञातसंख्यानिप्रहितानितन्नस्मी
भवंति।तदाब्रह्मणोक्तंपुत्रत्वंतः कोधिकः स्वामिन्वज्रसहस्रप्रहारादप्यधिकव्यथात्व
त्यनेनबंधनेनकिंकर्तव्यं।विधिनोक्तं।मानबद्धः सदामुक्तः तंप्रसादयतदाशक्रेणश्रीम
हारुद्रस्यस्तुतिःकृता।स्तुतः प्रसन्नोरुद्रोव्यथांशमयामास।इयंकथास्कंदेशिवकांतीमाहा
त्म्येप्रसिद्धा।सुनिश्चयइति।सुतरांनिश्चयायस्येतितथा।सुतरांनिर्गतोविद्यमानश्चयोर्थ ॥६६
संग्रहोयस्मात्सतथा।कपिलइति।कपिलवर्णः स्वेच्छया।कपिंलातिस्वीयावतारत्वेनहनु

मंतमित्यर्थः।अकपिलइतिवानकपिलः कर्पूरगौरत्वात्।यद्वा।कपिश्चंचलः अकपिनिश्चलो
योगीतस्मिन्लीयतेऽसावकपिलः।योगिहृदयंनमुंचतीत्यर्थः।शूरइति।अप्रतिहतसाम
र्थ्यः।मृत्युंजयत्वेन।आयुरिति।आयुःस्वरूपः आयुर्दातृत्वादायुरितिवा।परावरइति।पराः
ब्रह्माद्याः अवरानिकृष्टायस्मात्सतथा।परान्शत्रून्अवरयतितुच्छीकरोतीतिवा।गंधर्वइति
।गांधर्वोनामगायकः सर्वसंगीतशास्त्राधिष्ठाता।अदितिरिति।अदितिर्द्यौरितिश्रुत्याक
सर्वात्मकइत्यर्थः।तार्क्ष्यइति।तार्क्ष्योगरुत्मान्एकदाइंद्रेणमृतहरणार्थंगतोगरुडःसं
ग्रामंकृतवान्ततःकतिपयाहोभिःकैलासंगतोरुद्रबलंवीक्षितुंयावद्गच्छतितावदेकं
गरुडांतरंमार्गेददर्श।स्वपरिमाणाल्लक्षाधिकपरिमाणंतदागरुडस्तंपप्रच्छ।ततोहंबि
न्नेमि। स्त्वं।तेनोक्तं।कथंबिभेष्यहंचातिदूरांवराकंकथंताडयामि।गच्छावत्रावांपथि।तदा

न्तोगतवंतौ।तार्क्ष्यस्तत्पक्षवातेनपराभूतःपपातमूर्छितइव।तदातेनाश्वास्यस्वकीयपक्षेप्र
क्षिप्तः।तातागरुडेनपृष्टं।जिज्ञासुरहंत्वदीयास्थितिःका।ततस्तेनोक्तंमदीयस्वामीविष्णु
रकःसकैलाशरुद्रासेवांकरोति।तत्याश्चोऽहंवाली।गरुडस्तमानाह।विष्णुःक्षीरसागरेवै
कुंठलोकेवातिष्ठति।किमिदंस्वामिन्पश्चान्महातार्क्ष्यउवाच।कियंतोविष्णवःकियंतस्ता
र्क्ष्याःसंति।कैलाशेरुद्रसेवकाःचतोप्यधिकस्तार्क्ष्यःमहातार्क्ष्यःप्राह।एहि।वयोःकुलं
पश्य।पश्चात्कैलाशसमीपकर्पूरगौरंत्वावानीपतिमाराधयंतःकियंतोविष्णवःकियंतोधि
काधिकपरिमाणपराक्रमास्तार्क्ष्याश्चदर्शिताः।स्वचैतस्तार्क्ष्येणश्रीमद्देवस्तुतिःकृतान्न
मान्मोचितोरुद्रेणेयंकथापद्मपुराणेहरवल्लभमाहात्म्येप्रसिद्धा।यद्वा।गरुडःस्वीयां ॥६१
जननीदास्याद्दुन्मोचयितुंकाशींनिनाय।तत्रलिंगंस्थापयामास।ततःप्रसन्नेनरुद्रेणविष्णोर्वा

हनंदत्तं।अनेकेवरादत्ताः।तल्लिंगंगरुडेश्वरइतिप्रसिद्धं।इयंकथाकाशीखंडे।सुविज्ञेय
इति।अनायासेनज्ञातुंयोग्यः।अन्यादेवताब्रह्माद्यासैप्राप्ता।अयंतुसुखेनप्रसन्नोभवती
त्यर्थः।यद्वा।सुष्टुविदंतिनेसुविदस्तैर्ज्ञेयः।सुविदएवजानंति।नान्यइति।सुसारथिरिति।
सारथिःप्रयोजकः।हीनेसारथौप्रायोजकेप्रयोज्यःतंनमन्यते।यंतुमन्मथरिपिनीषापंचमे।
धावतीतिश्रुतेः।सर्वप्रयोजकोबलवांश्च नावः।यद्वा।यस्यत्रिपुरभंगायरथारूढस्यब्र
ह्मासारथिर्जातः।यथेयंकथास्कांदेप्रसिद्ध स्वधायुधइति।परशुलक्षणायुधवानिति।
यावत्।परशुरामस्यापिपरस्वधायुधदानाय नतिशिवपुराणप्रामाण्यात्।ज्ञेयं।यद्वा।प
रिषांशत्रूणांस्वधारूपंहोमाधिकरणमायुधंयस्य।यस्मिन्नायुधेशत्रवाहविष्णुंप्रपद्यंत
इत्यर्थः।वइति।दीव्यतिविजिगीषतिव्यवहरतीतिवादेवः।अर्थकारइति।अर्थंकरोतीति

तथा। अर्थो नाम द्वितीयः पुरुषार्थः। अर्थाः षट् पदार्थाः। तत्कर्त्ता वैशेषिकसमयसिद्धार्थसंबं
न्धिध्यद्रव्यगुणकर्मकार्त्त इत्यर्थः। सुबांधव इति। शान्तनो बांधवः बांधवस्य शोभनत्वमापदि
महत्यां निश्चलप्रेमकारित्वं। तुंबवीणीति। तुंबयुक्ता वीणाऽस्य इति। अनेन वीणावादनकौश
लमुक्तं भवति। महाकोप इति। कोपस्य महत्त्वं जगत्प्रशान्ताव कक्रामस्य भस्मसात्कर्तृत्वं। अको
प इति वा। महाक्षमावानित्यर्थः। अत्र कोपाभावमात्रमुक्तमन्यत्र तु क्षमापदार्थं तिरमिति न पु
नरुक्तिः। ऊर्द्ध्वरेता इति। अक्षरद्वीर्य इत्यर्थः। यत्कृपया योगिनोऽक्षरवीर्या भवंति किं पुनर्भ
गवते। तस्येति कार्त्तिकेयोत्पत्त्यर्थं त्ववीर्यक्षरणं देवादिप्रार्थनया स्वेच्छाकृतं न तु तत्स्वभाव
प्रयुक्तमिति भावः। जलेशय इति। जले प्रयागादितीर्थजले शेतेऽसौ तथा। यद्वा। कर्दमस्य ॥६९
प्रजापतेः शुचिष्मानिति पुत्र आसीत। स कदाचित् सरसि क्रीडां कर्तुं गतः तत्र शिशुमारे

ण हतः। ततो वयस्यैः पित्रे निवेदिते पि शिवध्यानान्न चालनताऽसौ कर्दमः स्वसमीपे चतु
र्दिशान्तुवना निहुष्टवान् तत्र स्वबालकं ददर्श शिशुमारगृहीतं त्रिशूलधारिणा मास्थितं क्लिन्न
गात्रं ददर्श। ततः स बालः पितुः समीपमागत्योत्संगे विविश। पिता गुणवंतं पुत्रं ज्ञात्वा तपस्ते
५५ पे। पुत्रोऽर्थं नेकानि वर्षाणि वाराणस्यां शिवमाराधितवान्। ततः प्रसन्नेन शिवेनोक्तं वरं वृणी
ष्वेति। पश्चात्स जलाधिपत्यं याचितवान्। ततः स वरुणराज्यं प्राप्तः। तेन स्थापितं लिंगं जलेश्व
रसंज्ञं स वरुण ईश्वर एव जलेशयः। इयं कथा काशीखंडे प्रसिद्धा। उग्रवंशाकर इति। उग्रो वंशः
सेनानीः तं करोतीति तथा। यद्वा। आद्यवंश इति नाम द्वयं। तत्र गिरिजाविवाहसमये हिम
वतोक्तं को वंश इति नारदादैरन्नाणि। अयमेव सर्वेषां वंशकर्त्ता। अत एव सर्वेषामयमेव
वंशः। अवंश इति वा। अनादित्वादस्य पूर्ववंशाभावात्। इयं कथा आदित्यपुराणे प्रसिद्धा

।यद्वा।तत्र वंशकरइति।जैमिराजस्य पुत्रः सुतं गुरन्तवसत्वाऽडर्मुनः शिष्योऽन्तसो।
रु धीत्य गुरुमुवाच दक्षिणामर्थय।ततो गुरुणोक्तं मृतं पुत्रं देहि ततोसावष्टलोकपालमंडला
न्निस्त्रां वा नारायणं प्रतिजगाम।ततो हरिणोक्तं समुक्तिं प्राप्तः तवो गुरुणा स राजा शप्तः अ
पुत्रो भवेति।ततो राज्ञा पुत्रार्थमनेक उपायाः कृताः।तथापि न लेभे ततः कुरुक्षेत्रे गतः
स्वकीयं लिंगं विच्छेद।मृतप्रायो जातः।ततः प्रसन्नेन रुद्रेण बहवः पुत्रा दत्ताः।अत ए
व त्र्यम्बकं बहुलिः पुत्रादिभिर्व्याप्तं न कस्य वंशं करोतीति तथा।इयं कथा ब्रह्मां
डपुराणे प्रसिद्धा।वंश इति।वंशकर्त्ता वेत्यर्थः।वंशरूपोयमेव जगदात्मवासर्वेषां वं
शः।वंशनाद इति।वंशं नादयतीति तथा।अनिंदित इति।बहिर्मुखानां ब्रह्मकपालादि ॥६९
धारणेन यद्यपि निंदामात्रं मिथ्या प्रतीयते तथाप्युपनिषज्ज्ञातत्वादनिंदित इत्यर्थः।

सर्वांगरूप इति।सर्वं ब्रह्माणमारभ्य स्तंबपर्यंतमंगरूपा अवयवैकदेशरूपा यस्य।स तथा।
निरवयवत्वादुपचारः।मायावीति।त्रिगुणमायाप्रेरकत्वान्मायावी।यथा मायावी वस्तुतो
ऽसत एवार्थान्नानारूपेणावभासयति।तथायमनिर्वाच्यया मायया नानार्थान्प्र
तिभासयतीति वेदांतमर्यादा।सुहृद इति।सुहृत्त्रः विष्णुर्यस्य स तथा।अनिलइ
ति।वायुर्यथा सर्वत्रगमनशीलोपि कस्तूरिकामेध्यादिगुणदोषैर्न लिप्यते तथायमित्य
र्थः।यद्यप्यसंगत्वमन्यत्रोक्तं तथाप्यत्रांतर्गल्विति दृष्टांतबलान्नातिविशेषः।अनल
इति।यथाग्निः परिच्छिन्नं नलशब्देन तृणमात्रमनलस्वरूपतां लभते।एवमयवधनेन
मं चिंतयन्पुरुषोयमवन्नवतीत्यर्थः।यद्वा।न विद्यते नलशब्देन तृणमात्रं परिग्रहरूपं

यस्य तथा। बांधवरूप इति। पूर्वं सुबांधवत्वमुक्तं इदानीं निरूपपद बांधवशब्देन स
र्वेषां हितकर्तृत्वमुक्तं। यद्वा। अबांधव इति। न विद्यते बांधवो यस्य स तथा। इतरारहितापेक्षा
याअभावात्पूर्णत्वेनेत्यर्थः। बंधुकर्तेति। बंधुं करोति स तथा। हितकारिणमयमेवविध
त्वेनान्य इत्यर्थः। सुबंधुरिति। सुष्ठु शोभना बंधवो नारायणादयो यस्य। तथा। अविमो
चन इति। अविंधइति अविरूपं दक्षं मोचयति स तथा। यद्वा। अः विष्णुः तस्य विः पक्षी गरुडः
तं मोचयति सर्पपाशादिति स तथा। एकदा शेषशायिनि नारायणे सति गरुडस्तत्रग
तः तत्र शेषं दृष्ट्वा न किंचिच्चलति। निःशंक शेषे गरुडो जगाद। स्वामिन्नवतारहितो ॥७॰
यं नचेन्मदीयेन बलेन कः शेषः को वा कालियः स तु नवत्पदलांछितः परं तु न कश्चि

संजिहीर्षुणेश्वरेण। वृत्तो किं न पुरुषं वैद्यो नानोपायैः शास्त्रोक्तैश्चिकित्सति तदा कालरूप

सर्पा यया मम पुरस्ताज्जीवन् तिष्ठति ततः श्रीनारायणेऽ अप्राह। रुद्रसमीपवर्त्तमानान्नि
वारय। यदि शक्तिः एतद्वचनं श्रुत्वा बलदर्पितो गरुडः। कैलासं गतः। तत्रानेके श्रीमहे
शान्लागिनो विलसंति। तदा तैर्वेष्टितो गरुडो नवाविद्धं शक्तो निपीडितश्च गतप्राणइ
छी वासीत्। तदा तच्छ्रीकारं श्रुत्वा चंद्रशेखरः समागतोऽ हो कथमेवमरिष्यत्ययं मदीयाश्र
मे वैरं त्यज्य नांततो गरुडेन स्तुतो महेशस्तं मोचयामास। तत्राद्यमोचनमिति तीर्थंजा
॰तमिति कथां गोदावरी माहात्म्ये प्रसिद्धा। भेषजारिरिति। भेषजानामौषधानामरिः श
त्रुः तद्वीर्यहंता। यद्दागतायुषं कालरूपेणौअषधीनां सामर्थ्यं हंति। तनाशकान्यौषधानि निरोगं
कर्तुं न शक्नुवंतीति भेषजारिः इयं च सुश्रुते स्ति। सुकामारिरिति। सुतरां अतिशयितः कामो
वर यस्य। सु सुकामश्चं तु यदीयशिरस्य हं हस्तं क्षिपामि सन्नस्मीत्वती तियाचको दैत्यः स

अरिवैरीयस्यसद्रुरात्मा।श्रीरुद्रशिरस्येवहस्तंप्रह्वे मुमुचनस्ततःश्रीनारायणेनोपा
यांतरेणभस्मीकृतः।यथास्वकीयशिरस्यैवायंहस्तंनिधत्तेनथाकृतेस्वयमेवभस्मी
भूतः।अत्रकामस्यसुष्टुतानज्ञेयाकिं।अतिशायता।महादंष्ट्रइति।महतीदंष्ट्रायस्यस
तथा।युधिसमइति।संग्रामेवैषम्यंयस्यनास्ति।वैषम्यमत्रैवंज्ञेयंन्नक्तपक्षपातित्वेनसं
ग्रामेप्रारब्धयदिविष्णुरागच्छेत्तदापिननिवर्त्तनीयमितरेषांकावार्त्तेत्यर्थः।बाहुस्वनि
र्मितःइति।बाहूनांस्वबाहून्निःस्वनात्मनैवनिर्मितोनतुब्रह्मादिहस्तेननिर्मितः।एता
६ वतास्वयंदासाइतिवैदेतन्निर्मातानकोपीत्यर्थः।शर्वइति।अत्रबलेनयोगनिरूपणं
नक्रियते।इयंभगवतोनामरूढं।योगोवासंहरणसमयेष्टृणोतिजगदितिशर्वः।शं ॥७१
करइति।शंसुखंकरोतीतितथा।शंकिरइति।हविक्षेपेसर्वत्रजीवमात्रेसुखविक्षेप्ता

त्यर्थः।वरइतिश्रेष्ठः।अवरोविष्णोरपिश्रेष्ठइतिवा।य. ।अवतीत्यवःरक्षकःरःशाब्दायस्यातेरे
शावृइतिधातोःसर्वानहंरक्षामीत्येतादृशःशाब्दाऽस्येत्यर्थः।अमरेशइति।देवानामीश्वरःम
हादेवइति।महत्त्वंतुसर्वेदेवाःकर्मारब्धलोगाःकर्मसमाप्तौपतंति।अयंतुनकर्मारब्धलोगइ
ति।यद्वामहेउत्सवेआसमंताद्दीव्यते।देवसेवायांसतथा।उत्सवेश्रीमहादेवःसेव्यतइत्य
र्थः।विश्वदेवइति।विश्वस्मिन्दीव्यतिव्यवहरतिसतथा।विश्वव्यवहारप्रयोजकः।अन्नि
ज्ञान्निवंदनंवनिव्यवहारद्वयं।सुरारिहेति।सुराणांदेवानामरिःशत्रुःतंहंतीतितथा॥
यद्वा।सुरशाब्दनसाचिकीर्त्तिनिस्वदरिस्तव्यतिबंधसामग्रीतांनिवारयति।निर्ऋतिरिति।
राक्षसकारणं।रक्षांस्येनद्धलेनवलंतिनान्यथेत्यर्थः।अहिर्बुध्नइति।बुध्नंदीनांरजःसु
सीदनबुध्नमंतरिक्षमितिनिरुक्तं।याऽहिःसबुध्न्यबुध्नमंतरिक्षंतन्निवासात्।अहिःसन्नंतरि
३ क्षवासीत्यर्थः।अलुक्समासः।चेकितानइति।चिकीमर्षणे।।चकिमर्षणशीलःत्वानः

विस्तारो यस्य स तथा। यस्य विस्तारः सर्वं सहत इत्यर्थः। हरिरिति। चंद्रवदाह्लादक इति
यावत्। अजैकपादिति। अजो ब्रह्म एकपाद्यस्य स तथा। यद्वा। अजो ब्रह्मा एकः पादों
शोऽस्येति स तथा। कपालीति। ब्रह्मकपालहस्त इत्यर्थः। यद्वा। कं वायुं पिबंतीति कपाः स
र्पास्तेषां माली। श्रेणी तद्रूपः सर्पश्रेणीधारकत्वादित्यर्थः। त्रिशंकुरिति। त्रयाणां लोकानां
शंकुः निविडस्थापनहेतुरित्यर्थः। अजित इति। केनापि जेतुं न शक्यत इत्यर्थः। यद्वा।
अजां मायामितः प्राप्तः। अजामेकां लोहितशुक्लकृष्णामिति श्रुत्युक्तां। शिव इति। कल्या
णरूप इत्यर्थः। धन्वंतरिरिति। धन्वा रोगस्तं तारयतीति धन्वंतरिः सकलरोगनिवारकत्वे
न धन्वंतरित्वं। यद्वा। अकारांतधन्वशब्देन मरुस्थलीजन्यतेनादरात् छायोदकरहितप्र
देशे भ्रमस्य नरैर्नौः दुष्टमार्गे देवान्तरान्नूतस्य श्रीमहेश एवोद्धर्ता नान्य इत्यर्थः। धूमके ॥१२१
तुरिति। अर्थादनक्तानां महानिष्टसूचकः। स्कंद इति। पितापुत्रयोरैक्योपचारात्। स्कंदि
यो।

रगतिशोषणायारिति। धनोः घायागात् द्वादशार्करूपेण सर्वशोषक इत्यर्थः। विश्रवण इति
स्म ।विश्रवणस्तौ धनदस्यायं प्रभुरिति। स्वामिसेवकयोरैक्योपचारान्ज्ञेयं। यद्वा। वै इत्यव्य
यं। श्रवण इति श्रवणकर्त्रा। नकारयिता वा। गुरुरूपेणेत्यर्थः। धातेति। धारकः पोषकश्च। शा
क इति। शाकं करोति शाकयति स तथा। स्वभक्त्यानुशाकसमानुशाकरूपाचाकरातीति तथा। यद्वा
।शाक इंद्रस्यरूपः। एकदा कैलाशाप्सरसो विहर्तुं वियद्गंगां गताः शक्राप्सरोभिर्मिलिताना
नाकथाश्चक्रुः तदा शक्राप्सरोभिरिंद्रसदनवर्णनं कृतं रुद्राप्सरोभिः श्रीमहेशसदनव
र्णनं विहितं निजस्वामिवर्णने शक्राप्सरोभिः कृते सति महेशाप्सरोभिर्भवानीपतिरूप
वर्णनं विहितं त्रिनेत्रः पंचवक्त्रो भस्मोद्धूलितः सर्पवेष्टित इत्यादि तदा शक्राप्सरोभिरुप
हासः कृतः। महदहो रूपं न ततस्ताः श्रीजगदंबिकोद्दिष्टं तमूचुः ततो भवानीकौतुकेन
विदितत्वनूस्वरूपासती नर्मणा प्राह। त्वदीयं रूपमिंद्राप्सरोनिंदंति स्मा। तदा महे

त्रोनोक्तं।ममनाद्दत्त्वांमद्रूपंततोजगन्मात्रोक्तं।मामांप्रतारय।एतांसांत्वांतिंछिं
द्धि।ततश्रीशिवेनोक्तं।तास्तत्राप्रपथ्याथेंद्रसदनंद्दष्ट्वायांतिततोमंदाकिन्यां
तान्निस्वामिलिना:कथयंतिस्मेंद्रसदनंवनंपुरंदरंचदत्त्वायिततस्ताःसर्वेद्दष्ट्वान्न
वानीनिकटमागता:।पुनर्न्नवान्योक्तं।ता:प्रतिन्नवान्पाएवंकथयंतु।यदस्मदीयं
न्नवनंक्रीडावनंस्वामिनंचद्रष्टुमागच्छता।ततस्तान्निरुक्तंस्वामिनिन्नवनंवनंचद्दे
तत:कोटिगुणाधिकेपरंतुत्वदीयस्वामिनोरूपंन्नीषणंद्दष्ट्वाएतानिजस्वामिन्नावण्य
गर्वमधिकंधास्यंति।ततोजगदंबिकाप्राह।गच्छंतुतासामेवपराजयोनन्नवतीनां
न्नविष्यति।ततस्तान्निस्तत्रगत्वातात्र्यानीतान्नवानीसमीपवर्त्तिनि:शतशःशक्रान्य ॥१३
श्यंतिस्म।शक्राच्छतगुणरूपलावण्यगुणवत:तदीयपरिचारकादेवत्वातगुणाविन्न

वांभनेकान्परिचारकान्निजलावण्यत्वातगुणाधिकाअप्सरसोदासीश्चततेशक्रा
न्नवानीस्तुवंति।ताविस्मिता।किमेवंकिमेवमितिततोलीलयामहेश:सन्नाया
मागत:सर्वएवोछायनिजमुकुटरत्नमंजरीन्निश्चंद्रचूडचरणनखाग्रकांतिंनी
राजयंतिस्म।उपविष्टेन्नगवतिसर्वेस्थिता:तदातान्निर्निजस्वामीकुत्रास्तीति
यावद्विलोक्यतेतावदेकाकीनिजस्वामीतन्मध्यवर्त्तीद्रस्यैकस्यपरिचारकस्ति
ष्ठति।तदान्नगवतोक्तंस्वस्थानेगच्छंतु।तदासर्वेप्यंतर्हिता:तान्नि:पुरुहूत
स्यपुरस्तात्सर्वंनिवेदितंशक्रेणोक्तमिदमिच्छामवानान्यथा।परंतुन्नवतीन्नि
रवमुक्तेनन्नस्मसाज्ञातास्तदाश्चर्यं।इयंकथास्कंदपुराणेप्रसिद्धा।।विष्णुरिति

व्यापकत्वाद्विष्णुः। यद्वा जन्यजनकयोरैक्योपचारात् अन्याविषयो विष्णुशब्दो ऽजनके प्र
वर्त्तते। स्कंदशाब्रूवत्। कदाचिच्छिवयोरेतादृशी बुद्धिरुत्पन्ना यदेकं कंचन पुरुष
मुत्पाद्यावां सुसुखं तिष्ठावो यो ऽन्तरं त्रैलोक्यस्यावयोः समं बिभर्त्तीत्यन्योन्यसंविदं कृ
त्वा क्रीडया पुरुषोत्तममुत्पादयांचक्रतुः। ततः सोऽतिगुणसंपन्नः पितरौ नत्वा स्थि
त आज्ञां दत्तं। ततः स पुरुषविष्णुः सर्वं शिवकार्यं करोति स्म। लोके शिवसमतया।
प्रसिद्धश्चेयं कथा काशीखंडे प्रसिद्धा। मित्र इति। मित्रः सूर्यः सूर्यमंडलावस्थितः
परमात्मेति। अंतस्तद्धर्मोपदेशादित्यधिकरणे सिद्धं। वषट् इति। देवस्तत्र धारः स ए ॥७४
वेत्यर्थः। ध्रुव इति। यत्कार्यं विधातुमिच्छति तत्तद्ध्रुवं पर्याप्तं भवतीत्यर्थः। वसु इति।

। अत्र वसुशब्दो नश्वरसंकोचः इत्यस्वरूपः। यद्ध्यानमात्रेण सुखं भवति तद्धनेनेत्यर्थः। अज
दक्षिंगः शाब्दः। प्रभाव इति। महिमरूपः। धर्मधर्मिणोरैक्यविवक्षया प्रकृष्टां भावां गतिं ग
च्छतीति तथा। प्रकृष्टानि भावानि नक्षत्राण्यवतीति तथा। वा। सर्वग इति। अत्रापरिच्छिन्नरूपा
पि सर्वत्रगंतुं शक्नोतीति बोध्यते। तेन नगनार्थता। वायुरिति। सततगमनशीलः सर्वत्रा
प्रतिहतगतिरित्यर्थः। अर्यमेति। ऋ गतौ। अर्यं गंतुं योग्यं तत्र मा प्रमा गम्यं वस्तु तत्प्रमाण
मित्यर्थः। सवितेति। सर्वप्रसविता। पित्रादिरूपेणेति न पुनरुक्तिः। रविरिति। रवशब्देना
ग्निर्विः पक्षी कपोतरूपेणाग्निरुद्रवीर्यं गृहीत्वा गत इति कथा शिवपुराणे प्रसिद्धा। उदग्र
इति। उत् ऊर्द्ध्वमग्रं यस्य स तथा। यन्महस्तकाग्रस्य पारः केनापि परिमातुं न पार्यत इत्य
र्थः। विधातेति। मर्यादाकर्त्तेत्यर्थः। स सेतुर्विधरण एषां लोकानामसंभेदायेति श्रुतेः। य ये
द्वा। वयः पक्षिणस्तेषां धाता धारकः। क्रीडया कदाचिन्मुक्तहंसादीनपि धारयतीति। मांधातेति

।मांधातृशब्देन सकलचक्रवर्त्तिन उपलक्ष्यंते।तेन चक्रवर्त्तिनां सामर्थ्यमीश्वरसामर्थ्यमि
त्यर्थः।न्यूनतन्नावनइति।न्यूनमतीतंन्नावयति उत्पादयतीति तथा।यद्यप्यतमनीतन्नादेव
नोत्पद्यते तथापि तज्जातीयमुत्पादयतीत्यर्थः।रतितीर्थइति।रतिः प्रीतिर्येद्विषयिणी प्री
तिरवतीर्थं नान्यदित्यर्थः।वाङ्मीति।परमवाक्त्यर्थः।सर्वकामइति।सर्वे कामायस्माद्
सोसतथा।गुणावहइति।गुणानावहति प्रापयतीति तथा।जीवमात्रेऽयमेवगुणप्रापकइ
त्यर्थः।पद्मवक्त्रइति।कमलवदनइत्यर्थः।महावक्त्रइति।वक्त्रस्यमहत्त्वंतुसर्वसंहारक
त्वेनसर्वकर्तृत्वात् ज्ञेयं।यस्यब्रह्मक्षत्रेचौदनइतिश्रुतेः।चंद्रवक्त्रइति।प्रसन्नोयःसुधाक
रस्तत्समानमुखइत्यर्थः।मनोरमइति।मनोंतःकरणंरमयतीतितथा।निजानंदाविर्भा
वेनेत्यर्थः।बलवानिति।अत्रबलंलीलाविग्रहस्योक्तं तेन न पुनरुक्तिः।उपशांतइति।उप ॥७५
समीपेशांतःयथाव्याघ्रीक्रूरापिनिजशिशुंप्रतिशांतेत्यर्थः।पुराणइति।जीर्णइतियावत्

।नाधुनिकइत्यर्थः।पुराणः।पुण्यबंधुरीति।पुण्यबंधुःपुण्यवित्तःपुरुषस्तत्रशीर्गमनंयस्य
सतथा।पुण्यवत्पुरुषंप्रतिगच्छतीत्यर्थः।कुरुकर्त्रेति।कुरवोदेशास्तत्कर्तेत्यर्थः।कालरूपीति।
कालस्वरूपइति।सर्वसंहारकत्वात्।कुरुभूतइति।कुरुर्देशविशेषःतत्रभूतःतत्राभिव्यक्तो
लीलायेत्यर्थः।महेश्वरइति।महतामीश्वरः।सवासवोइति।सेवकत्वेनेंद्रःसमीपवर्त्तीनित्यं
वर्त्ततइतितथा।दर्पशायीति।दर्पोऽभिमानस्तेनशेतइति।शयनंनैश्चिंत्येनवर्त्तमानत्वंदैत्यर
हिततयावर्त्तमानइत्यर्थः।सर्वेषांप्राणिनांपतिरिति।सार्वशब्देनात्रप्राणिशब्देनासंकुचस्व
वेप्राणिमात्रस्यपतित्वावगतौ भवति।देवदेवमुखासक्तइति।देवानांदेवोनारायणस्तस्य
मुखंश्रीनारायणवदनंतत्रासक्तःश्रीनारायणवदनंसदाद्रष्टुकामइत्यर्थः।सदसत्सर्वर
त्नविदिति।सच्छब्देनाभिव्यक्तमसच्छब्देनानाभिव्यक्तंसर्वंरत्नंउत्तमंवस्तुतद्वेत्तिसतथा।य

प्रसन्न इति शेषः। यस्मिन्प्रसन्ने कुलनाते॰ ॰प्रसरतीत्यर्थः। अत्र कुलहारी कुलकर्त्तेति ५

उत्तमांकेनापि न ज्ञायते स सर्वैश्च ज्ञायते न तद्वस्तु भवतीत्यर्थः। कैलाशशिखरासीन इति। परमा
र्थतो व्यापकत्वेन सर्वत्र विद्यमानत्वेपि लीलाविग्रहरूपी कैलाशवासी। यद्यपि स्थानांतरे प्र
स्यस्थितिस्तथापि असाधारण्यद्योतनायेदमुक्तं। हिमाग्गवद्गिरिसंश्रय इति। हिमाचलाश्र
य इति यावत्। वाससंश्रयशब्दान्यां विशेषायामेव यद्धिमाचले आश्रयमात्रं कैलाशनि
वासा गृहमिति। कुलहारीति। रुष्टः सन्निति शेषः। श्रीमहेशे रुष्टे कुलं सर्वं निस्ससाडूवती
त्यर्थः। कुलकर्त्तेति। नामद्वयं। हिमालयनकन्यादानसमये पृष्टं किं कुलं किं गोत्रमिति तत्र वि
धिप्रमुखैर्देवै रुक्तमयं सर्वेषां कुलानां कर्त्ताऽस्य हर्त्ताऽस्य किं कुलं पृच्छते। इयं कथा शिवपुरा
णादिन्यपुराणादिषु प्रसिद्धा। बहुबीज इति। बहूनि बीजानि यस्य स तथा। बहूनि बीजानि ॥७६
ब्रह्मादीन्यनंतवीर्यरूपाणीति भावः। बहुप्रद इति। बहुप्रददानीति तथा। वणिज इति। वणि

जाभयं अशादिवादट्। अनेन वणिजां वाणिज्यं सम्यग्भवन्नवतीत्यर्थः। वर्द्धन इति। जगद्वृद्धि
करः। हर इति। हस्छू छेदने। सर्वछेत्तेत्यर्थः। नकुल इति। कुलरहितः। अनुत्पन्नत्वात्। चंदन
छद इति। चंदनं छद आछादनं यस्य दिगंबरत्वा केवलं चंदनेनैव छन्न इत्यर्थः। सारग्रीव इति
।अत्र ग्रीवायाः सारत्वं। बलवत्वं तच्च महागरलधारणात् ज्ञेयं। महाजंतुरिति। महांतो जंतवो
व्याघ्रसरीसृपादयोऽस्यति। अलक इति। अः विष्णुः स लीयतेऽस्मिन्नित्यलं एवंभूतं कं मस्तकं यस्य
।विष्णुर्यन्मस्तके लीनो भवति। एकवारं ब्रह्मादिभिः श्रीविष्णोराराधने क्रियमाणे विष्णुना विश्व
रूपं निजतनौ दर्शितं। ब्रह्मादीनां च न सीदमाया न मतां नान्यो महान् एवं संचिंत्य नंदिकेश्वरं प्र
ति दृष्टं न कथनाय यावद्गच्छंति तावत्तेवाकाले प्रलयश्चाविरासीत्ततो विश्वस्मिन्नष्टे सर्वे ब्रह्मा
य दयो नारायणं शरणं जग्मुः नारायणोपि पलायनपरो दृष्टस्तदा ब्रह्मादीन् प्रति विष्णुनोक्तं शिव

लोकंगछमस्तत्रास्माकंन्नयंनन्नविष्यतीतिप्रवंजोदकतीव्रतामहावायुपराभूताःशिव
लोकंगताःतत्रापिन्नयवंतःश्रीरुद्रंतुष्टुवुःततोमहादेवःप्रकटीबभूव।नारायणादयोमान्न
यंकुरुतमदीयमस्तकास्योपरिनेत्रमीलनपूर्वकंतिष्टत।ततनथैवचक्रुस्ततोयावन्नेत्रनि
मीलनंश्रीमहादेवमस्तकेकतिविष्णवःकतिब्रह्माणःकतिन्द्रग्वादयोदृष्टाएकैकस्मिन्त्रा
भकूपेमहावैकुंठसदनानि।कियंत्यवलोकितानिबहुकालंत्रैततत्रनारायणादयोनैलीनाः
इयंकथास्कंदपुराणेपाशुपतमाहात्म्येत्रसिद्धा।महौषधिरिति।महतीअषधीयस्यसत
था।अमृतोषधिसहितइत्यर्थः।सिद्धार्थकारीति।सिद्धमर्थंकरोतीति।सतथा।भक्तःकथयती
ममर्थंकुर्विति।तदासो।थन्नविष्यतीतिनैवंब्रूतेसोर्थःसिद्धएवेतिप्रतिज्ञायकरोतीतिन्ना
वः।सिद्धार्थइति।सिद्धानामष्टांगयोगपरिपाकवतांअर्थःप्रयोजनंतेषामेतत्प्रयोजनव्य ॥७७
तिरेकेणान्यत्प्रयोजनंनास्तीत्यर्थः।छंदोव्याकरणांतरइति।छंदश्चव्याकरणंचतयोरांतरः

निर्माता।छंदोनिर्मातृत्वंपिंगलनागेंद्रद्वारा।मयरसतजभ्नगसंभूतंवाङ्मयंजगतियस्य।
सजयतिपिंगलनागःशिवप्रसादाद्विशुद्धमतिः।व्याकरणनिर्मातृत्वंतुयेनाक्षरसमाम्नायमधि
गम्यमहेश्वरात्।कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥१सिंहनादइति।सिंहनादसदृ
शनादःमहागम्भीरशब्दवमुक्तं।सिंहदंष्ट्रइति।सिंहस्यदंष्ट्राइवदंष्ट्रायस्येति।तथा।सिं
हगइति।सिंहवद्गछतीतितथा।सिंहगामीति।यावत्।सिंहवाहनइति।सिंहोवाहनंयस्य
सतथा।एकदादेवासुरसंग्रामेसर्वदेवसैन्येसंनद्धेदैत्यान्प्रतियोधुकामेब्रह्मादिभिरुक्तं
यावदीश्वरोनायातितावत्सर्वेन्नवंतःसन्नद्धाअपिसंनद्धाएवश्रीमहेशप्रतीक्षांकुरुत।तदा
शक्रेणोक्तंमयिममानुजेहरौसकलादेवैर्मिलितैःसर्वंनविष्यति।कारुद्रप्रतीक्षा।एतद्वृ
त्तांतमागछताश्रीरुद्रेणकस्यचित्मुखाछ्रुतंश्रुत्वावृषन्नवाहनस्तूष्णीमेवगा।छतिस्म।याव
त्सैन्यंपश्यतितावद्वृषन्नेनैणसिंहरूपंव्यक्तीकृतंपर्वतप्रायं।महानादःसमभूत्तत्रसिंहरूपं

दृष्ट्वा ऐरावणस्थीत्कारं तैश्चौ विधाय पलायांचक्रे दिग्गजास्त्रस्ताः सैन्यमांदोलितमितस्ततो
हतप्रायाः सर्वे देवाः समन्त्रयन् सिंहदर्शनान्न कश्चित्परावर्तते। ततइंद्रेणोक्तं ब्रह्माणं
प्रतिस्वामिन्नयं रुद्रवाहनमयं सिंहः कृतस्त्वास्ततो विधिराह। त्वदीयात्रिमानेनायं सिंह
रूपात्वृषत्वोजातो नावशिमहेशानो। ततोदेवगणैः श्रीरुद्रस्तुतौ क्रियमाणायां शांतो वृ
षत्वरूपोजातः। इयंकथा स्कंदपुराणोक्तनंदिकेश्वरमाहात्म्ये प्रसिद्धा। प्रत्नावात्मेति। प्रत्ना
वरूपत्रात्मायस्येति। यद्वा। प्रकृष्टोत्नाव आत्माय स्या।, तस्यात्मा उत्कृष्टात्मानां नारायणा
दीनामयमात्मा। जरत्नालइति। जरत्नालोऽस्येति। नालस्यजरत्वं मुख्यत्वं नया। मुख्यास्तालामार्थी
तालाश्चघृत्फटवावपुटादयोन्नरतशास्त्रे वर्णिताः। नारइति। नारः प्रणवः स्तद्वो ध्यवाता
रइत्युच्यते। इदमक्षरमंबरांतरधृतेरित्यत्र वेदांतशास्त्रे वर्णितो। निरूपितं। लोकहितइति ॥७८

।।लोकानां हितकर्त्ता। तरुरिति। वृक्षत्वोपमानेन छायापुष्पफलादिभिर्यथा तरुर्लोकानामुपका
रकस्तथासावपि सर्वांगैर्विश्वस्य हितकर्त्तेत्यर्थः। सारंगइति। सारंगायतीति तथा भ्रमरवन्मा
रगृहीता वा। मुखवक्रांगइति। अंगस्यायमांगः मुखशब्देनात्रमोवक्रा। सत्रंगसंबंधीयस्या। वे
दो ब्रह्मा वा। कतुमालीस्वभावइति। स्वभावेनैव केतुमाला ध्वजादिमालाऽस्येति तथा विशेषैः। य
द्वा। यावंतउत्पातकेतवास्ते सर्वे मालायाः स्ववशे स्थापिता स्तदाज्ञां विना केतवो न प्रादुर्भवंती
ति ज्योतिर्विदः। भूतानामाश्रयइति तु निगदमेव। भूतपतिरिति। भूतानि पिशाचादीनि तेषां प
तिः पंचानां महाभूतानां पूर्वभूतस्य वा। यत्पूर्वजातं तदपि तकेनान्येन कर्तुं शक्यमित्यर्थः। अहा
मात्रमिति। अहःशब्देनात्र कालः कालमात्रमेतत्स्वरूपं मात्रपदेनादित्यपरिवर्तनस्वृष्टिप्रलया
द्युपाधीन्विहाय केवलो यः कालः स ईश्वर एवेत्यर्थः। अनिंदितइति। न कस्यापि निंदास्पदमि
त्यर्थः। आसनः सर्वभूतानामिति। सर्वेषां भूतानां आसकर्त्ता कृपितइति शेषः। निलयइति। सु

न्यत्र लयमात्रमुक्तमत्र पुनः प्रादुर्भावरहितो लय इति न
पानत[illegible]। विनुरात। व्यापक इति। अन्यत्र देशकालवस्तुपरिच्छेदराहित्यमुक्तमत्र तु परिच्छि
न्नस्याप्येनाहृत्वां सामर्थ्यमीश्वरत्वादिति विशेषः। भव इति। इदं नाममात्रं तथापि भ्वंन द्रुत्रं वा
ययति चालयति स्ववशत्वात् स नथा॥ सर्वशो भ्रमारचक्रप्रवर्तकश्चमुक्तं भवति। अमोघ इति। निः
फलो न भवति प्रसन्नः कुपितोपि। संयम इति। सम्यक् यमयतीति नथा। अन्यत्र लोकमात्रनियाम
त्र कत्वमुक्तं। अत्र तु सम्यक्त्वकनयमस्यापि नियामकत्वमुक्तमिति विशेषः। मृत्फर्द्दीवनि पंचम इति
श्रुतेः। आस्य इति। अत्र आस्यशब्देन व्याकरणोक्तिवर्णोच्चारणस्थानान्युच्यंते तत्संबंधितया
सर्ववर्णोच्चारहेतुः। अष्टौ स्थानानि वर्णानामुरः कंठशिरस्तथा। जिह्वामूलं च दंताश्च नासि ॥७९
कोष्ठौ च तालु चेति। यासां मित्रावरुणसदनादित्यादि सांबवचनाच्च। याजन इति। यज्ञा
दिप्रेरक इत्यर्थः। तैत्तिरीयव मकानुवाको वाजश्च मे इत्यारभ्य यज्ञेन कल्पंतामिति श्रुतेः। प्रा

णाहारणमिति। दुर्जनादिरूपेण कुपितः प्राणान् हारयति। प्राणशब्देनेंद्रियाणि ना निहारय
तीति वा। रुद्रपराङ्मुखा इंद्रियविकला भवतीत्यर्थः। धृतिमानिति। धैर्यसंयुतः। अर्थादन्यस्या
न धैर्याधायकस्य समर्थस्यात्मावान्। मतिमानिति। मतिर्मनःशक्तिरूपा भवानी यत्पार्श्ववर्तिनी तस्य
मतिमत्वं किं वर्ण्यते। दक्ष इति। चतुरः चातुर्यं च स्वयमकर्ता त्रिगुणवर्तीं मायां निरीक्ष्य कर्त्ताधर्माध
र्मौ मध्ये निधाय प्राण्यदृष्टयोगात्सर्वं भवति। नाहं कर्त्तेति। अदृष्टप्रेरकत्वेन कर्त्ता च। विधिविष्णू
सर्वं कुरुतो हमकर्त्तेति श्रुत्युक्तमकर्तृत्वमंगीकरोति तस्माद मर्दने नाहमेव चक्रीकरोतीत्यादि
चातुरी वेदांतवेद्यस्य महेशस्यैव शोभते नान्यस्य। सत्कृत इति। ब्राह्मणमारभ्या चांडालं विना
कर्मचंडालं सर्वैः सत्कृत एव निरुपपदसत्कृतत्वाच्च महिम्ना। युगाधिप इति। सत्यादियुगाना त्या
मधिपतिः। गोपाल इति। गोबुद्धिस्था वाणीं पालयतीति वा स नथा। गोपतिरिति। गौर्वृषभस्त
त्पतिरिंद्रियपतिः वा सूर्यादिरूपेण न तत्र सूर्यो भातीति श्रुतेरित्यर्थः। गोग्र इति। अन्यत्र न

द्वस्तुरक्षकमुक्तं।अत्रतुसर्वरक्षकत्वमितिविशेषः।नत्वसर्वरक्षकइत्यनेनपौनरुक्त्यं।सर्वशा
स्त्रस्यप्रकृतपरामर्शित्वमपिदृष्टंयथासर्वैर्ब्राह्मणैर्भोक्तव्यमिति।असंभाविनोरक्षायाश्चिहाय
न्यथा।शंकाकुड्डोत्पद्येतापि।अत्रतुगोप्तेत्यनेनदृढीकृतमयमेवरक्षकोनान्यएवेतिभावः॥
गोचर्मवसनइति।गोचर्मधारीत्यर्थः।हरइति।हरत्यविद्यामितिहरः।हरिनइति।हरितवर्णः
।गुह्यइति।गोप्यः।गुह्यकालयप्रवेशकइति।गुह्योगोप्यःकालःप्रलयकालस्तत्रप्राणिमात्र
स्याभावात्।तंकालमात्मनिप्रवेशयतिसकालोपियद्वशवर्तीत्यर्थः।प्रतिष्ठापीति।प्रतिष्ठाप
कःप्रतिष्ठाकर्त्ता।प्रतिष्ठाअनेनैवभवतीत्यर्थः।महाहर्षइति।महान्हर्षोऽस्येतिहर्षस्यम
हत्त्वमुपाधिसंबंधव्यतिरेकेणज्ञातव्यं।जितकामइति।अन्यत्रकामनाशउक्तोऽत्रतुजगदंबा
संनिधानेपिकामोयंवशीकर्तुंतेनसमर्थोभवतीत्यर्थः।जितेंद्रियइति।जितानींद्रियाणियेन ॥८०
सतथा।यद्वा।अजितेंद्रियइति।इंद्रियपराजयेनास्यकिंकृत्यंतस्यैवजयेनोत्कृष्टतायदजि

तंपराभवितुंनशक्नोतिनजयंविनावाकिंविसाधनंन्यूनंभवति।योगिनांकर्मिणामिवतस्यतु
निरंकुशैश्वर्यादितिभावः।जितकामत्वंजितेंद्रियत्वंतुनारायणेनैवोक्तमादित्यपुराणे।भवा
न्यांक्रीडासक्तश्रीकंठइतारकवधप्रार्थनायतत्रादावभ्यागतेषु।शृणुध्वंदेवताःसर्वाःक्रीडासक्तो
नशंकरः।युष्माकंहितकामायभोगयुक्तोभवच्छिवइति।गांधारइति।कदाचिद्भीलयागंधारदेश
प्यस्याविर्भावात्।यद्वा।गंधारदेशीयोराजाऽभवत्नितरांशिवपूजापरःसपूर्वजन्मस्मरतिस्म
।यच्चौर्येणापिव्याजाच्छिवालयेजागरणंकृतंतत्प्रभावाद्राज्यंप्राप्तं।सातिनरांशिवभक्तोबभूव
।तत्पूजाप्रसन्नोभगवान्गंधारदेशआविर्बभूवेतिगांधारः।इयंकथावंतीमाहात्म्येप्रसिद्धा।
सुरालयइति।सुरामद्यंतल्लात्याददातइतिसतथा।नपइति।नपतीतिनपः।केनापिकामेनतपश्चर्या
रति।कालिदासोक्तेः।कर्मरतिरिति।कर्मणिरतिरस्येति।कर्मात्रवैदिकंवैदिककर्मानुष्ठातॄणां
प्रसन्नोभवतीत्यर्थः।धनइति।अर्थाद्यत्र।धनसंपादकः।महागीतइति।महांश्चासौगीतश्चेति।स

[illegible] सरसा गणैरप्सरसो निर्गणैर्वा सेवि तइति २

[illegible]त्यादि धूपन्यादेवतावेदेगीतास्तथापिनामहत्त्वेनगीताः अयंतुसर्वोत्कृष्टत्वेनगीतइत्यर्थः।म
हद्गीतंसंगीतंयशोस्त्रयास्यतिवा।न्नरतंयशोस्त्रमेतस्मादेवप्रवृत्तमित्यर्थः।महाकेतुरिति।अन्ये
केतवः क्षुद्रोपद्रवसमयआविर्भवंति अयंतुमहाकेतुः।महांतः केतवोस्येति।सर्वोपद्रवकार
णकेतुरयमेवे।त्यर्थः।धर्मधामेति।नानाविधान्धर्मान्धत्तेसतथा।निकेतानइति।अनेकविस्ता
रवान्।तनुविस्तारइत्यस्यघञंतंरूपं।आकृतिगणनाकादिवर्जनाद्दनादेशाभावः।कैलासाद्य
नेकवासीत्यर्थः।वरावरइति।वरेषुभूतेषुस्वयमवरः।अन्यत्रावलवमात्रमुक्तमत्रतुभूतानि
जीवाश्चरंतिक्षुद्रस्तुनचलतीत्यर्थः।आवेदनीयइति।आइतिसमंताद्वेदनीयः।यतोन्यज्ज्ञातव्यं
नास्ति।पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरितिश्रुतेरित्यर्थः।आवेशइति।वशानांवशः।
आसमंताद्वेशःप्रवेशोयस्यासतथा।विश्वरूपेणसर्वत्रप्रविष्टइत्यर्थः।सर्वगंधसुखावह ॥८१
इति।सर्वान्गंधान्गंधोपलक्षितान्विषयान्सुखंआवहतिप्रापयतिवा।भक्तानितिसतथा।

यद्वा।साविद्यापत्यासहश्रीशंभुप्रसादेऽनेकधामार्जनादिभक्तिःकृता।ततःप्रसन्नेनमहे
शेनशचीप्रमुखदेवांगनाभ्योप्यधिकंसौगंध्यंसौंदर्यंचदत्तं।ततोऽरुंधत्याप्रष्टेसावित्रीतांभ
क्तिमरुंधतींप्रतिकथितवती।ततोनंतरमरुंधत्यापितादृशंसौगंध्यंजातं।इतिसर्वगंध
सुखावहः।इत्यादित्यपुराणस्कंदपुराणयोःप्रसिद्धं।तोरणइति।तोरणोऽस्त्रीबहिर्द्वार
मित्यभिधानात्।तोरणशब्देनप्रथमद्वारमुच्यते।सर्वासुविद्यासुसर्वासुसिद्धिषुचप्रवेशो
यमेवप्रथमंद्वारं।तद्यथा।बादरायणोमुनिर्महेशमाराध्यसर्वपुराणनिर्माताबभूव।यस्यप्र
सादात्सर्वासांविद्यानामाधिपत्यवान्प्रपन्नस्तंमहेशानंशरणंयामि।शंकरमितितस्यैववा
क्यान्यायविद्यापिगौतमप्रणीता।यस्मादुत्पन्नातन्मेप्रमाद्धारिणे।न्यायादयोपिरुद्रोपासका
भवादयश्चस्मृतिप्रणेतारस्तत्ररुद्रएवाधिष्ठाता।अंगानिव्याकरणादीनिपाणिनिप्रमुखकर्तृ
काणितत्प्रणेतामहेशएव।चत्वारोवेदालीलाविग्रहधारिणास्त्वष्टेशादौनिर्मिताःसंतःप्रकटी

न्ता वा। अष्टानां महासिद्धीनां प्रथमद्वारमयमेव धनुर्वेद संगीताद्युपवेदस्य प्रथमकारण
मयमेव। आयुर्वेद रसविद्यानिर्माणमेतस्मादेव। योगशास्त्रं तु महेशादेव। किंबहुनाईशानः
सर्वविद्यानामितिश्रुतेरयंयमेव प्रथमो विद्यानिर्माता न चात्रेशशब्दः साधारण्येन योज्यो निरं
कुशेश्वरशब्दस्य श्रीपार्वतीरमणएव प्रवृत्तेः। तरणइति। तरशब्देन नौरुच्यते तं नयति प्राप
यति स तथा। संसारतरणोपायप्रापक इत्यर्थः। वायुरिति। वायुरितिवा तिधातायातं करोति
संसार इतिवा जीवः तस्य आयुप्रदत्वादायुः। परिधाववानिचैकतइति। चिकृदीप्तौ विकती चिकः
विकएव चैकः तस्य भावश्चैकता। परिधौ आवरणे। अतिचैकतादीप्तता यस्य स तथा। आवर
णे सत्यपि यस्य प्रकाशो न लुप्यत इत्यर्थः। संयोगइति। सम्यक् योगो यस्मात्स तथा। वर्द्धन
इति। वर्द्धयतीति तथा सः। एधयते छिन्नं नन्नीतिवा। वृद्धइति। नानारूपैर्वृद्धिं प्राप्तः। महाद्द ॥८२
द्धइति। वृद्धस्य महत्वं तु समानैश्वर्यैर्नानारूपैः। गणाधिपइति। गणानां सर्वेषां स्वामी। नि

त्यइति। अनित्यइति। न विद्यते नित्यो यस्मात्स तथा। धर्मसहायइति। धर्मस्य सहायस्त
।।प्रेरकः।। देवासुरपतिरिति। देवाः प्रकाशवंतः साधवः असुराः प्राणपोषकास्तेषां
पतिः एकेषां मोक्षदाता अपरेषां भोगदाता। पतिरिति। निरुपपदपतिशब्देन सर्वप्राणिमात्र
पतिरित्यर्थः। आमुक्तइति। सदामुक्त इति। मुक्तबाहुरिति। मुक्ताः शुकादयो जीवन्मुक्ताः
तेषां बाहुरिव बाहुस्तत्कार्यसंपत्तिकारी। नकार्यं हृदयनिवासित्वं। द्विविधइति। साकार
निराकारभेदेन। सुपर्वणइति। सुष्टुशोभनानि पर्वाणि आराधनसमयतया विद्यंते यस्य स
तथा। आषाढइति। षह मर्षणे। आसमंतात्सहनमास्वादिः आषाढेरयमाराध्यत्वेनेति प्र
पंचोत्पत्तिसमाप्यनाशसमयेच सहस एव सर्वमित्यर्थः। नमः सहमाना यतिश्रुतेः। सु
षाढिरिति। शोभनं सहनमस्येति शोभनं प्रपंचस्थित्यानतश्चरजनोत्पत्तिनाशसमयेरज
तास्थितिसमयेचशुक्रेः स्वरूपं यथा सर्वं सहते न विक्रियते न तथा प्रपंचस्योत्पत्तिनाशस्थि

तिदशा। सुमेरुस्थिरो विक्रियामापद्यत इति। ध्रुव इति। चालितोपि परेण तथापि न चलति। हरिहर
इति। हरिश्चासौ हरश्चेति। हरिहरात्मकमूर्त्तिरितियावत्। हरिरिति। शीतांशुः अमृतश्चावि
द्वान्। वसुः इति। वसत्यस्मिन् जीव इति वसुः अन्यत्राधारमुक्तमात्रमुक्तमत्र तु वासो नाम नै
श्चिंत्येन सकलोपकरणस्यावस्थानमिति भेदः। आवर्त्तमान इति। आवर्त्तो नाम निरंतरं संसा
रभ्रमणं कुंभकारचक्रवत् तन्नमीयते इति। आवर्त्तमो जीवस्तस्मिन्नन्नति चेष्टत इति तथा॥
जीवस्य प्राणनप्रदातायमेव॥ काह्येवान्यात् कः प्राण्यात् यद्येष आकाश आनंदो न स्या
दिति श्रुतेः। नित्य इति। वस्तुश्रेष्ठ इति। जगद्वासं हिरण्यगर्भादिकवनमन्यंते। मायादिषु चन
दपि भवतीति परंतु तेषु श्रेष्ठः परमात्मैव निवासाधिष्ठानस्याप्यधिष्ठानत्वात्। महापथ इ
ति। यस्मिन् पथि गच्छतः पुनरागमनं न भवति तस्येदमेव। महत्त्वं। शिरोहारीति। कालभैर ॥८३
वरूपेण ब्रह्मणः शिरो कृंतनं तद्दर्पनिवारणायेति कथा काशीखंडे प्रसिद्धा॥ विमर्षीति। वि

मर्षः सहनं तद्वान् सर्वं सहत इत्यर्थः। सर्वलक्षणलक्षित इति। नानालक्षणैरलंकृतः नर
नारायणादयः क्षमावंतः तापसा एव नृसिंहादयो विलासवंतो मनुष्यनाद्यवंत एवं नृसिं
हादयः क्रूरा एव ब्रह्मादयः स्रष्टा एव साधनाधीनोऽपि महागणपत्यादयो विघ्नहरा एव।
श्रीमहेशे सर्वे गुणाः संपूर्णाः सदा निवसंत इति भावः। अक्षर इति। अक्षराक्षरशब्दो
पनिषत्प्रतिपाद्यत्वादेवैतदक्षरं गार्गीति श्रुतेः। अक्षरः परमात्मेति वा। अव्यय इति
। व्ययो नामावयवह्रासः सत्ववयवारब्धवस्तुनि भवति। महेशस्तु नित्यः। अयोगी
ति। वस्तुतोऽष्टांगादियोगरहितस्तत्साधनसंपत्त्या तत्फलकामनाभावान्नित्यतृप्तत्वा
दित्यर्थः। सर्वयोगीति। अनाद्यनिर्वाच्यमायायोगाद्व्यवहारदशायां सर्वयोगीत्यर्थः।
महाबल इति। एतादृशोऽन्यो बलवान्नास्ति। यद्वा। महेशं जसवे श्रीमहेशाराधनायोऽस

वेप्राप्ते ऽर्थे बलात्क पराधीनत्वात्तत्र किमपि न वलतीत्यर्थः। समाम्नाय इति। सम्यगाम्ना
यः समाम्नायो वेदः तस्य सम्यक्त्वं सिद्धार्थवादत्वागव्यतिरिक्तानि न केवलसिद्धार्थबो
धकानि वाक्यानि तैः प्रतिपाद्यत्वात् समाम्नायः। यद्वा। म्नायो नाम संप्रदायः तस्य सम्यक्
त्वं नानानागमसंप्रदायेषु शिवत्वं क्वि संप्रदायो गरीयानित्यर्थः। अ समाम्नाय इति॥
वस्तुतस्तु स्वप्रकाशचिदानंदरूपत्वात् साक्षात् सिद्धार्थपरोऽप्यागमोऽभिधया वक्तुं न
शक्नोति। यथा कथंचन लक्षणया तेन वेद्यत्वात् वादसमाम्नायत्वं। यद्वा। समाम्नायो म
हत्वं तदास्याद्यदान्यः समाम्नायः श्रीमहेशाव्यतिरिकेण स्यात्। त्वामेकोगम्यस्त्वमसि
पयसामर्णव इवेत्यभियुक्तवचनाद्वेदांतसिद्धांताद्यागमेनेश्वर एव प्रतिपाद्यत इतिभा ॥८५
वः। तीर्थदेव इति। तीर्थमात्रस्य देवः जगति तत्तीर्थमेव नास्ति। यत्र महेशो नाराध्यते।

यद्वा। तीर्थरूपा देवस्तीर्थदेवः। यद्यपि देवाः पावित्र्येण तीर्थरूपा एव। तथापि महादेवत्वेन
देवानामपि पावनत्वात् तीर्थत्वं। नारदो लोकान् भ्राम्यन् गोकर्णं गतः। तत्र गंगायमुनासरस्व
तीर्ददर्श। श्रीहरप्रजारतांन्नारायणादीन् ददर्श। सर्वान् देवान् यज्ञं कुर्वीतान्मुनींश्च नदा
श्चर्यदृष्ट्वा शिवं दाध्येत। तथापि तन्मानानं निश्चलमन्तवत्। नाता ध्यानं विससर्ज। पश्चाद्दनेकान्
नरकान्ददर्श। वर्षत्रयं नरकेऽवसत्ततो रुद्रः प्रत्यक्षो बभूव। नाना वरा दत्ताः ताना नारदे
न शिवः पृष्टः स्वामिन्नत्र तिस्रो नद्यः कथं वर्षति। सारणेश्वर नामकथं। शिव आह। पुरा धुंधु
मा नाम दानवो मदीयवरेण दृप्तोऽनेकान् लोकान् दयन्मोन्नयितुमुद्यतः। ततः पलाय्याहं गो
कर्णे प्रविष्टः तत्र सारणा गोपालश्चासीत्तस्मै मया वरो दत्तः ततः सारणेश्वरं प्र [illegible] लिंगं गो
कर्णे प्रविष्टः। सह दर्शं नत्वा। तथा पर्वता अपि। कदाचित्तं तन्नू राजा मरुदेशं प्राह [illegible] ल्लं तन्ने
पश्चाद्गाङ्गवीमानयन्। पृष्ठतः सरस्वती च। यमुना चागता। अत्र चेंद्रस्य कन्यागत [illegible] शाप्रादेता

पुराशत्रू ८ नामामुनिरासीत् सधूमपानं चकार ततस्तपोबलेन सर्वाणिभूतानि तमाराधयांचक्रुः

आगताः। ततोरुद्रेणनारदायवरोदत्तः। अव्याहतागतिर्नारदः सर्वाणिवनानिबभ्राम। तत्र
जंगमाजीवानानवत्। आनाकबहुफलावृक्षाः अतिसुंदराणि विशालानिवनान्यपश्यत्। त
त्रांतमलन्नमानः तारास्तलेशेतेस्म तत्रमध्यरात्रे किंनरध्वनिंसुश्राव। आकाशेकंन्यकात्र
यंश्रीशिवंगायदपश्यत्। ताः कन्याः शिवमन्यर्च्यगायंत्यः तुष्टुवुः। सास्तुतिर्बहुरस्ति। स्तुत्वाद
डवात्यनुः। नानागीतंवाद्यंनृत्यंचक्रुः। सर्वंतन्नारदेनआयानराहृष्टाः प्रष्टास्च। केयूरैर्यं। नरै
रुक्तंवयंगंधर्वनिगरान्नित्यमत्रागच्छामः। एतास्त्रिस्त्रः पि। ट्कन्याः। ततोनारदेनगंधर्वत्रयंपृष्टं
। इमाः काः कन्याः कुतईशास्य। इदंवनंकेनकारणेनजीवजंगमरहितं कथंचफलपुष्पाद्यं। इमाः
कुल्याइवनद्यः कथंवनंसिंचंति ततोनराऊचुः। ततः प्रसन्नेनेश्वरेणोक्तं। वरंवृणी। ष्वेति। ततो ॥८५
मुनिनोक्तं। सर्वैरत्रत्यैर्जीवैः सह स्वर्गं देहि। रुद्रः प्राह। त्वयाअशक्यंप्रार्थितं। पापात्मनांकथं
स्वर्गः स्यात्। ततोविचार्यरुद्रउवाच। सर्वैः सत्त्वैः समेतस्त्वं गोकार्णयाहि। तत्रेश्वराराधनेनसर्वे

दिवंयास्यंति। तस्मास्त्वर्गदानन्यायादत्रारण्यजंतवानसंतिनेनशून्यमिदंवनं। पुनर्नारदेनपृ
ष्टं। इदंकन्यात्रयंकुतआगत्यनृत्यति। इमानद्यः कथंनरुन्यायंति। शिवंध्यायंतिच। एकासु
दृना। द्वितीयाप्रमना। तृतीयासुनाम्निः प्रथमाश्रीशंभुसुतंवव्रे। द्वितीयापतिं। तृतीयादेवरं
। तद्गीतमाधुर्येणपर्वताद्याजीवाअपिपेतुः एवंसत्यपिताः कन्याईश्वरंनप्रापुः। तदासारणेश्व
रेणतासामभिलाषः पूरितः। श्रीमहेशवांछयाई इमास्तपस्तेपुः सावित्रीमाराधयामासुः।
कदाचित्रासांवासांसिवायुर्जहार। ततमोहितागंधर्वाः चकमिरे। ततोरुद्रस्तक्रोधतायां त
ननरकाद्दृष्टा। तस्मात्तीर्थादवः तीर्थप्रकाशकत्वात्। इयंकथाब्रह्मांडपुराणोक्तसारणेश्वरमाहा
त्म्यप्रसिद्धा। महाद्युतिरिति। महतीद्युतिरस्येतिद्युतेर्महत्वंसकलजगदवभासकत्वेन। अत्रम
हत्वमात्रमुक्तमिदंत्वर्थात्तनान्यनाम्नानगतार्थत्वं। निर्जीवइति। निर्गतोजीवोजीवात्मायस्मात्स
तथा। यस्माज्जीवाः प्रादुर्भूताइत्यर्थः। यथाग्नेः क्षुद्राविस्फुलिंगाइतिश्रुतेः। जीवनइति। जीवय

तीति जीवन इति। कातृत्ववान्याकः प्रमापाद्येष आकाराआनंदोनस्यादिति श्रुतेः। यद्वा जीवय
ति पुनरनंगवनकाममिति जीवनः। मंत्र इति। अघोरादिमंत्ररूपः मंत्रदेवतयोरभेदात्। मन
नात्त्रायत इति मंत्रलक्षणात्। ईश्वरापि स्वविषयकमननेन त्रायत इत्यर्थः। अनिंद्य इति। पूर्वं के
नापि पुरुषेण कर्मचांडालव्यतिरेकेण न निंदितो धुनातु निंदितुं न योग्योभवतीत्यर्थः। वक्रकर्क
श इति। अतितरांकठोरः दुष्टंप्रतीतिरोषः। रक्तप्रभृत इति। रक्ताः अनुरक्ताः प्रेमवंतः तेषु प्र
भूतः सर्वसमृद्ध्यास्पदमित्यर्थः। रक्तांगः। रक्तान्यनुरक्तान्यंगानि गणा यस्य स तथा। यद्वा। र
क्तेरक्तगुणयुक्तमंगंपूर्वदिग्मुखं यस्य स तथा। संवर्त्ताग्नितडित्ताप्तकनकप्रस्पर्द्धितेजोरूण
मित्यादिवचनात्। महार्णवनिनादभृदिति। देवासुरसंग्रामसमये सर्वेषां शस्त्रधारिणां पु
रंदरप्रभृतीनां मानमर्दनाय शब्दमात्रेण दैत्यानूपरान्भूतवान्। यद्वा। श्रीरघुनाथेन स्थापितः से ॥८६
तुबंधुधरामेश्वरः सामीप्यान्महार्णवनिनादभृत्। मूल इति। अशोधर् सर्वेषांमूलभूतः यद्यपि

कारणत्वे नान्यत्रोक्तेन मूलता सत्यस्यतीत्येवं तथापि कारणत्वं कर्तृत्वं चभिन्नलक्षणाक्रांतं मूल
त्वं तु सर्वेभ्यः पूर्वत्वमात्रमिति भेदः। यद्वा। बीजमूलादीनां वृक्षं प्रत्यनेकेषां कारणानां विद्यमा
नत्वादत्रावांतरकारणत्वमुक्तमिति द्रष्टव्यं। विशाख इति। विगता शाखायस्मादसौ विशाखः
शाखा शाब्दी गोत्रस्याप्युपलक्षणार्थः। अनामगोत्रमिति श्रुतेः। आश्वलायनादिशाखारहि
तः। इदंतु गिरिजाविवाहसमये हिमवतापृष्टं स्वामिन् किंगोत्रं का शाखेति ततो न किंचिदुवा
च। नानादवैरुक्तं जगद्बीजमयं कास्य शाखा किं गोत्रमितीदं नानापुराणप्रसिद्धं। अमृत इ
ति। मोक्षरूप इत्यर्थः। एतावद्रेखल्वमिति श्रुतेः। व्यक्त इति। चिद्रूपेण सर्वत्र भासमानत्वात्
। अव्यक्त इति। शुद्धबुद्धादिरूपेणानवभासमानत्वादव्यक्तः। सनातन इति। कालाबाध्यत्वं। आरो
हण इति। आरोहयति उच्चैः करोति निकृष्टानपि तिनथा। निरोह इति निकृष्टीकरोति महो यो
वा

नितितथा। शैलहारीति। शैलान् हरतीति तथा। एकदा हिमालयगृहे तिष्ठन् श्रीउमाकांतः शै
लकसमानैः पर्वतैरुपहसितः स्वसुरगृहे एव वर्त्तसे इति श्रीमहादेवेनोक्तमस्माकं कैलाशः
स्थानं परं तु भवदनुग्रहाय प्रभूतावाहः ॥ मत्र वार्त्ततनास्ता प्राहुः यदि तत्र किंचित्स्यात्तर्ह्य
स्मत्स्वामिनो गृहे कथमुदरंभरिः स्याः रुद्रेणोक्तं स एवोदरंभरिर्य एकाकी पूर्णहं भुक्त्यैरन्ने
कैर्गणैस्ततः ते प्रोचुः गणा अपि हिमालयगृह एवायागं वर्त्तयंते ततो रुद्रेणोक्तं भवंतोपि तत्रा
यांतु सर्वान् भवतो हं वर्त्तयामि। ततास्ते चालकैरुक्तं अहो विभवं पश्यंतु वेषं च पश्यंतु प
र्वतानयं वर्त्तयसि। रुद्रः प्राह। आगछंत्वेकवारं मद्गृहं दर्शयामि। ते नेत्यूचुः। ततो रुद्रेणो
था क्तं बलाद्भवतो हं नयामि पश्चात्ते प्राहुः। वयं किमेकरूपायं भवान् अस्माकं पर्वतानां रु ॥८७
पद्वयं ब्रह्मणापि नेतुं न शाक्यते। क्व च वास्थानं भूमिरित्युक्ते श्रीकंठस्तूष्णीं भूय स्थितः ततो

ल भगवता किंचिन्निजबलेशमात्रेण हिमालयमेवोत्पाट्य कैलाशं नीतां तरिक्षे निजक्षरणशक्त्या
स्थापितः एवं सार्वपि शालकाः सगिनाश्च कैलाशसमीपें तरिक्षे घटपटीयस्याशक्त्या न
स्थापिताः स्वयं भवान्याकैलाशे क्रीडति स्म ततः स्वसुरं प्रत्यूषि वान् स्वामिना सपरिवारे
णात्र मार्गवशादागतं निकट एव माद्गृहदर्शनार्थमागंतव्यं। ततो हिमालयेनोक्तं वयं स्वरस
तोनागताः। केनचित् पुरुषेण बलादुत्पाट्यात्रानीताः ततो गणाः सहस्रशा आगत्य तान् प्र
ति सर्वे भुपहसिताः संतः प्राहुः अस्मत्स्वामिनोदरंभरिणा भवतां समीपे स्थीयते भवंतः
कथमत्र मागताः यद्यागतास्तर्हि पश्यंतु भवस्य मंदिरं ततः सर्वे पर्वताः शंकरभवन
मवलोकयांचक्रुः तद्दृष्ट्वा निजमंदिरपशुबंधनस्थानात् तथोच्छिष्टगर्त्तादपि हीनं अवलोक
यांचक्रुः ततस्तै रुक्तं भगवन् ज्ञातं भवदीयमहिमन्निरस्मान्निरुपहसितं तज्ञारुजाते

म यदीदृशोन्नैवदीमाहात्म्यं बुद्धं ततोहिमालयउवाच।पुत्रानात्र विस्मयःकार्यएतदीयरूपं
चारित्रंवास्मदीयसुनैवावतिनान्या।यदिावतिनर्हि श्रीनारायणएवनान्यःइयंकथामा
विवाहवर्णनेप्रसिद्धा।महानपाइति।महत्त्वापाऽस्येति।नथा।सनाकल्पइति।सनशब्देन
सनकसनंदनसनातनसनत्कुमारउच्यंतेनैराकल्प्यतेयुक्तिभिर्बोध्यतेसतथा।महाक
ल्पइति।महद्भिर्वसिष्ठादिभिर्निश्चयोनुमानादिनाकल्पते।सतथा।युगइति।युगचतुष्ट
यकालरूपः।युगकरइति।युगपरिमाणनिर्माणेनयुगकर्तृत्वमुच्यतेनिरुपाधिःकालस्या
नुत्पत्तेः।हरिरिति।प्रथैछन्नपापंन्नकोनजानातिमायायांसुप्तेचनत्पापंहरतिसनथा।यु
गरूपइति।युगशब्देनयुग्मंब्रह्माविष्णुश्चेतितान्यांरूप्यतेनिरूप्यतेसतथा।महारूपइ ॥८
ति।महद्रूपंयस्यसनथा।पवनोइति।पावयतिपवित्रीकरोतिसनथा।यद्वा।पूर्वंधूनात्मा

मुनिःकाश्यांतपस्तेपतस्यप्रसन्नेनरुद्रेणगणाधिपत्यंदत्तंततःपवमानेशलिंगंस्थापितंते
नपवनइतिपवनेशइत्यर्थः।इयंकथाकाशीखंडेप्रसिद्धा।गहनइति।अविज्ञेयचरित्रत्वात्
तर्कैर्नस्पृशति।अर्कपुष्पधत्तूरपुष्पाण्यादत्ते।ततएतदीयंस्वरूपंबोधुंनशक्यतइत्य
र्थः।नगइति।पर्वतरूपः।पर्वतःशिवरूपइतिशास्त्रप्रसिद्धिः।पर्वतेपर्वतेशिवइतिपर्वत
आधारत्वेनोक्तः।न्यायनिर्वापणइति।न्यायशास्त्रंनिर्वापयतिपर्यवसन्नंकरोतिसस्वरू
पइति।सनथा।न्यायशास्त्रंतु।श्रीमहेशप्रतिपादनेपर्यवसन्नं।नादइति।नादोनामस्वरः
तस्यब्रह्मरूपत्वात्इतिसंगीतशास्त्रेप्रसिद्धं।यद्वा।नअतिविषयानितिनादः।अनन्यत्र
न्यात्रअन्तिवाकशातिश्रुतेः।पंडितइति।पंडापरिपक्वामतिर्ज्ञानास्येतिनथा।तदस्यसंजा
तमितीतच्।अचलोपमइति।अचलैरुपमीयतेसनथा।बहुमालइति।बह्वीमालापरंपरा
यस्यसनथा।महाव्यालइति।महांतोव्यालाःसर्पायस्यभूषणत्वेनसतथा।सुमालइति।शोभ

नामालाऽस्येति। स तथा॥ अत्र मालाशब्देन पुष्पादिमालाग्राह्या॥ बहुलोचन इति॥ त्रिलो
चन इति यावत्॥ बहूनि असंख्यातानि वा नमः सहस्राक्षायेति श्रुतेः॥ विस्तार इति॥ स्तृञ् आ
च्छादने॥ केनाप्याच्छादनं कर्तुं न शक्यते॥ स्वप्रकाशत्वात्॥ मायावध्यास्त इत्यर्थः॥ लवण इ
ति॥ लूञ् छेदने॥ छेदनकारयितायस्याच्छेदो येन भवति तत्र प्रयोजको महेशएवेत्यर्थः॥ क्रू
र इति॥ उग्र इति यावत्॥ कुसुम इति॥ कुसुमसदृशो मृदुरित्यर्थः॥ यद्वा॥ कौ पृथिव्यां सुष्ठु शो
भनं वस्तु तेन मीयते ज्ञायते स तथा॥ उत्तमवस्तु यत्तत्र महेशांश एवास्तीत्यभिप्रायः॥ कैला
शशिखरे रम्ये शंकरस्य शुभे गृहे। देवतास्तत्र मोदंतीति श्रुतेः॥ सफलोदय इति॥ सफल
उदयायाहृदयेऽभिव्यक्तिरस्येति स तथा॥ पुण्यभक्तानां हृदये प्रकाशो भवति॥ सफल इ ॥१८५
त्यर्थः॥ सफल उदयो यस्मात् भक्तानामिति वा॥ यद्वा॥ सफलैः शुभाशुभकर्मफलभोक्तृ
भिः पुरुषैः उत् ईयते ज्ञायते॥ स तथा॥ ये शुभकर्मणस्तैः शंकर आराधितो ये च शुभकर्म

फलास्तैर्नाराधितः॥ श्रीपार्वतीरमण इति॥ कर्मफलदातुरीश्वरस्य सिद्धिः॥ फलमत उपपत्तेरि ति
त्यायात् च॥ वृषभ इति॥ अनेकेषु समयेषु श्रीरुद्रेण वृषभरूपं धृतं॥ यद्वा॥ वृषो धर्मस्तेन भा
ति स तथा॥ वृषभांगांग इति॥ वृषभस्य धर्मिष्ठस्यांगान्यंगे स्वरूपेऽस्य॥ स तथा॥ धर्मि
ष्ठः पुरुषो मदीयमंगमिति शिवस्वीकारात्॥ मणिबिंब इति॥ मणिषु बिंबभूतः॥ एकदा रुष्टा
जगदंबा न निरीक्षति स्म॥ नाथं तथा वह्नुरगोचरस्तत्र विद्यमान एव जातः ततो यत्र भवा
नी गच्छति तिष्ठत्युपविशति स्वपिति वा॥ तत्र प्रतिबिंबाधिष्ठानभूतमणिभूमौ मणिस्तंभे
षु मणिभित्तिषु रुद्रमेव पश्यंती लज्जिता बभूवेति गौरीक्रीडनकाव्यादौ प्रसिद्धं॥ तन्मूलभूतं
पुराणवाक्यं कल्प्यं अविरोधात्॥ यद्वा॥ काश्यां श्रीविष्णुतपसा प्रसन्नेनेश्वरेण शिरोधूनने
कृते मणिभूषणं कर्णात्पतितं तेन मणिनाऽबिंबयति स्थानमिति मणिबिंबः॥ जटाधर इति॥ ज
टां धारयतीति निगदव्याख्यानमेतत्॥ इंद्र इति॥ इदि परमैश्वर्ये॥ परमेश्वर इत्यर्थः॥ यद्वा॥ अति

तत्संरूढज्ञलक्ष्यतापसस्योपमन्योः परिक्षार्थमिंद्ररूपं ध्वत्वा प्रकटीबभूवेतीदं रूपः इत्युक्तयाशि
वपुराणादित्यपुराणयोः प्रसिद्धा।। विसर्ग इति। वस्तुतः सर्गादिकं यस्मिन्नास्तीत्यर्थः। अध्य
स्तचात्। विसर्गः प्रलयो वा। स च अध्यस्तप्रपंचाभावः तच्च स्वरूपमेव। यथा प्राभाकरमते घटाभा
वोभूतलस्वरूपमेव तथायमपीति भावः। सुमुख इति। सुंदरानन इतियावत्। सुर इति। देव
इतियावत्। यद्वा। सुष्ठु राव्यादत्त इति सुरः। सर्वायुध इति। सर्वाणीद्रविष्णुप्रभृतीनामायुधानि
यस्य स तथा। चक्रवज्रपरश्वादीनि माहेशस्यैवायुधानि महेशेनैवैतेभ्यो दत्तानीदं तु शिवपु
राणोपक्रमे प्रसिद्धं। सह इति। सहत इति सहः। अत्र केवलसहनमात्रमुक्तमिति पूर्वस्माद्भेदः।
।निवेशन इति। निवेशयति स्वस्वरूपे निजसेवकानिति स तथा। सुधन्वेति। सुंदरपिनाकधनुर्द्ध
र इत्यर्थः। पूर्वं पिनाकधनुरुक्तं मत्र नानाधनूंषि धारयति तेन विशेषः। युगंधार इति। युगं स्त्रीपु ॥५०
रुषरूपं धारयति स तथा। अर्द्धनारीश्वर इत्यर्थः। यद्वा। विद्याऽविद्याचेति धारणात् युगंधरः। प्र

ह्रय

हाहनुरिति। समंताद्धंतीति आहनुः महांश्चासावाहनुश्चेति स तथा। गंध ति। गंधमा
लास्येतिनाम। सुगंधधर इत्यर्थः। भगवानिति। ऐश्वर्यसमग्रस्य धर्मस्य यशस ः। ज्ञानवै
राग्ययोश्चैव षण्णां भग इतीरणा इति स्मोक्तौ। षट्पदार्था भगवच्छब्दवाच्यं ते नेत्यर्थः।
सर्वकर्मणामुत्थान इति। सर्वकर्मोदयाधिष्ठानमित्यर्थः। मंथान इति। कर्मम तपूर्वकं
तत्त्वप्रतिष्ठापक इत्यर्थः। बहुल इति। अनेकरूप इत्यर्थः। बाहुरिति। यथा पुरु सर्वांगोपे
तेनापि बाहुं विना कार्यं कर्तुं न शक्यते तथा पुरुषप्रयत्नप्राक्तनकालदेवतादि मानेषु
पदार्थेषु श्रीमहेशेनैव प्रवर्तितानि नैव सद्भिरपीत्यर्थः। सकल इति। कला चंद्रव सहितः
शास्त्रीया वा। यद्वा। कलाशब्देन स्वांशान्भूता देवता उच्यंते तत्सहित इत्यर्थः। स न इति।
अर्शाद्यच्। सर्वेषां नेत्ररूपः। यन सर्वप्रकाशन इत्यर्थः। सर्वलोचयत्यालो ति वा
।उरस्तालीकर इति। उरसि तालीं करोति। तालीयोगागमे प्रसिद्धा। तालीति। त हृद्वि

राधः। तद्वान्। कदाचिद्गगनतालपृष्ठं स्पृष्ट्वा युद्धं कृतमिति प्रसिद्धिः। ऊर्द्ध्वसंहननइति। ऊ
र्द्ध्वमतिशायनसंघातयति संहतान् पदार्थान् करोतीति तथा। पृथिव्यप्तेजोवाय्वाकाशानि। पृ
थिव्यप्तेजांसि वा। एकैकस्य भागद्वयं कृत्वा एकस्मिन् भागे भागचतुष्टकैयं भागद्वयं वा विधा
य शेषभागचतुष्टयं द्वयं वा द्वितीयार्द्धेनिः क्षिप्ते पंचीकरणं त्रिवृत्करणं च संपद्यते तेन स्थूला
नि भूतानि भवंति तत्संघातस्तु महेशे नैव भवतिना तु जीवसामर्थ्यमिति भावः। इदं विव
रणाचार्यवाचस्पत्याचार्याभ्यां निरूपितं तत्कृपया मया स्पष्टीक्रियते। अभवइति। अः विष्णुः
तस्योत्पत्तिर्यस्मात् स तथा विष्णूत्पत्तिर्महेशादित्यपुराणे प्रसिद्धिः। छन्नपद्मइति। छन्नमा
छन्नं पद्मं पद्ममुकुलाकारं ब्रह्मांडं येन स तथा। पद्मं हृत्पद्मं वा। अन्यच्चतुर्दशहरे वर्त्तमानतो ॥८१
क्त। अत्र तु नदा। छिद्यवर्त्तमानत्वमिति विशेषः। सुविख्यातइति। सुतरां विख्यातः प्रसिद्धः।

पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिता वेदचतुष्टयीषु विख्यातः पूर्वं तन्निर्मातृत्वमुक्तम
त्र तु तद्बोध्यत्वमिति विशेषः। यद्वा। सुष्ठु शोभनो विः पक्षी विद्यते ऽस्य स ब्रह्मा हंसवाहनस्तद्धी
नत्वचोराशिरित्यर्थः। सर्वलोकाश्रयइति। सर्वेषां लोकानां भूर्भुवःस्वरादीनामाश्रयः। यद्वा।
लोकास्तेजांसि चंद्रसूर्यादीनि यानि सर्वाणि तेषामाश्रयः। अन्यत्र तद्वासकत्वमुक्तमत्र तु तद
धिष्ठानत्वमिति विशेषः। महानिति। महत्वं तु सर्वप्रकारेणेति न विशेषजिज्ञासोदयः। मृडइति।
इदं भगवतो रूढं नाम। बलाद्योगकरणं न शोभते। विरूपइति। पंचवक्त्रत्रिनेत्रत्वमुक्तं। ब्रह्मदंड
विनिर्घातइति। ब्रह्मणो दंडेन विनिर्घातो यस्मात्। यद्वा। ब्रह्मणो दंडः ब्रह्मदंडः तस्य विनिर्घा
तो निवारणं यस्मात्स तथा। ब्रह्मणो मस्तकच्छेदनेन कृतनिजदुरितक्षपणकामेन प्रायश्चित्तमाच
रितव्यमिति लोकसंग्रहार्थं प्रसिधिकरणं स एव निर्घातः। नयनदशभुजादिविलक्षणरूपत्वा
द्विरूपः। बकुलइति। बकुलपुलीयतइति बकुलः। नानाजीवेषु अज्ञातः सन्वर्त्तमान इत्यर्थः। इति

मुंडइति। दंडीवासौ मुंडश्चेति। स तथा। कदाचित्सन्यासरूपधारीत्यर्थः। विकुंडलइति। कुंडलरहि
तकर्णइत्यर्थः। कदाचिद्देवसन्नाया ब्रह्मविष्णुरुद्राः त्रयो मिलितास्तदा देवसन्नोयांद्रुपन्नना
दे संपन्ने रुद्ररहंसात्या मुक्त महो अस्यां सन्नायां कीदृशो मद्वस्वर इति। ततो हसितेनैस ति
श्रीरुद्रकर्णकुंडलसमीपद्वौ हंसौ प्रकटीबभूवतुस्तन्मंजुल नादेन नाना विद्योच्चारणे
न सन्नासर्वा विचित्रन्यस्तैवजाता। गरुडपक्षध्वनि वेद निर्घोषा हंसगीतिश्चेति स्वर्यसमी
पस्तद्योत प्रायौ जातौ। इयं कथा शिवकांतीमाहात्म्ये प्रसिद्धा। हर्यक्ष इति। हरी चंद्रसूर्याव
क्षिमिंद्रियं यस्य स तथा। चंद्रसूर्यलोचन इत्यर्थः। ककुप्दिक् अशाद्यास्तु ईशा।नी दिगधिप इ
त्यर्थः। वज्रीति। वज्रायुध इत्यर्थः। वज्रशब्देन रत्नानि वा। तद्वानी नित्यर्थः। दीप्तानि वज्रा
णि रत्नादीनि यस्य स तथा। अत्र दीप्तता विशेषणाद्भेदः। सहस्रपादिति। अनेकचरणा इ ॥९२
त्यर्थः। तत्तु रुद्रसूक्तेनानाप्रकारेण प्रसिद्धं। सहस्रमूर्द्धेति। तदपि तथा। देवेंद्र इति। दे

वेंद्र इति। देवानामिंद्रः देवेषु वा। सर्वभूतमय इति। सर्वभूतस्वरूप इति। सर्वेभूतस्वरूप
त्वं तु प्रातिन्नासिकस्त्रके रिवरजनस्यैनौरूपता। गुरुरिति। वेदवाणीरूपेणोपदेष्टा। सहस्र
बाहुरिति। अनेकबाहुरिति यावत्। बाहुस्थानीया इंद्रादयस्तत्कार्यकर्त्तृत्वात्। सर्वांगइति।
सर्वाण्यंगानि यस्य। चंद्रसूर्यौ पि इंद्रादीन्यंगानि। शरण्य इति। शरणयोग्य इत्यर्थः। यः साधून्
तापयति तस्य तैस्य किं शरण्यत्वं शरण्यत्वे। उत्पथगामिनमपि निजभक्तं यो रक्षति स एव शरण्यः
। अवंत्यां कश्चित्सत्यध्वजो नाम राजासीत्तस्य पुत्रो वसुश्रुतो महाकालस्यैकांतभक्तः नानाप्र
कारैः शिवं पूजयति स्म परंतु प्रजाः पीडयति। यज्ञान् ध्वंसनेस्म। ब्राह्मणादीन् वर्णान् ताडय
ति स्मेत्यनेकानाचारवान् मृतः तदा यमकिंकरैर्नेतुमारब्धे शिवकिंकराः समागत्य तान् ह
त्वा शिवपुरीं निन्युः ततो यमकिंकरैर्निजस्वामिने निवेदितं। ततो धर्मराजेनोक्तं। अणि सर्वपा
पयुक्तोपि शिवभक्तो मम दंड्यो न भवतीति निबंध एव। ग्रंथविस्तरभयाद्धृत्तो नोच्यते। इयं क

थाशिवकांतीमहात्म्ये गोदावरीमाहात्म्ये चादित्यपुराणे प्रसिद्धा। सर्वकर्मत्रदिति। सर्वाणि कर्मा
णि करोतीति तथा। अत्र कर्माणि लौकिकानि वैदिकानि च गृह्यंते। पवित्र इति। अंबरीति या
वत्। पातु पापात्। विशेषेण त्रायत इति वा। त्रिमधुरिति। त्रिमधुर्मंत्रविशेषस्तत्स्वरूपो मंत्रात्म
कत्वाद्देवतायाः। त्रिमधुः ऋग्वेदैकदेशस्तदध्येतृत्वात् मधुरिति। चरणेन तदध्याययीत्रिमधुः
स्ताऽपिशांशरूप इत्युपचारः सचदुर्वासाः। मंत्र इति। अत्र मंत्रमात्रतोच्यते। कनिष्ठ इति।
पुराणत्वेपि कनिष्ठत्वं नूतनवदचल्लासमानत्वं। ब्रह्मपिंगल इति। ब्रह्मस्था सौ पिंगलश्चेत्यत्र
वर्णमात्रमुक्तं। ब्रह्मदंडविनिर्घात इति। ब्रह्मणो दंडेन विनिर्घातो यस्मात्। यद्वा। ब्रह्मणो
दंडः ब्रह्मदंडः तस्य विनिर्घातो निवारणं यस्मा स तथा। ब्रह्मणो मस्तकछेत्तत्कृनितड ।।५३
रितद्रूपेण कामेन प्रायश्चित्तमाचरितव्यमिति लोकसंग्रहार्थं प्रसिद्धिकरणं स एव निर्घातः।

शरघ्न इति। शरान् शत्रूणां हंतीति तथा। शरैर्वा शत्रून् दुष्टान् हंतीति वा। शरपानधृगिति
।शराणां पानं योधृते स तथाविध इत्यर्थः। पद्मगर्भ इति। पद्मा लक्ष्मी शोभा गर्भे मध्ये य
स्यास तथा। यद्वा। पद्मं हृत्पद्मं तन्मध्यवर्तीत्यर्थः। अत्रैवन्यत्र दहराकाशतोक्तः। अत्र तु त
स्मिन् यदंतस्तदन्वेष्टव्यं। तद्वाव विजिज्ञासितव्यमिति श्रुत्युक्तं तदंतर्वर्तिस्वरूपमुक्तमिति
नगतार्थता। महागर्भ इति। महतो महत्तत्वस्य गर्भ इति महत्त्वस्यांतर्यामितया प्रेरक
त्वेन मध्यवर्तीत्यर्थः। ब्रह्मगर्भ इति। ब्रह्मशब्देन चत्वारो वेदास्ते यन्मध्ये तिष्ठंतीत्य
र्थः। ब्रह्मा गर्भे मध्ये यस्य पुत्रत्वेनेति वा। जलोद्भव इति। जलादुद्भवोऽस्येति स तथा। मत्स्या
दं वतारसमाननिवारणायेत्यर्थः। इयं तु प्राग्निरूपितं। गभस्तिरिति। नानाकिरणरू
हस्तदिति। विधेर्जनक इत्यर्थः। वेदकर्ता वा। यो ब्राह्मणं विदधाति पूर्वं तस्मै

हिणा॥नीति। अत्र गतार्थता यद्यपि प्रतीयते तथाप्यत्रात्मगपरिग्रान्नाउपन्यासेनोपनि
षद्वेद्यः। प्रणवो वा। ब्राह्मेति। अत्रैकमूर्त्तिश्च विवक्षया जन्यजनकाभ्नेद विवक्षया वा। ब्रह्म न
विदिति। अत्र ब्रह्मशब्दो जहदजहल्लक्षणया शोधित तत्त्वंपदार्थैकरूपं सकलप्रपंचाती
तं तद्विषयवान् यद्यपि स्वप्रकाशाविषयं ज्ञानं न संभवति तथापि तदाकारवृत्तिसमुल्लासे
स्वस्य स्वप्रकाशेन वृत्तेः प्रतिबिंबोद्भावितत्वेन ज्ञानमुचितमिति भावः। ब्रह्मणो गतिरि
ति। ब्रह्मणो वेदस्य पर्यवसानं। अनंतरूप इति। बहुरूप इत्यनेकानि रूपाण्येकान्यत्रानं
तानीति विशेषः। अनंतैः प्रकारै रूप्यते निरूप्यत इति वा। नैकात्मेति लीलाविग्रहरूपेणा
नेकरूप इत्यर्थः। तिग्मतेजसात्मनैव संभवत्युद्बोधो यस्य स तथा। अत्र संधिरार्षः। ॥९८
ऊर्द्धगात्मेति। ऊर्द्धगामी आत्माऽस्येति। अत्रोर्द्धत्वं सकलमूर्द्धन्यत्वं। ऊर्द्धगश्चावसावात्मे

ति वा। अपसुपतिरिति वा। पशवो मूर्खास्तद्व्यतिरिक्ता विद्वांसस्तेषां पतिः। यद्यपि मूर्खा मूर्खसा
धारण्येनायमेव पतिस्तथापि जनकानुकूलतनयस्येवासाधारण्येन पतिर्भाव उक्तो भवति
। वातरंहा इति। वातस्य रंह इव रंहोऽस्येति स तथा। मनोजव इति। मनसो जवो वेगो यथा त
थावेगोऽस्येति स तथा। चंदनीति। चंदनवत्त्वेन चंदनवृक्षितेत्यर्थः। पद्ममालाग्र्येति। पद्मानां
माला कमलमालानादृशान्यास्यानि। सुंदराण्यथोद्व्यास्येति। यद्वा पद्ममाला कमलमालाग्रा
स्य मुखावयवैकदेशे कंठे यस्य स तथा। यद्वा। पद्मं कमलं तस्य माशोभा तत्सहितं लास्यम
स्य स तथा। कमलकोमललास्यवानित्यर्थः। स्वगुणोत्तरणोत्तर इति। स्वैः स्वनये गुण्या गुणा येऽप्य
ताः। महेशगुणसमानगुणाः तेषामुत्तरं नीचत्वं भावः तेन उत्तर इति। अयं भावः। अयं महेशगुण
समानगुणः इति प्रतीति। मात्रेजानेन मधरीत्वत्य स्वस्योत्तरत्वसंपादकोयमेव। कर्णिकार इ

ति।कर्णी मणिकर्णिका तत्संपादक इत्यर्थः।कर्णिका मणिकर्णिका तत्संपादक इति वा।एकः क
कारोऽनुक्तोऽपि बोधव्यः।न पठ्यते छंदोनुरोधात्।श्रीनारायणेन तपः कर्तुमुद्यतेन तदाश्चर्यात्
शिरोधूननेन धूर्जटेरपतत्कुंडलमिति मणिकर्णिका समजनि।इयं कथा काशीखंडे प्रसि
द्धा।महात्मनेति।स्रजो महत्त्वमम्लानतया निरंतरसौगंध्येन बहुदेशप्रसृतामोदेन फुल्ल
पुष्पैश्च।नीलमौलिरिति।नीलवर्णो मौलिरित्यर्थः।पिनाकधृगिति।पिनाकीत्यनेन गतार्थत्वं
न।एकत्र पिनाकस्य नाममात्रमेतदधीनमित्युक्तं।पिनाकः [illegible] धनुरस्येति।अनु तद्धारणस्योक्त
त्वात्तद्दोषप्रसक्तो न भवति।उमापतिरिति।पार्वतीभर्ता।रक्षितेत्यर्थः।उमाकांत इति।पार्वतीप्राणव
ल्लभ इत्यर्थः।एकत्र स्वामित्वमन्यत्र त्ववल्लभता।सा चान्यैवेत्यर्थः।जाह्नवीहृदयंगम इति।जाह्नवी ॥९५
गंगा तस्या हृदयंगमः प्राणपतिरित्यर्थः।वरः श्रेष्ठः।वराह इति।वराहः शूकरः कदाचिद्गव

ताः शूकरावतार नारायणमानमर्दनाय शूकररूपं धृतमिति स्कंदपुराणे महाकालमाहात्म्ये प्रसि
द्धं।वरं च तदहश्चेत्यजहल्लिंगः।श्रेष्ठो दिवसो महेशो वा इत्यर्थः।अवर इति।अत्र नञ् विरोधार्थे विरु
द्धं वरमवरं घातिरिखंडयति।ति अवरदः।वरेशश्चेति।वरश्चासावीशश्चेति तथा।वराणां ईशः प्र
भुः।महामना इति।महन्मनो यस्य स तथा।मनसो महत्त्वं तत्संकल्पातिरिक्तत्वं।महांश्चासाव
मनाश्चेति वा।ईश्वरस्यांतःकरणात्मत्वादित्यर्थः।महाप्रसाद इति।महाप्रसादः।कृपा तन्मह
त्त्वं चाकेनाप्यप्रतिहतत्वं।अनघ इति।न विद्यते अघं यस्मात्स तथा।शंकुरिति।शंकुर्दक्षप्रजाप
तियज्ञे स्तंभादिः प्राचीसाधनाय निक्षिप्तः शंकुः तं हंतीति तथा।श्वेतपिंगल इति।श्वेतश्चा
सौ पिंगलश्चेति तथा।प्रालेयामलेत्यादि।गौरं कुंकुमपिंजरमित्यादि।प्रीतात्मेति।प्रीतश्चासावा
त्मेति।अप्रीतिः परासूयया स्यात् स्पर्द्धया वा गिरीशाधिकाभावान्नास्त्यास्पर्द्धापि तुल्या
भावान्न भवति।अत एव न विषयाप्राप्त्या न विषयव्याघातात्।प्रयतात्मेति।प्रयतः प्रयत्न

वांश्चासावात्मेति। अत्र नित्यः प्रयत्न ईश्वरनिष्ठो विवक्षितः। संयतात्मेति। सम्यङ्नियमव
दात्मत्यर्थः। प्रधानधृगिति। प्रधानं प्रकृतिमूलं माया तदाधारः अत्राधारत्वं स्वाश्रयाव्यामो
हकत्वेन द्रष्टव्यं। सर्वपार्श्वस्तुत इति। पार्श्वशब्देन पार्श्ववर्त्तिनः। पुरुषनामैकदेशेनामग्रहणं
न्नीमोन्नीमसेन इतिवत्। तैः सर्वैः स्तुतः। तार्क्ष्य इति गरुडः स्वकीयां जननीं दास्यादुत्तार्य
काश्यां निनाय तत्र गत्वा लिंगं स्थापयामास ततः प्रसन्नेन रुद्रेण विष्णोर्वाहनत्वं चावराअनेके
दत्ताः गरुडेन स्थापितत्वाद्गरुडेश्वरलिंगं तत्तार्क्ष्यशब्देनोच्यते। शिवपुराणे प्रसिद्धमेतत्।
धर्मसाधारण इति। धर्मैः साधारणः। धर्मो नाम विधिगम्यः पदार्थविशेषः स तु वेदवाक्यतद्रूप
जीव्यतिरिक्तागम्यः स चानेकधा वर्णाश्रमादिभेदेन तत्र साधारणः यो यस्य विहितस्तदाच ॥५६
रणेन महेशस्तुष्यत्येव। वर इति। वरोत्कृष्टः वरो दक्षिणेत्यादौ वरशब्देन पूर्वाचार्यैर्व्याख्य

स्य

परत्वेन व्याख्यातत्वात् तद्रूपः। कदाचिद्दूरेण दूषणरूपं ध्वंतत्वात्। चराचरात्मेति। स्थावरजं
गमात्मकविश्वस्यात्मा पारमार्थिकं स्वरूप। यद्यपि सर्वात्मेत्यनेन गतार्थत्वं त्वासते तथापि
सर्वशब्दस्य संकोचवृत्तितयापि शंका स्यात्। अत्र तु न संकोचः। तथात्रापि संकोच इति
वाच्यं। सिद्धस्य गतिचिंतनं। न तु तत्राशंकायामत्रापि तत्कल्पनीयं। यद्वा चरगतिभक्षण
२ योरिति धातोश्चरतीति चरः। भक्षकः न चलति पालयतीत्यर्थात् सोऽचरस्तदात्मा। चाच
राचरग्रहणादिवद्दांतस्तत्राद्य। सर्वभक्षकः सर्वरक्षकोयमेवेत्यर्थः। चरागमनशीलः परिच्छि
न्नरूपत्वात्। अचरो व्यापकत्वाद्वेति वा। सूक्ष्मात्मेति। सूक्ष्मं दुर्ज्ञेयं तस्यात्मा पारमार्थिकं रूपं त
तोपि सूक्ष्म इत्यर्थः। सूक्ष्मात्सूक्ष्मतरमिति श्रुतेः। गोवृष इति। गोवृषो वाहनमस्येति तथा। अगो
वृषेश्वर इति। गच्छतीति गौः। अगौः अगौर्वृषो धर्मो यस्य निरंतरस्थायी धर्मवानित्यर्थः। साध्यवि

कृ॑
रिति। साध्या देवविशेषास्तेषामृषिः सनथा। वसुरिति। श्रेष्ठो वसुर्देवानामिति श्रुतेः सकलदे
वश्रेष्ठत्वं लक्ष्यते। आदित्य इति। ऋग्यजुःसामरूपादित्यमंडलावच्छिन्नश्चिदात्मा। यदेतन्मंडलं
तपति तन्महदुक्थं ता ऋच इति श्रुतेः। विवस्वानिति। अत्र विवस्वच्छब्देन काशीखंडोक्तः सूर्यविशे
षरउक्तो भवति। सवितेति। सर्वस्य प्रसवहेतुरिति यावत्। अमृत इति। समुद्राद्धालाहले
निर्याते न कालकूटदर्शनमात्रेण पुरंदरप्रभृतिषु मृतप्रायेषु प्राणधारणशाविमुखेष्वनेन
कालकूटे गृहीतेऽपि तज्जीर्णं। न तु तस्य श्रममात्रमपि जातं न विद्यते मृतो यस्मात् यस्माद्येन
यत्र वा। व्यास इति। विस्ताररूप इति यावत्। कृष्णद्वैपायनोऽपीश्वररूप एव नो चेत् कथमेतादृ
शसामर्थ्यं स्यात्। यद्वा। श्रीकृष्णद्वैपायनेन महेशाराधने कृते श्रीशंभुनोक्तं मदीयं ज्ञानं तवे ॥९१
ति ततो रुद्रध्यानात् क्रतुन्यायेनेश्वर एव संपन्नो व्यासः। इयं कथा स्कंदपुराणादित्यपुराण

योः प्रसिद्धा। सर्वस्य संक्षेप इति। सर्वस्मिन् कार्ये कारणे लीनेऽपश्चाच्छेषभूतः संक्षेपः। विस्ता
र इति। वदादिशाद्वप्रपंचो यासव। पर्यय इति। परिसमंताद्व्ययतीति तथा। नय इति। नीति
शास्त्रप्रणेता। गौतमीयकाणादतत्रप्रणेतेति वा। ऋतुरिति। ऋतुर्वसंतादिरीश्वरसाम
र्थ्यं विना कथं फलपुष्पौषधीनां प्रादुर्भावो भवतीति। संवत्सर इति। संवत्सराधिष्ठात्री देव
ता। मास इति। मासाधिष्ठाता। पक्ष इति। पक्षाधिष्टाता। अर्चिरादिधूमादिमार्गप्रसिद्धा ज्ञेया।
संख्यासमापन इति। कति द्रव्याणि कति गुणाः कति कर्माणि। सर्वत्र संख्याः संति। ईश्वराः
कतीति वदन्नेव दृषत्प्रहारेण मुखे हन्यत इति। तत्र संख्यासमापनं। एकत्वसंख्या धर्मो
पि तत्र व्यावहारिकः का कथान्यासां संख्यानां स्थितिरिति संख्यासमापनः। यद्वा। अहं प्र
थममेवाहमित्यारभ्य भगवता देवान् प्रति सर्वात्मकमुक्तमिदमपि संख्यासमापनं। एको रु
द्रो न द्वितीयो वतस्थे इति श्रुतेः। इदमादित्यपुराणस्थं बोद्धव्यं। कलेति। त्रिंशत्काष्ठाः कला

काष्ठा इति। अष्टादश निमेषाः। लव इति क्षणार्द्धं। मात्रा इति। एकमात्र द्विमात्र त्रिमात्रादि मुहूर्त इ
ति। द्वादश क्षणो मुहूर्त इति। अह इति। पंचदश मुहूर्त्तं दिवा रात्रिस्तावती। सूर्यगतिभेदेन रात्रि
दिनन्यूनाधिकत्वेपि सामान्येनोक्तं। क्षण इति। त्रिंशत्कलात्मकोयं क्षणः। ननु तार्किकाभिमतो
ऽत्र क्षणः। क्षणोवसरो वा। सर्वाधिष्ठातृत्वेन सर्वसोपाधिककालनियंतृत्वेनायमेवेश्वर इत्यर्थः
। विश्वक्षेत्रमिति। विश्वस्य क्षेत्रमुत्पत्तिस्थानं। प्रजाबीजमिति। प्रजानां बीजमुत्पादकं। एतेन
क्षेत्रबीजरूपो जननीजनकरूपेणायमेवेत्यर्थः। लिंगमिति। लीनमर्थं गमयतीति लिंगं। ली
नोऽव्यक्तः सच्चिदानंदरूपस्तमर्थं स्वस्वरूपं बोधयतीत्यर्थः। आद्य इति। आदौ व्यक्तः नात्र
प्रागभावाप्रतियोगित्वं येन गतार्थता स्यात्। किंतु सृष्टिप्रारंभात्पूर्वमयमेवादावभिव्य
क्तो नान्य इत्यर्थः। अनिंदित इति। अनिंद्य इत्यत्र निंदानर्हत्वमुक्तमत्र तु न केनापि निंदित ॥५८
। तेन न गतार्थता। सदिति। सद्ब्रह्म सदेव सौम्येदमग्र आसीदिति श्रुतेः। असदिति। असद्वा

इदमग्र आसीदिति श्रुतेः। असच्छब्देनाभिव्यक्तनामरूपं। व्यक्तमिति। कर्पूरगौरादिमूर्त्या
व्यक्तमित्यर्थः। अव्यक्तमिति। चंद्रशेखरादिरूपेणानभिव्यक्तत्वेपि स्वस्वरूपस्यानपाया
दित्यर्थः। नपुंसकत्वेन निर्देशः श्रुत्यनुकृतया। अचिंत्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत्
। सूक्ष्मात्सूक्ष्मतरमिति श्रुतेः। पितेति। हितोपदेष्टृत्वादिना पिता। मातेति। निरुपाधिकप्रेमावि
र्भावेन। पितामह इति। अपत्यविषयप्रेम्णोप्यपत्यापत्यविशेषयप्रेमातिशयस्तदनुभव
वेद्य एव। अत्र तु पितामहशब्देनेदमुक्तं भवति। ब्रह्मादीनां पितृत्वेपि जीवमात्रस्य पिता
मह ईश्वर एव। तेन न तस्यातितरां जीवविषयं प्रेमेत्यर्थः। यद्वा। पितामहत्वं न प्रसिद्धो ब्र
ह्मा। तस्य पितामहः श्रीमहेशः। विष्णोः पिता। विष्णुपुत्रश्च ब्रह्मा। तेन महेशपुत्रो विष्णुः त
त्पुत्रो ब्रह्मा एकदैकार्णवे जाते सर्वप्रलये एकाकी विरिंचिः श्रीनारायणं दृष्ट्वा प्राह। अ

स्मिन्नकार्ये देवेनवा क्तः तदा विरंचिरुवाच। अहमेव पुरातनः मय्येव सर्वं विश्वमित्युक्ते वि
ष्णुर्ब्रह्मणो देहं प्रविश्य तदवलोक्य मुखान्निःसृतः। ततो हरिणोक्तं। त्वं मद्देहं प्रविश।
एवमुक्ते ब्रह्मा हरिदेहं प्रविष्टो भ्राम्यन् कोटिवर्षैः पारं न प्राप विस्मितो निर्गमद्वारं न
त्वलेभे। ततो नाभिनालान्महता कष्टेन गत्वा यथा शिशुर्निःसरति तथा निःसृतः प्राह
ततो हरिः मयानवरोधः कृतो गर्वनिवृत्यै त्वं तु समर्थो भुवनं स्रष्टुं पश्चाद्विष्णुना वरा
दत्तः। तेन वरेण संतुष्टः। ततः संतुष्टेन विधिनोक्तं। आवाभ्यां सदृशः कश्चिन्नास्ति। आ
वामेव। ततो हरिर्जगाद। न जानीषे त्वं श्रीमहादेवं ततोधिकः समानो वा न कश्चिदस्ति। त
तो विरंचिनोक्तं। निद्रालिप्तस्त्वं वदसि त्वत्तो नाधिकः कश्चित्। ततो हरिणोक्तं श्रीमहे ॥९९
शमायया मोहितावावां स एवेश्वरः। श्रीहरिणा बहुनिरूपणं कृतं। ततो विधिरुवाच

। न महं न पश्यामि। ततो नारायणेन दिव्यं ज्ञानं दत्तं। श्रीमहे [illegible]
व। तुष्टेन महेशेनोक्तं वरं वृणीष्व। मोहितेन ब्रह्म [illegible] भव। ततो नारायणाय
वरो दत्तो नावयोर्भेदो ज्ञायते कदाचित्। वादृशा एवं तत्त्वतो मां ज्ञास्यंत्यन्ये तु त्वामे
व ज्ञास्यंति। पश्चाद्विष्णुनोक्तं अलमनेन वरेण मम सदा त्वच्चरणकमले भक्तिरव्यभि
चारिणी भवतु। श्रीशिवेन ब्रह्माणमुक्तं मदाज्ञया त्वं स्रष्टा भव। विष्णो त्वं पालय। अत ए
व पितामहः। इयं कथादित्यपुराणे प्रसिद्धा। मायावीत्यत्रापि कथेयं ऽ योज्या। स्वर्गद्वार
मिति। स्वर्गगमनकारणं। दिवस्पतिरिति श्रुतेः। प्रजाद्वारमिति। प्रजा सांसारिकसंतानं
तत्साधनं। तुष्टो रुद्रो नानावंशं विस्तारयति। विद्यया वा। वंशः शिष्योपशिष्यद्वारा। यथा
याज्ञवल्क्यादीनां। मोक्षद्वारमिति। मोक्षो मतभेदेन नाना सर्वेषामास्तिकदर्शने श्रीश्वर

...नीत्या

...महादेवं... ...नमस्ति। ...नुकंपी भवा...

रूपाद्व्यतिरेकेण न भवति। तत्परं मोक्षं गमिष्यतीति श्रुतेरित्यर्थः। त्रिविष्टप इति। त्रीणि विष्ट-
पानि यदाधेयतया संतीत्यर्थः। निर्वाण इति। निर्वाणो मोक्षः तत्स्वरूपः। तत्स्वरूपः पूर्वं
मोक्षकारणतोक्ता। मोक्षरूपतोक्ता। त्वेति न गतार्थत्वं। ह्लादनमिति। यद्यप्येहजहल्लिं-
गत्वान्नावात्पुल्लिंगतापि घटते। तथा वस्तुमात्रविवक्षयोक्तं। यदाह्लादनं वस्तु चंदनपु-
ष्पादि तत्सर्वं भगवदैश्वर्यव्यतिरेकेण न भवतीत्यर्थादिदमैश्वररूपमाह्लादनमित्यर्थः
।ब्रह्मलोकपरागतिरिति। पूर्वं ब्रह्मणो गतिरुक्ता। अधुना ब्रह्मलोकस्य सत्यलोकस्य ग-
तिः सा परकृष्टेति विशेषः। यद्वा। ब्रह्मणो लोक आलोकनं तत्र परागतिः। भवानीहृष्ट-
विह्वलतया क्रूरदृष्टिर्यस्य लज्जितोऽस्य ब्रह्मणः परागतिः दयालुना शंभुनोक्तं। भयं मा कु- ॥१००
रु रेतद्दमभोप्रक्षिपानतोक्ते अक्के वालखिल्या बभूवुः। नो चेद्ब्रह्मणो लज्जया ति-

पीडितो दास्यात्। इयं कथा वालिखिल्यमहात्म्यादित्यपुराणयोः प्रसिद्धा। देवासुरविनि-
र्मातेति। देवौ अत्रैकादशसु नामसु यत्र देवासुरपदं तत्र सर्वत्र नामद्वयं बोध्यं। देवनि-
र्माता। असुरनिर्मातेति। देवासुरपरायण इति। देवानां परममयनमसुराणां च। देवासु-
रगुरुरिति। उभयोरपि हिताहितप्राप्तिपरिहारोपदेष्टा। देव इति। दीव्यति स्तुतिं करोति स्व-
गरिष्ठानारायणादीनामिति यथा। देवासुरनमस्कृत इति। उभाभ्यां कृतप्रणाम इत्यर्थः।
देवासुरमहामात्र इति। देवासुरयोर्मध्ये महती मात्रा कला यस्य स तथा। अन्यथा तत्साम-
र्थ्याभावात्। देवासुरसमाश्रय इति। उभयोः सम्यगाधार इत्यर्थः। देवासुरगणाध्यक्ष इति
।उभयगणयोः कृतोपासनयोः प्रत्यक्षो नान्यत्र कि व्यतिरेकेण प्रकृपात इत्यर्थः। देवासुरग-
णाग्रणीरिति पूर्वं देवासुरयोः परायणतोक्ता। अत्र तु तद्द्वयोरस्यति विशेषः। देवातिदेव इति।
देवेभ्योऽतिदेवः परमोत्कृष्टदेव इत्यर्थः। देवर्षिरिति। देवानामृषिर्दीव्यद्वा। ऋषिर्वंसकलम-
...नत्या
...पते... समानो महादेवः ... नामभिः। भक्तानुकंपी ...

त्रप्रक[illegible]तंतु श्रीमहेशस्यैव नान्यस्य।देवासुरवरप्रद इति।उभयोर्वरदाता भवा
नीपतिर्नान्यः।देवासुरेश्वर इति।उभयोर्नियंता।श्रीमहादेवो नान्यः।देव इति।विजिगी
षतीति देवः।देवासुरमहेश्वर इति।पूर्वमीश्वरत्वमुक्तं।अधुना तदीश्वरस्याप्ययमीशि
ता।तेनायं विशेषः।सर्वदेवमय इति।अत्र प्राचुर्यार्थो मयट्।प्रचुरः सर्वदेव इत्यर्थः।
सर्वशब्देन प्राचुर्यार्थसिद्धावपि प्राचुर्यं चात्र सर्वांगोपेतत्वेन ज्ञेयं।अचिंत्य इति।चिती सं
ज्ञाने।ज्ञातुमशक्यः स्वप्रकाशत्वात्।भानं तु तदाकारवृत्त्युदये सति वृत्तेरप्यवभास
कत्वमिति भावः।भावानामात्मसंभव इति।कथं न देवाः।कुतश्चिदुत्पन्नास्तेषां म
ध्ये स्वयंभूरीश्वर एव।भवनं नाशोत्पत्तिः।किंतु व्यक्तीभाव एव।यद्वा।देवानामिंद्रि
याणां आत्मसंभव इति।आत्मनः स्वरूपस्य संभावना हेतुः।इंद्रियाणि जडानि तत्र चि ॥१०१
त्स्वरूपेणेश्वरेणैव विदाधानशक्त्या तदात्मत्वं प्रकाश्यत इत्यर्थः।चक्षुषश्चक्षुरुत श्रोत्र

स्य श्रोत्रं वचसो वाग्मनसो मन इति श्रुतेः।उद्भिज्ज इति।उत् ऊर्ध्वं भिनत्ति ब्रह्मरंध्रं यो
गबलेनेति।योगी उद्भित्।तस्मिन् जातः।प्रकटीभूत इत्यर्थः।त्रिक्रम इति।त्रिषु लो
केषु क्रमः पादविक्षेपोऽस्येति तथा।यद्वा।त्रिषु गुणेषु सत्वादिषु क्रमः संक्रमणमस्य।
स तथा।सत्वावच्छिन्नः पालयति।रजोवच्छिन्नः सृजति।तमोऽवच्छिन्नः संहरतीत्यर्थः।
वैद्य इति।आयुर्वेदनिर्मातृत्वेन चरकाचार्यप्रभृतिभिरुपास्यत्वात्।नानौषधीवीर्यसं
पादनेन वैद्यचिकित्साविषयज्ञानप्रदत्वेन रोगिणां पथ्याशिवादिबुद्धिप्रदत्वेन किं
बहुना सकलरोगनिवर्तकसामर्थ्यसंपादनेनेश्वर एव वैद्यराज इति भावः।विराज
इति।विशेषेण राजत इति विराजः।पचाद्यच्।यद्वा।विः पक्षी हंसस्तस्य राजा विराजः
ब्रह्मणो हंसस्य ज्ञानप्रद इत्यर्थः।हंसो यथा क्षीरनीरविवेकं धत्ते तथायमपि ददाति

[illegible]त्या[illegible]इए[illegible]

[illegible]ध्यायमानो महादेवः स्वीयेनात्मना भक्तिः।भक्तानुकंपी भवा[illegible]

पुरुषविवेचकइतिवाहंसएवायं।विरजोंबरइति।विरजानदीतांअंबरयतिआका
शसदृशींनिविडतारहितांसुखननर्तुंयोग्यांकरोतिसतथा।इज्यइति।यष्टुंयोग्यइ
ज्यः सर्वयज्ञेषुमहेशएवयष्टुंयोग्यइत्यर्थः।हस्तिमुखव्याघ्रइति।हस्तिमुखोगणेशः
अन्योहस्तिव्याघ्रादिभ्याबिभ्यत्ययंतुहस्तीनव्याघ्रोपलक्षितसिंहादिभ्योनबिभ्य
तीत्यर्थः।।देवसिंहइति।देवेषुसिंहः सर्वेदेवामृगरूपाएतस्याग्रे अयंतुदेवानांनिग्रहा
नुग्रहकर्तेत्यर्थः।नरर्षभइति।नरान्नरनारायणत्वाऋषभइत्यर्थः।विबुधाग्र्यवरश्रेष्ठइति
।विबुधादेवाः तेष्वग्र्याइंद्रादयः तेवराब्रह्मादयः तेभ्योपिश्रेष्ठस्तेनास्मादन्यः श्रेष्ठोन
विद्यतइत्यर्थः।यद्वा।पूर्वंशिबिः राजानानासाधनैः शक्रत्वंप्राप्तस्तत्रयोगेभ्योनिर्वि ।।१०२
ण्णोबृहस्पत्युपदेशेनशंभुमाराध्यनिर्वाणंगणाधीशत्वंवप्राप्तः इंद्रायवरोदत्तः।तन

वैष्विं

तेनविबुधाग्र्यवरश्रेष्ठइयंकथादित्यपुराणेप्रसिद्धा।सर्वदेवोत्तमोत्तमइति।सर्वेंद्रियंमनः
सर्वेंद्रियेषुप्रधानत्वात्तस्मादुत्तमआत्मातस्मादुत्तमोऽत्रोत्तमत्वंप्रकाशकत्वेन।गुरुरि
ति।परमार्थप्रकाशकत्वात्।कांतइति।कोब्रह्मा।तस्यांतोयस्मात्सतथा।निजइति।कस्या
प्यन्यानात्मीयोनभवति।सर्वइति।सर्वाधिष्ठा नात्रजतस्यैवशक्तिः।पवित्रइति।पा
त्पापात्त्वैतूविशेषेणत्रायतइतिसतथा।सर्ववाहनइति।सर्वान्वाहयतिइतस्ततश्चाल
यतिप्रापयतिवाभीष्टमितिसतथा।प्रयुक्तइति।प्रकृष्टयोगवानित्यर्थः।शोभनइति।
सुंदरइत्यर्थः।वज्रइति।अतिकठोरत्वाद्वज्रः।ईशानइति।यद्यपीश्वरेशानादिश
ब्दाएकार्थाइवप्रतीयंतेतथापिविषयभेदेनभेदोद्रष्टव्यः।ईशानः सर्वविद्यानामितिश्रु
त्यासर्वविद्यासाहचर्यस्योक्तत्वेनविद्याप्रभुत्वमुक्तंनचविद्यानामज्ञानंतच्चपरोक्षमपरोक्षं।व

...नित्यं।मा... इ एन...
तेनोक्ते...राध्यमानोमहादेवः श्रीयनवाम्नना...ः।...कानुकंपी...वा...

तिद्विविधं तत्रैशाद्वज्ञानं महेशात्तपसैव भवतीत्यर्थः। प्रभुरिति। पूर्वं प्रभुत्वं मूलमायाद्योत्त
कत्वेनोदासीनस्य जगदारंभकत्वं सांप्रतं तु कर्पूरगौररूपावच्छिन्नस्य नानाकार्यनिष्पादन
सामर्थ्यमिति विशेषः। अव्यय इति। अपक्षयरहित इत्यर्थः। यद्वा। अः विष्णुस्तस्य विः गरुडस्तं
अयति प्राप्नोति नानावरदानार्थमिति। यद्वा। व्ययरहिता एवैतावंतस्त्वादित्यपुराणोक्ताय
त्र संति स तथा। ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः। द्रष्टृत्वमात्मसंबोधो ह्यधिष्ठान
त्वमेव च। अव्यया नित्यशो तानि नित्यं तिष्ठंति शंकरे इति। तथा। शृंगीति शृंगधर इति याव
त्। शृंगप्रिय इति। शृंगं प्रियमस्य स तथा। बभ्रुरिति। बभ्रुवर्णः प्रबभ्रुर्वे वृषभ्नायेति श्रुते
ः। राजराज इति। राज्ञां चंद्रेण राजते स तथा। राजश्चंद्रस्य राजेति वा। यद्वा। पुरा सोमशर्मा कि ॥१०२
श्चिदवंत्यां ब्राह्मण आसीत् स धनार्जनाय देशांतरं गतः तस्य नार्यया व्यभिचारिण्यास्य

ज्ञातपुत्रोऽजनि स चांडालः सन् सकलजीवघाती कदाचिच्चौर्यबुद्ध्या शिवप्रसादं गतः
तत्र रात्रौ लोकाः शिवभक्ताः किं कुर्वंते स्म। तत्र द्रव्यनिरीक्षणाय गतेन दीपो रक्षितः। सम्य
क्षया शिवनिरीक्षणं जागरणं च तत्र। पश्चाच्चौरोयमिति ज्ञात्वा शिवभक्तैर्हतः ततो गंधा
रदेशराजाभवत्। निरंतरं शिवभक्तः संग्रामे पतितः पश्चान्निजभक्तवात्सल्यावंतीना
थेन कुबेरः ततः स राजराजो जातः। तत्कर्तृत्वेनायं राजराजः राजराजयतिलकमिति
। इयं कथा अवंतीमाहात्म्ये प्रसिद्धा। निरामय इति। सकलप्रपंचदोषरहितः प्रपंच
स्य तत्राध्यस्तत्वात्। तथा च श्रीशंकराचार्यचरणाः। विद्वात्मा तदीयेन गुणेन दोषेण वा
णुमात्रेणापि न संबध्यत इति। अविराम इति। विरामोवसानं न तु ध्वंसः अस्यायं समाप्ति
समय इति लोकप्रसिद्धिः तद्रहित इत्यर्थः। यद्वा। विशब्दो राहित्यवाची श्रीरामरहि
तोविरामः [illegible] मनाक्षेनात्र दाशरथिजामदग्न्यावुच्येते तादृशो न भवति सदा परशुराम
[illegible] नीत्यात्मानमा [illegible] इएना [illegible]
[illegible] तंतो [illegible] र॥ ध्यायमानो महादेवः श्रीयते वात्मना भक्तिः। भक्तानुकंपी भवा [illegible] र्दवा [illegible]

येतसिर॰ ॰द्वश्वनसिविघ्नत इतिपुराणप्रसिद्धोरित्यर्थः। यद्वा। विशिष्टो रामो विरामः
सत्तुसेतुबंधरामेश्वरः। श्रीरघुनाथेनपूजार्थंस्थापितः वैशिष्ट्यं ब्रह्महत्यादिपातकनि
वर्तकत्वेन। सुशरण इति। साधुपुरुषाणां शरणं यत्र स तथा। यद्वा। सुष्टुसाधोः शि
खंडिनः पुत्रस्य सुशीलस्य शरणभूतः शिखंडिनो मुनेः पुत्रः सुशीलो वेदानधीत्य वि
रक्तः श्वेताश्वतरमुनेः पाशुपतं योगमवाप्य मुक्तिं प्राप्तः। इयं कथा विस्तरादादित्यपुरा
णप्रसिद्धा। विराम इति सर्वानर्थस्येति शेषं पूरयित्वा तस्समापनो यत्रानर्थमात्रं लीयत
इत्यर्थः। सर्वसाधन इति। सर्वं साधयतीति तथा। ललाटाक्ष इति। ललाटे ह्निनयनं तृती
यमस्य स तथा। विश्वदेह इति। देहो ऽत्र भोगकारणं। सर्वेषां भोगकारणं महेशएव। हरि
ण इति। कदाचित्पार्वत्या रुष्टया उक्तं न क्रीडां करिष्य इति। प्रतिज्ञाते भवानी प्रतिज्ञायाभं ॥२०४
गायाभिनव हरिणरूपं विधाय सहसा क्रीडागारं प्राप्तस्ततो ऽतिविलक्षणं हरिणं दृष्ट्वा

श भवानी ने गृहीत्वा तेन नानाकौतुकं कृतवती। अहो विचित्रोयं हरिणो मत्सकाशात्माग
छत्विति क्रोश्री महेशेन निजस्वरूपं व्यक्तीकृतमिति विरूपाक्षमहिमप्रतिपादककथा
यां प्रसिद्धं। ब्रह्मवर्चसीति। तपोबलेन योगबलेन च ब्रह्मवर्चसमस्येव। स्थावराणां प
तिरिति। पर्वतमात्राधिष्टाता। नियमेंद्रियवर्द्धन इति। नियमार्थं इंद्रियछेदकः वृद्धिधातो
र्विनाशोपिष्टत्वेः भृग्वादीनां शापस्तथो भवत्विति नियमरक्षार्थं। येनास्वं इंद्रियमुपस्थे
ंद्रियं पातितमिति कथा शिवपुराणे प्रसिद्धा। सिद्धार्थ इति। सिद्धा ऽर्थो ऽस्येति तथा।
सिद्धानामणिमादिसिद्धियुक्तानां योगिनामयमर्थो नामप्र
ज्ञानार्थो निष्पन्नार्थो वा। सिद्धानामणिमादिसिद्धियुक्तानां योगिनामयमर्थोनामप्र
योजनं। योगाभ्यासस्यैदमेव प्रायोजनं। यन्महेशप्राप्तिरित्यर्थः। सर्वसिद्धार्थ इति। स
वैः सिद्धैरर्थ्यते प्रार्थ्यते स तथा। यद्वा। सिद्धार्था ह्योषधीमंत्राः स्कंदपुराणोक्तास्ते सर्वे य
दृशोसंतीति। नित्य इति। अनुष्ठेयपदार्थाः पदद्वया पुल्लिंगनिर्देशाः। नित्यानां कर्मणां
॰॰॰॰ ॰॰॰॥ ॰ ॰यमाना पुह॰

विनश्वरश्चिदचिन्नर्नियामेश्वरप्रापकत्वमिति शास्त्ररीतिः ईश्वरस्य चित्तश्चिज्जनकत्वात्
सादृश्यं। सत्यव्रतइति। अबाध्यसंकल्पइत्यर्थः। शुचिरिति। पवित्रइतियावत्। व्रतादिरि
ति। सर्वाणिव्रतानिरुद्रप्राप्तानिरुद्रविषयाणिरुद्रविभूतिविषयाणिरुद्राराधनपुरः
सराणिवा। परंब्रह्मेति। जीवस्यापिदृढत्वाद्बृंहणत्वाधादृशीनादृशीब्रह्मनास्तिनतु
दृष्टत्वं। परंब्रह्मश्रीरुद्रएव। मुक्तानांपरमागतिरिति। परमागतिर्नाममनसायुज्यंतन्तु
मुक्तानामन्येषांयथासंभवं २ मुक्तिः। विमुक्तइति। मुक्तत्वेसतिविशिष्टतासदामु
क्तस्वरूपेण। दीर्घतेजाइति। दीर्घत्वंसर्वत्रप्रसरणशीलंतेजोऽस्यैसतथा। अत्रली
लाविग्रहधारिणस्तेजउच्यते। श्रीमान्। श्रीःशोभातद्वान्। श्रीवर्द्धनइति। उपासितः
श्रियंवर्द्धयत्यधिकाधिकांकुरुते। कृपिनोनाशयतिच। जगदिति। विनश्वरपारमार्थिकं ॥१०५
स्वरूपंत्रयमेवान्यथाविश्वस्यनाशेतन्नाशइत्यपिच्चांनाशंकास्यात्। यथाप्रसादइति

।योग्यःसन्प्रसन्नइत्यर्थः। भगवानिति। भगशब्देनभाग्यंतद्वानित्यर्थः। यद्वाभानि
नक्षत्राणितेषुगच्छतीतिभगश्चंद्रस्तद्वान्चंद्रशेखरइत्यर्थः। श्रीकांतलक्ष्मीधरवासुदे
वान्गुरूनमाम्येकतन्तुद्वारान्यत्पादपद्मांगुलिरेणुमात्रासरस्वतीमन्मुखआ
विरासीत्॥१इतिश्रीधर्मब्रह्ममीमांसोपाध्यायाचार्यश्रीलक्ष्मीधरपूज्यपादशिष्य
भट्टश्रीहरिनाथविरचिताशिवसहस्रनामटीकागूढार्थदीपिकासमाप्ता ० ॥
नमःशिवाय॥ समाप्तमिदंसहस्रनाम॥ यंनब्रह्मादयोदेवाविदुर्येनमहर्षयः। तंदेवंस
र्वपूज्यंचकस्तोष्यतिजनार्द्दनं॥१भक्तिंचेवपुरस्कृत्यमयायज्ञपतिर्विभुः। ततोनुज्ञामवा
१ प्येवंस्तुतोमतिमतांगतिः॥२शिवमेवंस्तुवन्देवंनामभिःपुष्टिवर्द्धनैः। नित्ययुक्तःशुचिर्भू
त्वाप्राप्नोत्यात्मानमात्मना॥३एतद्धिपरमंब्रह्मस्वयंगीतंमहात्मना। ऋषयश्चैवदेवाश्च
[illegible]॥४स्तूयमानोमहादेवःप्रीयतेचात्मनाभिः। भक्तानुकंपीभग

रुद्रा कैः [illegible] ना नूः।५ तथैव च मनुष्येषु ये मनुष्याः प्रधानतः। आस्तिकाः श्रद्दधानाश्च
निर्जन्मभिः स्वभावैः॥६ जाग्रतोथ स्वपंतश्च व्रजंतो गतिसंस्थिताः। स्तुवंति स्तूयमानं च तु
ष्यंति च रमंति च॥७ जन्मकोटीसहस्रेषु नानासंसारयोनिषु। जंतोर्विशुद्धपापस्य भवे
द्भक्तिः प्रजायते॥८ उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः। एतद्दैवेषु दुःप्रापं मानुषेषु न
लभ्यते॥९ निर्विघ्ना निश्चला भक्तिः श्रीरुद्रेऽव्यभिचारिणी। तस्यैव च प्रसादेन भक्तिरुत्प
द्यते नृणां॥१० यया यांति परां सिद्धिं तद्भावगतमानसाः। य सर्वभावेन गताः प्रपन्नेन भव
नराः॥११ प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत्। एवमन्ये न कुर्वंति देवाः संसारमोच
नं॥१२ मनुष्याणां महादेवादन्यत्रापि तपोबलात्। इति तेनेंद्रकल्पेन भगवान्सदसत्पतिः
॥१३ कृत्तिवासाः स्तुतः पूर्वं तंडिना शुद्धबुद्धिना। स्तवमेनं भगवतो ब्रह्मा स्वयमधारयत्॥ ४
१४॥ ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे॥ मृत्युः प्रोवाच रुद्राणां रुद्रेभ्यस्तंडिमागम

कारान [illegible] त मांडणाजी आगराव प्रीतकामः॥ भूलं नव [illegible] कल्याणमस्तु॥ श्री
एकादशीनि [illegible] शांतः पाणिभा [illegible] नो ना [illegible]
निर्दूषि नद्भः॥१० [illegible] पतिकलायुक्ते [illegible] कारः प [illegible] धुना
[illegible] रामि॥ एवं नाना विधा भवंति प्राज्ञुर्दीर्घापराधः [illegible]
महम्मतेच त्रसंत्र रेयं॥

शिवसहस्रनामभाष्य १०६

स्हा[illegible]तानू।५ तथैव च मनुषाय[illegible]

[illegible]पि महता तपसा प्राप्तं नंदिना ब्रह्मसद्मनि। नंदिः प्रोवाच शक्राय गौतमायाह भार्गवः॥

न १६ विवस्वताय मन्ने गौतमः प्राह माधवः नारायणाय साध्याय मनुरिष्टाय धीमते॥१७॥ य

मायप्राह भगवान् साध्यो नारायणोऽच्युतः। नाचिकेताय भगवान् प्राह वैवस्वतो यमः।

॥१८ मार्कंडेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत॥ मार्कंडेयान्मया प्राप्तो नियमेन जनार्द-

न॥१९ तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतं। स्वर्ग्यमारोग्यमायुष्यं धर्म्यं बल्यं तथैव

च॥२० न चास्य विघ्नं कुर्वंति दानवा यक्षराक्षसाः। पिशाचा यातुधानाश्च गुह्यका भुजगा-

स्तथाः॥२१ यः पठेत्प्रयतो भूत्वा ब्रह्मचारी जितेंद्रियः। अभग्नयोगो वर्षं तु सोऽश्वमेधफलं

लभेत्॥२२ इति श्रीमहाभारते शतसाहस्र्यां संहितायामानुशासनिके पर्वणि श्रीशिव

सहस्रनामसंपूर्णसमाप्तं॥ छ ॥ संवत् १६९८ वर्षे कार्तिकमासे शुक्लपक्षे पंचमी भौम

दिने लि[illegible]तमिदं शिवनाम्नां सहस्रं टीकासंपूर्ण॥ लिखितं ब्राह्मणं नरनागर ज्ञाती र